TEXT PROBLEM WITHIN THE BOOK ONLY

UNIVERSAL
LIBRARY
OU_184524
UNIVERSAL
LIBRARY

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः

(१२)

तैत्तिरीयोपनिषत् ।

मूल्यं—पञ्चसप्ततिनवपणाधिकं रूपकद्वयम् (२—७५)

OUP—43—30-1-71—5,000

OSMANIA UNIVERSITY LIBRARY P. G.

Call No. S 294.592 V65K   Accession No. S 2308

Author

Title कृष्णयजुर्वेदीयतैत्तिरीयसंहिता

1923.

This book should be returned on or before the date last marked below

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १२

कृष्णयजुर्वेदीया

तैत्तिरीयोपनिषत् ।

आनन्दगिरिकृतटीकासंवलितशांकरभाष्योपेता ।

पण्डित वामनशास्त्री इसलामपुरकर ' इत्येतैः
संशोधिता ।

तथा

शंकरानन्दकृता तैत्तिरीयोपनिषद्दीपिका ।

एतत्पुस्तकमानन्दाश्रमस्थपण्डितैः संशोधितम् ।

पुस्तकमेतत्
बी. ए. इत्युपपदधारिभिः
विनायक गणेश आपटे
इत्येतैः
पुण्याख्यपत्तने
आनन्दाश्रममुद्रणालये
आयसाक्षरैर्मुद्रयित्वा
प्रकाशितम् ।

पञ्चमीयमङ्कनावृत्तिः ।

शालिवाहनशकाब्दाः १८५१

खिस्ताब्दाः १९२९

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः) ।

मूल्यं पादोनरूपकद्वयम् (१८१२) ।

ॐ तत्सद्ब्रह्मणे नमः ।

कृष्णयजुर्वेदीयतैत्तिरीयारण्यकान्तर्गता

तैत्तिरीयोपनिषत् ।

आनन्दगिरिकृतटीकासंवलितशांकरभाष्यसमेता ।

यत्प्रकाशसुखाभिन्नं यन्मन्त्रेण[1] प्रकाशितम् ।
विवृतं ब्राह्मणे तत्स्यामदृश्यं ब्रह्म निर्भयम् ॥ १ ॥

यजुर्वेदशाखाभेदं तैत्तिरीयकोपनिषदं व्याचिख्यासुर्भगवान्भाष्यकारस्तत्प्रतिपाद्यं ब्रह्म जगज्जन्मादिकारणत्वेन तटस्थलक्षणेन मन्दमतीन्प्रति सामान्येनोपलक्षितं, सत्यज्ञानादिना च स्वरूपलक्षणेन विशेषतो विनिश्चितं नमस्कारच्छलेन संक्षेपतो दर्शयति—

यस्माज्जातं जगत्सर्वं यस्मिन्नेव[3] प्रलीयते ।
येनेदं धार्यते चैव तस्मै ज्ञानात्मने नमः ॥ १ ॥

यस्माज्जातमिति । निमित्तोपादानत्वयोः पञ्चम्याः साधारण्यादुभयविधमपि[4] हेतुत्वमविवक्षितम् । कार्यविलयस्य प्रकृतावेव नियतत्वाद्विशेषतः प्रकृतित्वमाह—यस्मिन्निति । कार्यसाधारणस्य निमित्ते[6] धर्मादावपि[7] प्रसिद्धत्वात्साधारणकारणत्वमाह—येनेति । ज्ञानात्मन इति स्वरूपलक्षणसूचनम् ॥ १ ॥

गुरुभक्तेर्विद्याप्राप्तावन्तरङ्गसाधनत्वं ख्यापयितुं गुरून्प्रणमति—

यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः ।
व्याख्याताः सर्ववेदान्तास्तान्नित्यं प्रणतोऽस्म्यहम् ॥ २ ॥

यैरिति । पदानि च वाक्यानि च प्रमाणं चानुमानादि तद्विवेचनेन व्याख्याता इति[10] ॥ २ ॥

[11] चिकीर्षितं निर्दिशति—

तैत्तिरीकसारस्य मयाऽऽचार्यप्रसादतः ।
विस्पष्टार्थरुचीनां हि व्याख्येयं संप्रणीयते ॥ ३ ॥

---

१ ख. ग. च. ज. झ. ट. यन्मात्रेण । २ ख. ग. च. °रबले° । ३ क. घ. च. छ ज. झ. °व विधीय° । ञ °व विली° । ४ क. ख. ग. ज. ठ. °पि कारणत्व° । ५ क. ख. ग. च. ज. झ. ट. °त्वमिहावि° । ६ क. ख. ग. च. ज. ट. °तेऽपि ध° । ७ क. ख. ग. च. ज. ट. °र्मादौ प्र° । ८ ख. ग. ञ. °रणं का° । ९ ञ. °णमाम्यह° । १० क. ख. ग. च. ज. ट. °इत्यर्थः ॥ २ ॥ ११ ख. ग. ज. निदर्शयति ।

तैत्तिरीयकेति । व्युत्पन्नस्य पदेभ्य एव पदार्थस्मृति[1]संभवात्[2]पदस्मारितपदा[3]र्थानां संसर्गस्यैव वाक्यार्थत्वात्सूत्रकारे[4]णोपनिषत्तात्पर्यस्य निरूपितत्वाच्च व्यर्थः पृथग्व्याख्यारम्भ इत्याशङ्क्याऽऽह—विस्पष्टार्थेति । मन्दमतीनां स्वत एव निःशेषपदार्थस्मरणासंभवादुपनिषद्गतनिःशेषपदार्था[5]नां विशिष्य निःसंशयं ज्ञानं ये रोचयन्ते तेषामुपकारायेत्यर्थः ॥ १ ॥

नित्यान्यधिगतानि कर्माण्युपात्तदुरितक्षयार्थानि, काम्यानि च फलार्थिनां पूर्वस्मिन्ग्रन्थे ।

कर्मविचारेणैवोपनिषदो गतार्थत्वादुपनिषत्प्रयोजनस्य निःश्रेयसस्य कर्मभ्य एव संभवात्पृथग्व्याख्यारम्भो न युक्त इत्याशङ्कामपनेतुं कर्मकाण्डार्थमाह—नित्यानीति । “ अथातो धर्मजिज्ञासा ” इति जैमिनिना धर्मग्रहणेन सिद्धवस्तुविचारस्य पर्युदस्तत्वान्नोपनिषदो गतार्थत्वमित्यर्थः । तानि च कर्माणि संचितदुरितक्षयार्थानि “ धर्मेण पापमपनुदति” इति श्रुतेर्न निःश्रेयसार्थानि । न केवलं जीवतोऽवश्यकर्तव्यान्यधिगतानि फलार्थिनां काम्यानि च । न तान्यपि निःश्रेयसार्थानि । “स्वर्गकामः” “पशुकामः” इत्यादिवन्मोक्षकामोऽदः कुर्यादित्यश्रवणात् । अतः संसार एव कर्मणां फलमित्यर्थः ।

इदानीं कर्मोपादानहेतुपरिहाराय ब्रह्मविद्या प्रस्तूयते । कर्महेतुः कामः स्यात् । प्रवर्तकत्वात् । आप्तकामानां हि कामाभावे स्वात्मन्यवस्थानात्प्रवृत्त्यनुपपत्तिः । आत्मकामत्वे[8] चाऽऽप्तकामता । आत्मा हि ब्रह्म । तद्विदो हि परप्राप्तिं वक्ष्यति । अतोऽविद्यानिवृत्तौ स्वात्मन्यवस्थानं परप्राप्तिः । “अभयं प्रतिष्ठां विन्दते ” “ एतमानन्दमयमात्मानमुपसंक्रामति ” इत्यादिश्रुतेः[9] ।

कर्मकाण्डार्थमुक्त्वा तत्राविचारितमुपनिषदर्थमाह—इदानीमिति । कर्मणा[10]मुपादानेऽनुष्ठाने यो हेतुस्तन्निवृत्त्यर्थं ब्रह्मविद्याऽस्मिन्ग्रन्थ आरभ्यते[11] । अतः सनिदानकर्मोन्मूलनार्थत्वादुपनिषदः कर्मकाण्डविरुद्धत्वान्न गतार्थत्वमित्यर्थः । कर्मानुष्ठाने हेतुर्नियोगस्तस्य प्रमाणसिद्धत्वान्न विद्यया विरोध इत्याशङ्क्याऽऽह—कर्महेतुरिति । अस्येदं साधनमित्येतावच्छास्त्रेण बोध्यते । यस्य यत्राभिलाषः स तत्र प्रवर्तते कामत एव । अतो न नियोगस्य प्रवर्तक[त्व]संभावनाऽपीत्यभिप्रायः । सति कामे प्रवृत्तिरित्यन्वय उक्तः । कामाभावे न प्रवृत्तिरिति व्यतिरेकमाह—आप्तेति । अभिलषितविषयप्राप्तिः कामनिवृत्तौ

१ ञ. °र्थसंस्मृ° । २ क. ट. °त्पदैः संस्मा° । ख. ज. °त्पदैः स्मा° । ३ झ. °दार्थसं° । ४ झ. °रेणोप° । ५ ख. ग. च. ञ. झ. ट. °नां निर्विशि° । ६ ट. इतिव° । ७ घ. छ. ज. °तुनिवृत्त्यर्थं ब्र° । ८ ग. च. °त्वेनाऽऽप्त° । ९ ङ. °तेः । ननु का° । १० क. ख. ग. च. ज. झ. ठ. °र्मेण उपा° । ११ झ. प्रारभ्यते ।

हेतुः । न विद्या । अतः कथं कर्महेतुपरिहाराय विद्यारम्भ इत्याशङ्क्याऽऽह—आत्मकामत्वे[1] चेति । कामितविषयप्राप्त्या[2] कामस्य तात्कालिकोपशममात्रं न तूच्छेदः । पुनर्विषयाकाङ्क्षादि[3]दर्शनात् । आत्मकामेना[4]ऽपि निरङ्कुशाऽऽत्मैव वस्तु नान्यत्ततोऽस्तीत्येवंरूपाऽऽत्मकामत्वे सति भवति कामि[5]तेच्छाभावात् । आत्मनो ह्यद्वयानन्दरूपमजानन्नेव व्यतिरिक्तं विषयं पश्यन्कामयते । ततः कामस्याऽऽत्माविद्यामूलत्वादात्मविद्यैव तन्निवृत्तिहेतुरित्यर्थः । भवत्वात्मविद्या कामविरोधिनी कर्महेतुपरिहाराय ब्रह्मविद्या प्रस्तूयत इति कथमुक्तं तत्राऽऽह—आत्मेति । आनन्दमयं परमात्मानमादाय श्रुतिरुदाहृता ।

काम्यप्रतिषिद्धयोरनारम्भा[6]दारब्ध[7]स्य चोपभो[8]गेन क्षयान्नित्यानुष्ठानेन[9] प्रत्यवायाभावादयत्नत एव स्वा[10]त्मन्यवस्थानं मोक्षः । अथवा निरतिशया[11]याः प्रीतेः स्वर्गशब्दवाच्यायाः कर्महेतुत्वात्कर्मभ्य एव मोक्ष इति चेन्न । कर्मानेकत्वात् । अनेकानि ह्यारब्ध[12]फलान्यनारब्धफलानि चानेकजन्मान्तरकृतानि विरुद्धफलानि कर्माणि संभवन्ति । अतस्तेष्वनारब्धफलानामेकस्मिञ्जन्मन्युपभोगक्षयासंभवाच्छेषकर्मनिमित्तशरीरारम्भोपपत्तिः कर्मशे[13]षसद्भावसिद्धिश्च । "तद्य[14] इह रमणीयचरणाः" "ततः[15] शेषेण" इत्यादि[16]श्रुतिस्मृतिशतेभ्यः । इष्टानिष्टफलानामनारब्धानां क्षयार्थानि नित्यानीति चेन्न । अकरणे प्रत्यवायश्रवणात् । प्रत्यवायशब्दो ह्यनिष्टविषयः । नित्याकरणनिमित्तस्य प्रत्यवा[17]यस्य दुःखरूपस्याऽऽगामिनः परिहारार्थानि नित्यानीत्यभ्युपगमान्नानारब्धफलकर्मक्षयार्थानि । यदि नामानारब्धकर्मक्षयार्थानि नित्यानि कर्माणि तथाऽप्यशु[18]द्धमेव क्षपयेयुर्न[19] शुद्धम् । विरोधाभावात् । न हीष्टफलस्य कर्मणः शुद्ध[20]रूपत्वान्नित्यैर्विरोध उपपद्यते । शुद्धा[21]शुद्धयोर्हि विरोधो युक्तः ।

एवं तावत्कर्मकाण्डेनागतार्थत्वात्कर्मभ्योऽसंभाव्यमाननिःश्रेयसप्रयोजनत्वाच्चोपनिषदो व्याख्यारम्भं संभाव्य पुन[22]रनारम्भवादिनोऽभिप्रायमुद्भावति—काम्यप्रतिषिद्धयोरिति । आत्यन्तिकागामिशरीरानुत्पादे स्वरूपावस्थानं निःश्रेयसं, शरीरानुत्पादश्च हेत्वभावादेव

---

१ ग. च. °त्वेनेति । २ ख. ग. च. ज. °प्राप्तौ का° । ३ क. ख. ग. च. ञ. ट. °ङ्क्षाद° । ४ क. ख. झ. ट. °मताऽपि । ५ क. ख. ज. ट. कामयितव्याभावादेवाऽऽत्मानं प° । ६ ट. °म्भात्प्रार° । ७ ङ. °ब्धयोश्चोप° । ८ ख. ग. ङ. च. छ. ञ. झ. °भोगक्ष° । ९ ङ. °न च प्र° । १० क. ग. स्वात्माव° । ११ ङ. च. °शयप्री° । १२ ञ. °ब्धकर्मफ° । १३ घ. °षसंभव° । १४ क. °यदिह । १५ क. ङ. ञ. °तः कर्मशे° । १६ ञ °दिस्मृति° । १७ ङ. °यस्यासुखरू° । १८ ख. ग. च. °शुभमे° । १९ घ. °र्न पुनः शु° । २० ख. ग घ. ङ. च. छ. ञ. ट. शुद्धिरू° । २१ ग. ङ. छ. ट. शुद्धयशुद्धयोर्हि । २२ घ. छ. °नरार° ।

सेत्स्यति किं ज्ञानार्थोपनिषदारम्भेणेत्यर्थः । मतान्तरमाह—अथवेति । यदेव स्वर्गसाधनं ज्योतिष्टोमादि तदेव मोक्षसाधनं निरतिशयप्रीतेः । स्वर्गपदार्थस्य मोक्षादन्यत्रासंभवात्सति शरीरे क्लेशावश्यंभावादित्यर्थः । ऐकभविकपक्षमाद्यं मतं प्रत्याख्याति—नेत्यादिना । यद्यपि वर्तमाने देहे काम्यं प्रतिषिद्धं च नाऽऽरभेत मुमुक्षुस्तथाऽपि संचितस्यानेकस्य संभवाद्धेत्वभावोऽसिद्ध इत्यर्थः। प्रायेणानभिव्यक्तानि सर्वाण्येव कर्माणि संभूयैकं शरीरमारभन्ते तत्र सर्वेषामुपभोगेन क्षयि(पि)तत्वात्संचितं कर्मैव नास्तीतिशङ्कानिराकरणायोक्तम्-विरुद्धफलानीति । स्वर्गनरकफलानां ज्योतिष्टोमब्रह्महत्यादीनामेकस्मिन्देहे भोगेन क्षयासंभवात्प्रायेणास्य सर्वाभिव्यञ्जकत्वे प्रमाणाभावाद्बलवता प्रतिबद्धस्य दुर्बलस्यावस्थानं संभवतीत्यर्थः । संभावनामात्रमेतन्नात्र प्रमाणमस्तीत्याशङ्क्याऽऽह—कर्मशेषेति । प्रेत्य स्वकं कर्मानुभूय ततः शेषेण जन्म प्रतिपद्यन्त इति स्वर्गादवरोहतां कर्मशेषं(ष)सद्भावं दर्शयतीत्यर्थः । संचितकर्मसद्भावमङ्गीकृत्य देहान्तरारम्भो न भविष्यतीत्याह—इष्टेति । एतद्द्र(द्रा)ष्टानां सिद्धान्तविरुद्धमित्याह—नेति । मुमुक्षुणाऽनुष्ठितस्य नित्यादेः संचितकर्मक्षयार्थत्वाभ्युपगमेऽपि नाभिमतासिद्धिरित्याह—यदि नामेति ।

न च कर्महेतूनां कामानां ज्ञानाभावे निवृत्त्यसंभवादशेषकर्मक्षयोपपत्तिः । अनात्मविदो हि कामोऽनात्मफलविषयत्वात्स्वात्मनि च कामानुपपत्तिर्नित्यप्राप्तत्वात्स्वयं चाऽऽत्मा परं ब्रह्मेत्युक्तम् । नित्यानां चाकरणमभावस्ततः प्रत्यवायानुपपत्तिरिति । अतः पूर्वोपचितदुरितेभ्यः प्राप्यमाणायाः प्रत्यवायक्रियाया नित्याकरणं लक्षणमिति "अकुर्वन्विहितं कर्म" इति हि शतुर्नानुपपत्तिः ।

यच्चोक्तं " मुमुक्षुः काम्यानि वर्जयेत् " इति तदप्यसति विवेकबले दुर्घटम् । सति मूलाज्ञाने कामोद्भवस्य दुर्निवारत्वादित्याह—न च कर्महेतूनामिति । ननु कामो नाज्ञानमूलः । आत्मविदामपि कामदर्शनादित्यत आह—स्वात्मनि चेति । सर्वं आत्मेति पश्यतां तत्त्वतो विषयाभावादेव कामानुपपत्तिः । अशनादिप्रवृत्तिनिमित्तं तु कामाभास एव । वास्तवाभिनिवेशाभावादित्यर्थः । तेषामप्यर्चिरादिमार्गेण ब्रह्मप्राप्तेः कामनाऽस्तीति नाऽऽशङ्कनीयमित्याह—स्वयं चेति । यच्चोक्तमकरणनिमित्तप्रत्यवायपरिहारार्थानि नित्यानीति तत्राऽऽह—नित्यानां चेति । आगामि दुःखं प्रत्यवाय उच्यते । तस्य भावरूपस्य नाभावो निमित्तम् । " पापः पापेन " इति श्रुतेः । निषिद्धाचरणनिमित्तत्वाद्दुःखस्येत्यर्थः ।

---

१ ख. °र्थः । एक° । २ क. ख. ग. च. ज. झ. ट. स्वकर्मफलमनु° । ३ ज. झ. °यत इ° । ४ ज. झ. °हृणं कुर्वतां । ५ घ. ङ. छ. °तद्भाविनां ।

" अकुर्वन्विहितं कर्म निन्दितं च समाचरन् ।
प्रसज्जंश्चेन्द्रियार्थेषु नरः पतनमृच्छति " ॥

इति शतृप्रत्ययादकरणस्यापि प्रत्यवायनिमित्तत्वमवगतमित्याशङ्क्याऽऽह—अतः पूर्वेति । यदि यथावन्नित्यनैमित्तिकानुष्ठानमभविष्यत्तदा संचितदुरितक्षयोऽभविष्यत् । न चायं विहितमकार्षीदित्यतः प्रत्यवायो भविष्यतीति शिष्टैर्लक्ष्यते। यथा विचिकित्सञ्श्रोत्रिय इति । यतः शतृप्रत्ययस्यान्यथा व्युत्पन्नत्वान्न तद्बलादकरणे हेतुत्वमवगन्तुं शक्यत इत्यर्थः ।

अन्यथाऽभावाद्भावोत्पत्तिरिति सर्वप्रमाणव्याकोप इति । अतोऽयत्नतः स्वात्मन्यवस्थानमित्यनुपपन्नम् ।

ननु—लक्षणहेत्वोः क्रियाया इति शतृप्रत्ययस्योभयत्र विधाने सति किमिति हेतुत्वमेव न गृह्यते तत्राऽऽह—अन्यथेति । भावरूपस्य कार्यस्य भावरूपमेव कारणमिति प्रत्यक्षादिभिरवगतं, शतृप्रत्ययादभावस्य हेतुत्वाभिधाने सर्वप्रमाणविरोधः स्यादित्यर्थः। ननु त्वयाऽप्यकरणस्य प्रत्यवायलक्षकत्वमिष्टम् । भाट्टैश्चानुपलम्भस्याभावप्रमितिहेतुत्वमिष्यते । तार्किकैश्च प्रतिबन्धकाभावस्य तत्तत्प्रागभावस्य च तत्तत्कार्यव्यवस्थापकत्वमिष्यते । तत्कथं भावस्यैव कारणत्वम् । तदुक्तम्—" भावो यथा तथाऽभावः कारणं कार्यवन्मतम् " इति । उच्यते । अस्माभिस्तावदभावस्य स्वरूपेण कारणत्वं नेष्टम् । किंतु तज्ज्ञानस्य प्रत्यवायगमकत्वमिष्टम् । तेन च रूपेण न प्रत्यवायजनकत्वमिष्यते । नित्याकरणज्ञाने प्रत्यवायाभावप्रसङ्गात् । भाट्टानामपि च केषांचिज्ज्ञानस्य योग्यानुपलम्भस्याभावप्रमितिहेतुत्वसंमतया तु प्रमितिहेतुत्वेऽभावप्रमायाः प्रत्यक्षत्वापातः । तार्किकाणामपि प्रतिबन्धकाभावस्य कारणत्वेऽन्योन्याश्रयत्वप्रसङ्गान्न प्रामाणिकत्वम् । प्रागभावस्यापि ज्ञातरूपेण जन्यज्ञापकत्वमेव । यस्मादिदं प्राङ्नाऽऽसीत्तस्मादिदानीं जातमिति । न तु जनकत्वं प्रागभावस्य नियतप्राग्भावित्वेन कारणत्वे प्राक्कालस्य स्ववृत्तितापातः । प्राग्भावित्वमपि चान्यथासिद्धमित्युक्तं तत्त्वालोके । यस्मादकरणनिमित्तप्रत्यवायपरिहारार्थं न नित्यं कर्म किं तु " कर्मणा पितृलोकः । सर्व एते पुण्यलोका भवन्ति " इति श्रुतेः पितृलोकप्राप्तिफलम् , तस्मान्न यथोक्तचरितस्य शरीरानुत्पाद इत्याह—अयत्नत इति ।

---

१ क. ख. ग. च. ज. झ. ट. °पि न प्र° । २ क. ख. ग. ञ. ट. °र्षीदतः । ३ क. ख. ग. च. झ. ट. °वायी भ° । ४ ख. ग. च. °थाऽवि° । ५ क. ख. ग. ञ. ट. °थाऽप्युपपन्न° । ६ ख. ग. घ. ङ. च. छ. ञ. °णको° । ७ क. ख. ग. ञ. ट. °वधारितं । ८ क °णत्वं कथमि° । ९ घ. ङ. झ. °रणं ने° । १० झ. °यासंभव° । ११ क. ख. ग. च. झ. ट. °तुत्ववत्तया । १२ क. ख. ग. घ. च. ञ. झ. ट. °जन्मज्ञा° । १३ झ. °पि नान्य° ।

यच्चोक्तं निरतिशयप्रीतेः स्वर्गशब्दवाच्यायाः कर्मनिमित्तत्वात्कर्मारभ्य[1] एव मोक्ष इति । तन्न । नित्यत्वान्मोक्षस्य । न हि नित्यं किंचिदारभ्यते । लोके यदारब्धं तदनित्यमिति । अतो न कर्मारब्धो[2] मोक्षः । विद्यासहितानां कर्मणां नित्यारम्भसामर्थ्यमिति चेन्न । विरोधात् । नित्यं चाऽऽरभ्यत इति[3] विरुद्धम् । यद्धि[4] नष्टं तदेव[5] नोत्पद्यत इति । प्रध्वंसाभाववन्नित्योऽपि मोक्ष आरभ्य एवेति[6] चेन्न । मोक्षस्य भावरूपत्वात् । प्रध्वंसाभावोऽप्यारभ्यत इत्यभावस्य विशेषाभावाद्विकल्पमात्रमेतत् । भावप्रतियोगी ह्यभावः ।

द्वितीयमतमनूद्य दूषयति—यच्चोक्तमित्यादिना । विद्यासहितेनापि कर्मणाऽऽरम्भश्चेन्मोक्षस्तर्ह्य[8]नित्य एव । यत्कृतकं तदनित्यमिति व्याप्तिदर्शनादित्युक्तं तत्र व्याप्तिभङ्गं मन्वानः शङ्कते—यद्विनष्टमिति[7] । भावरूपत्वादिति । यद्भावरूपं कार्यं तदनित्यमिति व्याप्तेस्तव च मोक्षस्य निरतिशयप्रीतेर्भावत्वादनित्यत्वं स्यादेवेत्यर्थः । प्रध्वंसाभावस्य कार्यत्वमभ्युपगम्य यत्प्रध्वंसातिरिक्तकार्यं तदनित्यमिति व्याप्तिर्व्याख्यातेव[9] । वस्तुतस्तु[10] प्रध्वंसस्य कार्यत्वमपि नास्तीत्याह—प्रध्वंसेति । जन्याश्रयत्वं तावत्प्रध्वंसस्य । न कार्यत्वम् । जनेर्नैरुक्तैर्भा(क्ते भा)वविकारत्वाभ्युपगमात् । नापि प्रागसतः सत्तासमवायादिलक्षणम् । तदनभ्युपगमात् । नाप्युत्तरकालयोगः । कालेन संबन्धाभावात् । अवच्छेदा[11]वच्छेदकभावस्य[12] समवायमूलत्वात्संबन्धान्तरमूलकत्वदर्शनादुत्तरकालस्य प्रध्वंसावच्छेदकत्वं स्वभावश्चेदन्यावच्छेदकत्वं स्वभावो न स्यात् । तस्मादभावस्य निर्विशेषकत्वात्कार्यत्वं कल्पनामात्रपरमिति भावः । किंच, अभावस्याभावविशेषमात्रस्वभावत्वाद्भावविरोधित्वाच्च न भावरूपो धर्मः संभवतीत्याह—भावेति ।

यथा ह्यभिन्नोऽपि भावो घटपटादिभिर्विशेष्यते । अभिन्न एव घटभावः पटभाव इत्येवं निर्विशेषो[13] भावाभावः क्रियागुणयोगाद्द्रव्यादिवद्विकल्प्यते । न ह्यभाव उत्पलादिवद्विशेषणसहभावी[14] । विशेषणवत्त्वे[15] भाव एव स्यात् । विद्याकर्मकर्तृनित्यत्वाद्विद्याकर्मसंतानजनितमोक्षनित्यत्वमिति चेन्न । गङ्गास्रोतोवत्कर्तृत्वस्य दुःखरूपत्वात् । कर्तृत्वोपरमे च मोक्षविच्छेदात् । तस्मादविद्याकामकर्मोपादानहेतुनिवृत्तौ स्वात्मन्यवस्थानं मोक्ष इति । स्वयं चाऽऽत्मा

---

१ ङ. छ. ञ. ट. °रभ्य ए° । २ क. ख. ग. घ. ङ. च. छ. ञ. ठ. °रभ्यो मो° । ३ क. ख. ग. घ. ङ. च. ञ. °ति च वि° । ४ क. ख. ग. च. °यद्धि न° । ५ क. °व च नो° । ६ घ. ङ. ज. झ. एव चे° । ७ क. ख. च. ज. झ. यद्धि न° । ८ ख. ग. ञ. °स्तद्वन्मोक्ष° । ९ क. ख. ग. च. झ ट. ख्याता । व° । १० क. ख. ग. च. ज. ट. °व । परमार्थतस्तु प्र° । ११ क. ख. ग. ज. झ. ट. °च्छेद्याव° । १२ क. ख. ग. च. झ. ट. °स्य संबन्धस° । १३ क. ख. ग. घ. ञ. ट. °षोऽपि भा° । ङ. °षोऽप्यभा° । १४ क °वत्सहभावी विशेषणेन वि° । १५ ङ. °णसहवर्तित्वे भा° ।

ब्रह्म तद्विज्ञानादविद्यानिवृत्तिर्मोक्ष इति ब्रह्मविद्यार्थोपनिषदारभ्यते ।

ननु—अभावश्चतुर्विधः । तत्रानित्यः प्रागभावः । प्रध्वंसादयस्तु नित्याः । ततः कथं निर्विशेषत्वमित्याशङ्क्याऽऽह—**यथा हीति**[1] । भावप्रत्ययस्यैकाकारत्वादेक एवं भावाभाव(वोऽव)च्छेदकभेदाद्भिन्न इव प्रकाशते । तथा निषेधप्रत्ययस्यैकाकारत्वादेक एवाभावोऽवच्छेदकभेदाद्भिन्न इव प्रकाशते । जायते नश्यति चेति क्रियायोगात्संख्या-गुणयोगाद्द्रव्यवदभावो विकल्प्यते । न तु तत्त्वतः सविशेष इत्यर्थः । इतश्च न तत्त्वतः सविशेष इत्याह—**न हीति** । विशेषणं हि विशेष्यान्वयि प्रसिद्धम् । प्रतियोगिना च विशेषणेन नाभावस्य सहभावोऽस्ति । घटप्रध्वंसस्य नित्यत्वे घटस्यापि नित्यत्वप्रसङ्गात् । घटसहभावित्वे च तदभावत्वव्याघाताद्भावाभावयोः सहानवस्थानरूपविरोधाभ्युपगमात् । ततः प्रतियोगिविशेषादभावः सविशेषः कार्यत्वादिधर्मवानिति विभ्रममात्रमित्यर्थः । एवं प्रध्वंसदृष्टान्तेन शङ्कितं नित्यत्वं परिहृत्य प्रकारान्तरेणाऽऽशङ्क्य निषेधति—**विद्याक-र्मेत्यादिना** । विद्याकर्मणोः कर्ता नित्य इति साधनसांतत्यात्साध्यसांतत्यं न वाच्यम् । कर्तृत्वस्यानुपरमेऽनिर्मोक्षप्रसङ्गादुपरमे च साधनसांतत्याभावान्मोक्षस्य विच्छित्तिः स्यादित्यर्थः । यस्मान्निःश्रेयसं ब्रह्मज्ञानं विना दुष्प्रापं तस्मादित्युपसंहारः ।

उपनिषदिति विद्योच्यते । तच्छीलिनां गर्भजन्मजरादिनिशातनात्तदवसा-दनाद्वा ब्रह्मणो वोपनिगमयितृत्वादुपनिषण्णं वाऽस्यां परं श्रेय इति । तदर्थ-त्वाद्ग्रन्थोऽप्युपनिषत् ।

ब्रह्मविद्यायामुपनिषच्छब्दप्रसिद्धिरपि विद्याया एव निःश्रेयससाधनत्वे प्रमाणमित्याह—**उपनिषदिति** । निशातनाच्छिथिलीकरणादित्यर्थः । अस्यां विद्यायां निमित्तभूतायां परं श्रेयो ब्रह्म जीवस्योपनिषण्णमात्मतयोपस्थितं भवतीत्यर्थः ।

हरिः ॐ ।

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा ।

शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः ।

शं सुखं प्राणवृत्तेरहश्चाभिमानी देवतात्मा मित्रो नोऽस्माकं भवतु । तथै-

---

१ क. ख. ग. घ. ज. ट. °ति । विधिप्र° । २ क. ख. ग. ज. झ. ट °व भावो यथा भा° । ३ ग. घ. झ. °वेदाभिन्न° । ४ ख. ग. च. ट. °ह्व° । ५ क. ख. ग. च. झ. ट. °शङ्क्य नि° । ६ क. झ. ट. °मसातत्या° ।

वापानवृत्ते रात्रेश्चाभिमानी देवतात्मा वरुणः । चक्षुष्यादित्ये चाभिमान्यर्यमा । बल इन्द्रः । वाचि बुद्धौ च बृहस्पतिः । विष्णुरुरुक्रमो विस्तीर्णक्रमः पादयोरभिमानी । एवमध्यात्मदेवताः । शं नो भवत्विति सर्वत्रानुषङ्गः । तासु हि सुखकृत्सु विद्याश्रवणधारणोपयोगा अप्रतिबन्धेन भविष्यन्तीति तत्सुखकर्तृत्वं प्रार्थ्यते—शं नो भवत्विति ।

एवमुपनिषदां व्याख्यारम्भं संभाव्य प्रतिपदव्याख्यामारभते—शं सुखमित्यादिना । शं नो भवत्विति । सुखकृद्भवत्वित्यर्थः । अध्यात्मप्राणकरणाभिमानिनीनां देवतानां सुखकर्तृत्वं किमिति प्रार्थ्यते तत्राऽऽह—तासु हीति । श्रवणं गुरुपादोपसर्पणपूर्वकं वेदान्तानां तात्पर्यावधारणम् । धारणं श्रुतस्याप्यविस्मरणम् । उपयोगः शिष्येभ्यो निवेदनम् ।

नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ।

ॐ शान्तिः शान्तिः शान्तिः ॥

सत्यं वदिष्यामि पञ्च च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि शीक्षाध्याये प्रथमोऽनुवाकः ॥ १ ॥

ब्रह्म विविदिषुणा नमस्कारवन्दनक्रिये वायुविषये ब्रह्मविद्योपसर्गशान्त्यर्थं क्रियेते । सर्वक्रियाफलानां तदधीनत्वाद्ब्रह्म वायुस्तस्मै ब्रह्मणे नमः । प्रह्वीभावं करोमीति वाक्यशेषः । नमस्ते तुभ्यं हे वायो । नमस्करोमीति परोक्षप्रत्यक्षाभ्यां वायुरेवाभिधीयते । किंच त्वमेव चक्षुराद्यपेक्ष्य बाह्यं संनिकृष्टमव्यवहितं प्रत्यक्षं ब्रह्मासि यस्मात्तस्मात्त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं यथाशास्त्रं यथाकर्तव्यं बुद्धौ सुपरिनिश्चितमर्थं

---

१ घ. °श्चेरभि° । २ ख. ङ. च. °नमाधाध्या° । ३ ख. ग. ङ. झ. °षदो व्या° । ४ क. ख. ग. च. झ. °पदं व्या° । ५ क. ख. ग. च. ज. ट. °कृत्त्वं किं° । ६ क. ख. ज. झ. °ह्मविद्याविविदि° ।

तदपि त्वदधीनत्वात्त्वामेव वदिष्यामि । सत्यमिति वाक्कायाभ्यां संपाद्यमानः सोऽपि त्वदधीन एव संपाद्य इति त्वामेव सत्यं वदिष्यामि । तत्सर्वात्मकं वाय्वाख्यं ब्रह्म मयैव स्तुतं सन्मां विद्यार्थिनमवतु विद्यासंयोजनेन । तदेव ब्रह्म वक्तारमाचार्यं वक्तृत्वसामर्थ्यसंयोजनेनावतु । मामवतु वक्तारमिति पुनर्वचनमादरार्थम् । ॐ शान्तिः शान्तिः शान्तिरिति त्रिर्वचनमाध्यात्मिकाधिभौतिकाधिदैविकानां विद्याप्राप्त्युपसर्गाणां प्रशमार्थम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्यायभाष्ये प्रथमोऽनुवाकः ॥ १ ॥

अन्यद्ब्रह्म वायुश्चान्य इति नाऽऽशङ्कनीयमित्याह—परोक्षेति । ब्रह्मेति परोक्षेण स ब्रह्मेत्याचक्षत इति श्रुतेः । वायुशब्देन च प्रत्यक्षतया निर्देशः । प्राणस्य प्रत्यक्षत्वादित्यर्थः । यद्यपि सूत्रात्मरूपेण वायुः परोक्षस्तथाऽप्याध्यात्मिकप्राणवायुरूपेण ब्रह्मशब्दवाच्यत्वेऽप्यपरोक्षत्वमित्याह—किंचेति । बाह्यं चक्षुरादि रूपदर्शनाद्यनुमेयत्वाद्व्यवहितम् । प्राणस्त्वव्यवधानेन साक्षिवेद्यः संनिहितश्च भोक्तुरिति चक्षुराद्यपेक्षया प्रत्यक्ष इत्यर्थः । बृंहणाद्ब्रह्म । प्राणकृतेन श्वसनादिना शरीरादेर्बृंहणं प्रसिद्धमित्यर्थः । यथा राज्ञो दौवारिकं कश्चिद्राजदिदृक्षुराह त्वमेव राजेति तथा हार्दस्य ब्रह्मणो द्वारपं प्राणं हार्दं ब्रह्म दिदृक्षुर्मुमुक्षुराह—त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामीति । ब्रह्मवदनक्रिया प्राणदेवतास्तुत्यर्था । स्तुत्यन्तरमाह—ऋतमित्यादिना ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां शीक्षाध्याये प्रथमोऽनुवाकः ॥ १ ॥

अथ शीक्षाध्याये द्वितीयोऽनुवाकः ।

ॐ शीक्षां व्याख्यास्यामः । वर्णः स्वरः । मात्रा बलम् । साम संतानः । इत्युक्तः शीक्षाध्यायः (१)॥

शीक्षां पञ्च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि शीक्षाध्याये द्वितीयोऽनुवाकः ॥ २ ॥

---

१ क. ख. ञ. ट ब्रह्मण इ° । २ क. ख. ग. च. ज. झ. ट. °णाङ्क° ।

अर्थज्ञानप्रधानत्वादुपनिषदो ग्रन्थपाठे यत्नोपरमो मा भूदिति शीक्षाध्याय आरभ्यते—शिक्षा शिक्ष्यतेऽनयेति वर्णाद्युच्चारणलक्षणम् । शिक्ष्यन्त इति वा शिक्षा वर्णादयः । शिक्षैव शीक्षा । दैर्घ्यं छान्दसम् । तां शीक्षां व्याख्यास्यामो विस्पष्टमा समन्तात्कथयिष्यामः । चक्षिङो वा ख्याञादिष्टस्य व्याङ्पूर्वस्य व्यक्तत्वाक्कर्मण(वाक्क)र्मण एतद्रूपम् । तत्र वर्णोऽकारादिः । स्वर उदात्तादिः । मात्रा ह्रस्वाद्याः । बलं प्रयत्नविशेषः । साम वर्णानां मध्यमवृत्त्योच्चारणं समता । संतानः संततिः । संहितेत्यर्थः । एष हि शिक्षितव्योऽर्थः । शिक्षा यस्मिन्नध्याये सोऽयं शीक्षाध्याय इत्येवमुक्त उदित उक्त इत्युपसंहार उत्तरार्थः ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्यायभाष्ये द्वितीयोऽनुवाकः ॥ २ ॥

यत्नोपरम इति । स्वरोष्मव्यञ्जनप्रमादो मा भूदित्यर्थः । अन्यथा विवक्षितार्थसिद्धिरेव न स्यात् ।

तदुक्तम्—

"मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" इति ॥

लक्षणमिति । लक्षणं शास्त्रम् । ऋटुरषाणां मूर्धा, इचुयशानां तालुरित्यादि । तस्यान्यत्रैव सिद्धत्वादिह कर्मव्युत्पत्तिरेव शिक्षाशब्दस्य ग्राह्या । [रूपमिति] । "चक्षिङः ख्याञ्" "वा लिटि" इति सूत्रेण ख्याञादिष्टो यस्तस्येदं रूपं न "ख्या प्रकथने" इत्यस्य, सोपसर्गस्य प्रयोगानभिधानादित्यर्थः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां शीक्षाध्याये द्वितीयोऽनुवाकः ॥ २ ॥

अथ शीक्षाध्याये तृतीयोऽनुवाकः ।

सह नौ यशः । सह नौ ब्रह्मवर्चसम् ।

अधुना संहितोपनिषदुच्यते । तत्र संहिताद्युपनिषत्परिज्ञाननिमित्तं यद्यशः

---

१ ङ. °न्तात्प्रकल्पयि° । २ क. ख. ग. ङ. च. छ. ट. °त्वाद्वाक्कर्म° । ३ ख. ग. च. ञ. °ज्ञनादिप्र° । ४ क. ग. च. ञ. झ. ट. °भूत् । अ° । ५ ग. च. तदर्थ° । ६ क ख. ग. च. ञ. ट. °थन एतस्य सो° ।

प्रार्थ्यते[1] तस्मादावयोः शिष्याचार्ययोः सहैवास्तु । तन्निमित्तं च यद्ब्रह्मवर्चसं तेजस्तच्च सहैवास्त्विति शिष्यवचनमाशीः । शिष्यस्य ह्यकृतार्थत्वात्प्रार्थनोपपद्यते नाऽऽचार्यस्य । कृतार्थत्वात् । कृतार्थो ह्याचार्यो नाम भवति ।

संहिता वर्णानां संनिकर्षस्तद्विषयमुपासनं प्रथमं कथ्यत[2] इत्याह—अधुनेति । संनिधानाच्च स्वशाखा[3]संहितैव ग्राह्या । शं नो मित्र इत्या[4]शीर्वादः कृत्स्नोपनिषच्छेषः । संहितोपनिषच्छेषमाशीर्वादान्तरमाह—तत्रेति ।

अथातः सꣳहिताया उपनिषदं व्याख्यास्यामः ।
पञ्चस्वधिकरणेषु । अधिलोकमधिज्यौतिषमधिविद्यमधिप्रजमध्यात्मम् । ता महासꣳहिता इत्याचक्षते । अथाधिलोकम् । पृथिवी पूर्वरूपम् । द्यौरुत्तररूपम् । आकाशः संधिः (१)॥

अथानन्तरमध्ययनलक्षणविधानस्य यतोऽत्यर्थं ग्रन्थभाविता बुद्धिर्न शक्यते सहसाऽर्थज्ञानविषयेऽवतारयितुमित्यतः संहिताया उपनिषदं संहिताविषयं दर्शनमित्येतद्ग्रन्थसंनिकृष्टामेव व्याख्यास्यामः । पञ्चस्वधिकरणेष्वाश्रयेषु ज्ञानविषयेष्वित्यर्थः । कानि तानीत्याह—अधिलोकं लोकेष्वधि यद्दर्शनं तदधिलोकम् । तथाऽधिज्यौतिषमधिविद्यमधिप्रजमध्यात्ममिति । ता एताः पञ्चविषया उपनिषदो लोकादिमहावस्तुविषयत्वात्संहिताविषयत्वाच्च महत्यश्च ताः संहिताश्च[5] महासंहिता इत्याचक्षते कथयन्ति[6] वेदविदः[7] । अथ तासां यथोपन्यस्तानामधिलोकं दर्शनमुच्यते । दर्शनक्रमविवक्षार्थोऽथशब्दः सर्वत्र । पृथिवी पूर्वरूपं पूर्वो वर्णः पूर्वरूपम् । संहितायाः पूर्वे वर्णे पृथिवीदृष्टिः कर्तव्येत्युक्तं भवति । तथा चोत्तररूपमाकाशोऽन्तरिक्षलोकः । संधिर्मध्यं पूर्वोत्तररूपयोः संधीयेते अस्मिन्पूर्वोत्तररूपे इति ॥

---

१ क. ख. ग. च. छ. ञ. ट. ड. प्राप्यते । २ च. कल्प्यत । ३ ख. ग. च. ञ. °खासंनिहितै° । ४ क. ख. ग. च. ञ. ट. °त्याद्या आशीर्वादाः कृ° । ५ क. ख. ग. घ. ङ. च. छ. ञ. ड. °श्च ता म° । ६ घ. °न्ति वेदब्रह्मोव° । छ. ट. °न्ति ब्रह्मवि° । ७ ङ. °दः । दर्शनक्रमविषयोऽथशब्दः । अ° ।

वस्तूपासनं हित्वा प्रथमतः शब्दोपासनविधाने हेतुरतःशब्देनोक्त इत्याह—यतोऽ-त्यर्थमिति । पञ्चस्विति सप्तमी तृतीयार्थे विपरिणेया । अधिकरणशब्दश्च विषयपर्यायः । पञ्चभिः पदार्थैर्विशेषितं ज्ञानं वर्णेषु वक्तव्यम् । यथा विष्णुदर्शन(नं) प्रतिमायामित्यर्थः । लोकेष्वधीति । लोकानधिकृत्योपादाय ध्येयत्वमित्यर्थः । विद्याशब्देन विद्याप्रतिबद्ध आचार्यादिर्विवक्षितः । तथैव प्रजाशब्देन प्रजाप्रतिबद्धः पित्रादिर्विवक्षितः । अध्यात्म-मिति । आत्मानं भोक्तारमधिकृत्य यद्वर्तते जिह्वादि तद्विवक्षितम् । सर्वत्र तत्तदभिमा-निनी देवतैव ग्राह्या । अन्यस्योपास्यत्वासंभवादिति । विधिशेषमर्थवादमाह—ता एता इति । संहितोपनिषदः कर्तव्या इत्युत्पत्तिविधिरुक्तः । कथं कर्तव्या इत्याकाङ्क्षायां विनियोगविधिमाह—अथ तासामित्यादिना । कर्तुरेकत्वादनुष्ठेयानां बहुत्वादवश्यंभा-विनि क्रमे विशेषनियमार्थोऽथशब्दः ।

वायुः संधानम् । इत्यधिलोकम् । अथाधि-ज्यौतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्त-ररूपम् । आपः संधिः । वैद्युतः संधानम् । इत्यधिज्यौतिषम् । अथाधिविद्यम् । आचार्यः पूर्वरूपम् (२) । अन्तेवास्युत्तररूपम् । विद्या संधिः । प्रवचनं संधानम् । इत्यधिविद्यम् । अथाधिप्रजम् । माता पूर्वरूपम् । पितोत्तररू-पम् । प्रजा संधिः । प्रजननं संधानम् । इत्य-धिप्रजम् (३) । अथाध्यात्मम् । अधरा हनुः पूर्वरूपम् । उत्तरा हनुरुत्तररूपम् । वाक्संधिः । जिह्वा संधानम् । इत्यध्यात्मम् ।

१ क. ख. ग. घ. च. ट. °षु कर्तव्यम् । २ क. ख. ग. च. ज. ट. °यत्वं नेत्य° । ३ ख. ङ. छ. ञ. °त्य यो वर्तते जिह्वादिः स विवक्षितः । स° । ४ ख. ग. च. ट. क्रमवि° । ५ क. ख. ग. च. ज. ट. °मार्था अथशब्दाः ।

वायुः संधानम् । संधीयतेऽनेनेति संधानम् । इत्यधिलोकं दर्शनमुक्तम् । थाधिज्यौतिषमित्यादि समानम् ।

इतीमा महासꣳहिताः । य एवमेता महासꣳहिता व्याख्याता वेद । संधीयते प्रजया पशुभिः । ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन (४) ॥

संधिराचार्यः पूर्वरूपमित्यधिप्रजं लोकेन ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि शीक्षाध्याये तृतीयोऽनुवाकः ॥ ३ ॥

इतीमा इत्युक्ता उपप्रदर्श्यन्ते । यः कश्चिदेवमेता महासंहिता व्याख्याता वेदोपास्ते । वेदेत्युपासनं स्याद्विज्ञानाधिकारात् " इति प्राचीनयोग्योपास्स्व " इति च वचनात् । उपासनं च यथाशास्त्रं तुल्यप्रत्ययसंततिरसंकीर्णा चातत्प्रत्ययैः शास्त्रोक्तालम्बनविषया च । प्रसिद्धश्चोपासनशब्दार्थो लोके गुरुमुपास्ते (स्ते), राजानमुपास्त इति । यो हि गुर्वादीन्संततमुपचरति स उपास्त इत्युच्यते। स च फलमाप्नोत्युपासनस्य । अतोऽत्रापि च य एवं वेद संधीयते प्रजादिभिः स्वर्गान्तैः प्रजादिफलान्याप्नोतीत्यर्थः ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषच्छिक्षाध्यायभाष्ये तृतीयोऽनुवाकः ॥ ३ ॥

" हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः " इतिवदुपप्रदर्श्यन्ते । विकारविधिप्रदर्शनाय यथा दर्शादयः षड्यागाः समुच्चिताः फलसाधनमधिकारांशोभेदात्, तथा पञ्चोपनिषदः समुच्चिताः प्रजादिफलकामस्यानुष्ठेया इत्याह— यः कश्चिदित्यादिना । फलकामिनाऽनुष्ठीयमानं संहितोपासनं कामितफलाय भवति । फलानभिसंधिना त्वनुष्ठीयमानं ब्रह्मविद्यार्थं भवति । मेधाहीनेन ब्रह्मणोऽवगन्तुमशक्यत्वान्मेधाकामस्य जपोऽपि ब्रह्मविद्यार्थो भवति । श्रीविहीनेन सत्त्वशुद्ध्यर्थं यागाद्यनु-

१ ङ. झ. °र्णा च । अतस्तत्प्र° । २ क. ख. ग. °त्यया शा° । ३ ङ. °सिद्धो ह्युपा° । ४ घ. ट. लोकं । ५ ख. क. छ. म. °वक्षथ ।

[1]ध्रातुं न शक्यत इति श्रीकामस्य होमोऽपि परम्परया ब्रह्मविद्योपयोगीति महत्तात्पर्यं विद्यासंनिधिसमाम्नातानां सर्वत्र द्रष्टव्यम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पूज्यपादशिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां शीक्षाध्याये तृतीयोऽनुवाकः ॥ ३ ॥

अथ शीक्षाध्याये चतुर्थोऽनुवाकः ।

यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्संबभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । शरीरं मे विचर्षणम् ।

यश्छन्दसामिति । मेधाकामस्य श्रीकामस्य च तत्प्राप्तिसाधनं जपहोमावुच्येते "स मेन्द्रो मेधया स्पृणोतु" "ततो मे श्रियमावह" इति च लिङ्गदर्शनात् । यश्छन्दसां वेदानामृषभ इवर्षभः । प्राधान्यात् । विश्वरूपः सर्वरूपः सर्ववाग्व्याप्तेः, "तद्यथा शङ्कुना" इत्यादिश्रुत्यन्तरात् । अत एवर्षभत्वमोंकारस्य । ओंकारो ह्यत्रोपास्य इति ऋषभादिशब्दैः स्तुतिर्न्याय्यैवोंकारस्य । छन्दोभ्यो वेदेभ्यो वेदा ह्यमृतं तस्मादमृतादधिसंबभूव । लोकदेववेदव्याहृतिभ्यः सारिष्ठं जिघृक्षोः प्रजापतेस्तपस्यत ओंकारः सारिष्ठत्वेन प्रत्यभादित्यर्थः । न हि नित्यस्योंकारस्याञ्जसैवोत्पत्तिरेव[2] कल्प्यते । स एवंभूत ओंकार इन्द्रः सर्वकामेशः परमेश्वरो मा मां मेधया प्रज्ञया स्पृणोतु प्रीणयतु बलयतु वा । प्रज्ञाबलं हि [3]प्रार्थ्यते । अमृतस्यामृतत्वहेतुभूतस्य ब्रह्मज्ञानस्य तदधिकारात्, हे देव धारणो धारयिता भूयासं भवेयम् । किंच शरीरं मे मम विचर्षणं विचक्षणं योग्यमित्येतत् । भूयादिति प्रथमपुरुषविपरिणामः ।

अवान्तरतात्पर्यमभिप्रेत्याऽऽह—यश्छन्दसामित्यादिना । संबभूवेति जन्मवाचके पदे श्रूयमाणे किमिति "प्रजापतिर्लोकानभ्यतपत्" इत्यादिश्रुत्यन्तरानुसारेणा[4]ऽऽत्मज्ञा-

---

१ क. ख. ग. च. ज. ट. °ध्रातुमशक्यत्वादिति । २ छ. ज. झ. °त्तिरिव । ३ ज. झ. प्रार्थयते ।
४ क. ख. ग. च. °रेण कार्यश्रेष्ठत्वेनाऽऽत्म° ।

नयोग्यकार्यश्रेष्ठत्वेन प्रतिभानं व्याख्यायते तत्राऽऽह—न हीति । पुरुषविपरिणाम इति । भूयासमित्युत्तमपुरुषस्य प्रकृतस्य प्रथमपुरुषत्वेन विपरिणामः कर्तव्य इत्यर्थः ।

जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि-
विश्रुवम् । ब्रह्मणः कोशोऽसि मेधया
पिहितः । श्रुतं मे गोपाय । आवहन्ती
वितन्वाना (१) । कुर्वाणाऽचीरमात्मनः ।

जिह्वा मे मधुमत्तमा मधुमत्यतिशयेन मधुरभाषिणीत्यर्थः । कर्णाभ्यां श्रोत्राभ्यां भूरि बहु विश्रुवं व्यश्रवं (?)[1] श्रोता भूयासमित्यर्थः । आत्मज्ञानयोग्यः कार्यकारणसंघातोऽस्त्विति वाक्यार्थः । मेधा च तदर्थमेव हि प्रार्थ्यते । ब्रह्मणः परमात्मनः । कोशोऽसि । असेरिवोपलब्ध्यधिष्ठानत्वात् । त्वं हि ब्रह्मणः प्रतीकं त्वयि ब्रह्मोपलभ्यते । मेधया लौकिकप्रज्ञया पिहित आच्छादितः स त्वं सामान्यप्रज्ञैरविदिततत्त्व[2] इत्यर्थः । श्रुतं श्रवणपूर्वकमात्मज्ञानादिकं[3] मे गोपाय रक्ष । तत्प्राप्त्यविस्मरणादि कुर्वित्यर्थः[4] । जपार्था एते मन्त्रा मेधाकामस्य[5] । होमार्थास्त्वधुना श्रीकामस्य मन्त्रा उच्यन्ते । आवहन्त्यानयन्ती । वितन्वाना विस्तारयन्ती । तनोतेस्तत्कर्मत्वात् । कुर्वाणा निर्वर्तयन्ती[6] । अचीरमचिरं क्षिप्रमेव[7] । छान्दसो दीर्घः । चिरं वा कुर्वाणा[8] ।

अचेतनशब्दं प्रति प्रार्थना कथं, कथं चेन्द्रशब्देनाभिधानमित्याशङ्क्य ब्रह्माभेदविवक्षयेत्यभिप्रेत्याऽऽह—ब्रह्मण इति । ब्रह्माभेदेन प्रार्थितदाने समर्थश्चेदोंकारः किमिति सर्वैर्नोपास्यत इत्याशङ्क्याऽऽह—मेधयेति । लौकिकप्रज्ञयेति । शालग्रामादिष्वपि[9] देवताबुद्धिरित्यर्थः[11] । नैतेष्वार्षेयादि मृग्यम्[10] । ब्राह्मणोत्पन्नत्वात् ।

वासांसि मम गावश्च । अन्नपाने च सर्वदा ।
ततो मे श्रियमावह । लोमशां पशुभिः सह

१ ख. ग. च. ङ. ट. °वं व्यश्र(विश्रु)वमित्यत्राडभावश्छान्दसः । झटिति श्रो° । २ ख. ग. घ. ङ. °ततत्त्व । ३ ङ. °त्मविज्ञानं मे । ४ ङ. °दिना कु° । ५ क. ख. ग. घ. च. छ. ञ. ट. °स्य । होमार्थास्त्वधुनोच्यन्ते मन्त्राः । आ° । ६ ङ. 'ना म° । ७ छ. °यन्त्यात्मनः । अ° । ८ क. ग. घ. च. छ. ञ. ट. °व । चि° । ९ क. ग. घ. ङ. °दिष्विव दे° । ११ क. ख. ग. 'बुद्धेरि° । १० ग. च. ट. ठ. °म् । ब्रह्म° ।

स्वाहा । आ मा यन्तु ब्रह्मचारिणः स्वाहा । वि माऽऽयन्तु ब्रह्मचारिणः स्वाहा । प्र माऽऽयन्तु ब्रह्मचारिणः स्वाहा । दमायन्तु ब्रह्मचारिणः स्वाहा । शमायन्तु ब्रह्मचारिणः स्वाहा (२) ।

आत्मनो मम, किमित्याह— वासांसि वस्त्राणि मम गावश्च गाश्चेति यावत् । अन्नपाने च सर्वदैवमादीनि कुर्वाणा श्रीर्या तां ततो मेधानिर्वर्तनात्परमावहाऽऽनय । अमेधसो हि श्रीरनर्थायैवेति । किंविशिष्टाम् । लोमशामजाव्यादियुक्तामन्यैश्च पशुभिः संयुक्तामावहेत्यधिकारादोंकार एवाभिसंबध्यते । स्वाहा, स्वाहाकारो होमार्थमन्त्रान्तज्ञापनार्थः । आयन्तु मामिति व्यवहितेन संबन्धः । ब्रह्मचारिणो वि माऽऽयन्तु प्र माऽऽयन्तु दमायन्तु शमायन्त्वित्यादि ।

यशो जनेऽसानि स्वाहा । श्रेयान्वस्यसोऽसानि स्वाहा । तं त्वा भग प्रविशानि स्वाहा । स मा भग प्रविश स्वाहा । तस्मिन्त्सहस्रशाखे । नि भगाहं त्वयि मृजे स्वाहा । यथाऽऽपः प्रवताऽऽयन्ति । यथा मासा अहर्जरम् । एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वतः स्वाहा । प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व (३) ।

वितन्वाना शमायन्तु ब्रह्मचारिणः स्वाहा धातरायन्तु सर्वतः स्वाहैकं च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि शीक्षाध्याये चतुर्थोऽनुवाकः ॥ ४ ॥

---

१ क. छ. ठ. °शिष्टां च श्रियं लो° । ख. ञ. °शिष्टां च लोमशां श्रियम्° । २ क. ख. ग. च. छ. ट. °नार्थ इत्यर्थः । ङ. °नार्थः स्वाहाकारः । आ° । ३ ङ. आ मा यन्त्विति ।

यशो यशस्वी जने जनसमूहेऽसानि भवानि । श्रेयान्प्रशस्यतरो वस्यसो वसीयसो वसुतराद्वसुमत्तराद्वा[1]ऽसानीत्यन्वयः । किंच तं[2] ब्रह्मणः कोशभूतं त्वा त्वां हे भग भगवन्पूजावन्प्रविशानि प्रविश्य चानन्यस्त्वदात्मैव भवानीत्यर्थः । स त्वमपि मा मां भग भगवन्पूजावन्प्रविशाऽऽवयोरेकत्वमेवास्तु । तस्मिंस्त्वयि सहस्रशाखे बहुभेदे निमृजे शोधयाम्यहं पापकृत्याम् । यथा लोक आपः प्रवता प्रवणवता निम्नवता देशेन यन्ति गच्छन्ति । यथा च मासा[3] अहर्जरं संवत्सरो[4]ऽहर्जरः । अहोभिः परिवर्तमानो लोकाञ्जरयतीत्यहानि वाऽस्मिञ्जीर्यन्त्यन्तर्भवन्तीत्यहर्जरः । तं च यथा मासा यन्त्येवं मां ब्रह्मचारिणो हे धातः सर्वस्य विधातः, मामायन्त्वागच्छन्तु सर्वतः सर्वदिग्भ्यः । प्रतिवेशः श्रमापनयनस्थानमासन्नगृहमित्यर्थः[5] । एवं त्वं प्रतिवेश इव प्रतिवेशस्त्वच्छीलिनां सर्वपापदुःखापनयनस्थानमसि, अतो मा मां प्रति प्रभाहि प्रकाशयाऽऽत्मानं प्रपद्यस्व च । मां रसविद्धमिव लोहं त्वन्मयं त्वदात्मानं कुर्वित्यर्थः । श्रीकामोऽस्मिन्विद्याप्रकरणेऽभिधीयमानो धनार्थः । धनं च कर्मार्थम् । कर्म चोपात्तदुरितक्षयाय । तत्क्षये हि विद्या प्रकाशते ।

तथा च स्मृतिः—

"ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ।
यथाऽऽदर्शतले[6] प्रख्ये[7] पश्यन्त्यात्मानमात्मनि" ॥ इति ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्यायभाष्ये
चतुर्थोऽनुवाकः ॥ ४ ॥

'वस निवासे, वस आच्छादने' इति धातुद्वयादुप्रत्ययः शीलेऽर्थे[8] । वसुर्वसनशीलः[9] । पराच्छादनशीलो वा वसुः । अतिशयेन वसुर्वसीयांस्तस्माद्वसीयसः । ईलोपश्छान्दसः । वसुमान्वसुशब्देन लक्ष्यत इत्यभिप्रेत्याऽऽह—वसुमत्तराद्वेति । पूर्वोक्तस्य प्रयोजनमाह—किंचेति । यदुक्तं 'ब्रह्मचारिणो मामायन्तु' इति तत्र दृष्टान्तमाह—यथेति ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां शीक्षाध्याये चतुर्थोऽनुवाकः ॥ ४ ॥

---

१ ख. °द्वा । अनेकार्थत्वाद्धातूनां तुल्यजातीयानां विशेषवान्धनवत्स्वजातीयपुरुषाद्विशेषवानसा° । २ क. ख. घ. च. छ. ट. °नीत्यर्थः । किं । ३ क. मासाः संवत्सरमह° । ४ क. °रो ह्यहर्ज° । ५ ङ. °यार्थम् । त° । ६ घ. °दर्शे तनुप्र° । ७ छ. प्रस्थे । ८ ख. ग. च. °र्थे । स्ववेश्मसु वस° । ९ ट. °लः वसुः । प° ।

अथ शीक्षाध्याये पञ्चमोऽनुवाकः ।

भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः । तासामु ह स्मैतां चतुर्थीम् । माहाचमस्यः प्रवेदयते । मह इति । तद्ब्रह्म । स आत्मा । अङ्गान्यन्या देवताः । भूरिति वा अयं लोकः । भुव इत्यन्तरिक्षम् । सुवरित्यसौ लोकः (१) । मह इत्यादित्यः । आदित्येन वाव सर्वे लोका महीयन्ते । भूरिति वा अग्निः । भुव इति वायुः । सुवरित्यादित्यः । मह इति चन्द्रमाः । चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते । भूरिति वा ऋचः । भुव इति सामानि । सुवरिति यजूंषि (२) ।

संहिताविषयमुपासनमुक्तं तदनु मेधाकामस्य श्रीकामस्य मन्त्रा अनुक्रान्तास्ते च पारम्पर्येण विद्योपयोगार्था एव । अनन्तरं व्याहृत्यात्मनो ब्रह्मणोऽन्तरुपासनं स्वाराज्यफलं प्रस्तूयते । भूर्भुवः सुवरित्युक्तोपप्रदर्शनार्थः । एतास्तिस्र इति प्रदर्शितानां परामर्शार्थः । परामृष्टाः[१] स्मार्यन्ते वेत्यनेन । तिस्र एताः प्रसिद्धा व्याहृतयः स्मार्यन्ते तावत् । तासामियं चतुर्थी व्याहृतिर्मह इति । तामेतां चतुर्थीं महाचमसस्यापत्यं माहाचमस्यः प्रवेदयते । उ ह स्म, इत्येतेषां वृत्तानुकथनार्थत्वाद्विदितवान्ददर्शेत्यर्थः । माहाचमस्यग्रहणमार्षानुस्मरणार्थम्[२] । ऋषिस्मरणमप्युपासनाङ्गमिति गम्यत इहोपदेशात्[३] । येयं माहाचमस्येन दृष्टा व्याहृतिर्मह इति तद्ब्रह्म महद्धि ब्रह्म । महश्च व्याहृतिः । किं पुनस्तत् । स

---

१ घ. ङ. 'ष्ठाः स्मर्य' । २ ख. ग. ब. ज. 'णमार्षेयानु' । ३ क. ख. ग. घ. ङ. ब. छ. ज. ट ऋष्यनुस्म' ।

आत्मा । आप्नोतेर्व्याप्तिकर्मणः । आत्मेतराश्च व्याहृतयो लोका देवा वेदाः प्राणाश्च मह इत्यनेन व्याहृत्यात्मनाऽऽदित्यचन्द्रब्रह्मान्नभूतेन व्याप्यन्ते यतः । अतोऽङ्गान्यवयवा अन्या देवताः । देवताग्रहणमुपलक्षणार्थं लोकादीनाम् । मह इत्येतस्य व्याहृत्यात्मनो देवलोकादयः सर्वेऽवयवभूताः । यत आहाऽऽदित्यादिभिर्लोकादयो महीयन्त इति । आत्मनो ह्यङ्गानि महीयन्ते महनं वृद्धिरुपचयो महीयन्ते वर्धन्त इत्यर्थः । * अयं लोकोऽग्निर्ऋग्वेदः प्राण इति प्रथमा व्याहृतिर्भूरिति । एवमुत्तरोत्तरैकैका चतुर्धा भवति ।

वृत्तानुवादपूर्वकमुत्तरानुवाकस्य संबन्धमाह—संहिताविषयमित्यादिना । व्याहृतीनां श्रद्धागृहीतत्वात्परित्यागेनोपदिश्यमानं ब्रह्म न बुद्धिमारोहेदिति ततो व्याहृतिशरीरं हिरण्यगर्भाख्यं ब्रह्मान्तर्हृदये[२] ध्येयत्वेनोपादिश्यत इत्यर्थः । मह इति व्याहृतावङ्गिब्रह्मदृष्टिः कर्तव्या । तत्र किं साम्यमित्यत आह—महद्धीति । यथा देवदत्तस्य पादादीन्यङ्गानि मध्यभागश्चाङ्गीतरेषामङ्गानामात्मा कथ्यते व्यापकत्वात्तथा महोव्याहृतिर्हिरण्यगर्भस्य ब्रह्मणो मध्यभाग आत्मेति कल्प्यते । इतराश्च व्याहृतयः पाद्यवयवत्वेन कल्प्यन्ते । प्रथमव्याहृतिः पादौ, द्वितीया बाहू, तृतीया शिर इत्यर्थः । व्याहृत्यवयवं ब्रह्मोपासीतेत्युत्पत्तिविधिरुक्तः । इदानीमङ्गविशेषविधिः कथ्यते—भूरिति वा अयं लोक इत्यादिना । तत्रैकैका व्याहृतिश्चतुष्प्रकाराऽवगन्तव्येति तात्पर्यमाह—अयं लोक इत्यादिना ।

मह इति ब्रह्म । ब्रह्मणा वाव सर्वे वेदा महीयन्ते । भूरिति वै प्राणः । भुव इत्यपानः । सुवरिति व्यानः । मह इत्यन्नम् । अन्नेन वाव सर्वे प्राणा महीयन्ते । ता वा एताश्चतस्रश्चतुर्धा । चतस्रश्चतस्रो व्याहृतयः । ता यो वेद । स

* अत्र—'व्याहृत्यवयवं ब्रह्मोपासीतेत्युत्पत्तिविधिरुक्तः । इदानीमङ्गविशेषविधिः कथ्यते' इति घ. पुस्तकेऽधिकं दृश्यते ।

१ ङ. °णाश्चेत्य° । २ ग. घ. ञ. 'ये ज्ञेय° ।

वेद॒ ब्रह्म॑ । सर्वे॑ऽस्मै दे॒वा ब॒लिमाव॑हन्ति (३) ॥

अ॒सौ लो॒को य॒जू॑ꣳषि॒ वेद॒ द्वे च॑ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि शीक्षाध्याये पञ्चमोऽनुवाकः ॥ ५ ॥

मह इति ब्रह्म । ब्रह्मेत्योंकारः । शब्दाधिकारेऽन्यस्यासंभवात् । उक्तार्थमन्यत् । ता वा एताश्चतस्रश्चतुर्धेति । ता वा एता भूर्भुवः सुवर्मह इति चतस्र एकैकशश्चतुर्धा चतुष्प्रकाराः । धाशब्दः प्रकारवचनः । चतस्रश्चतस्रः सत्यश्चतुर्धा भवन्तीत्यर्थः । तासां यथाक्लृप्तानां पुनरुपदेशस्तथैवोपासननियमार्थः । ता यथोक्तव्याहृतीर्यो वेद स वेद विजानाति । किं ब्रह्म । ननु—तद्ब्रह्म स आत्मेति ज्ञाते ब्रह्मणि न वक्तव्यमविज्ञातवत्स वेद ब्रह्मेति । न । तद्विशेषविवक्षुत्वाददोषः । सत्यं विज्ञानं चतुर्थव्याहृत्यात्मा ब्रह्मेति न तु तद्विशेषो हृदयान्तरुपलभ्यत्वं मनोमयत्वादिश्च । 'शान्तिसमृद्धम्' इत्येवमन्तो विशेषणविशेष्यरूपो धर्मपूगो विज्ञायत इति तद्विवक्षुर्हि (क्षु हि?) शास्त्रमविज्ञातमिव ब्रह्म मत्वा स वेद ब्रह्मेत्याह । अतो न दोषः । यो हि वक्ष्यमाणेन धर्मपूगेन(ण) विशिष्टं ब्रह्म वेद स वेद ब्रह्मेत्यभिप्रायः । अतो वक्ष्यमाणानुवाकेनैकवाक्यताऽस्योभयोर्ह्यनुवाकयोरेकमुपासनं लिङ्गाच्च । भूरित्यग्नौ प्रतितिष्ठतीत्यादिकं लिङ्गमुपासनैकत्वे विधायकाभावाच्च । न हि वेद उपासितव्य इति विधायकः कश्चिच्छब्दोऽस्ति । व्याहृत्यनुवाके 'ता यो वेद' इति च वक्ष्यमाणार्थत्वान्नोपासनभेदकः । वक्ष्यमाणार्थत्वं च तद्विशेषविवक्षुत्वादित्यादिनोक्तम् । सर्वे देवा अस्मा एवं विदुषेऽङ्गभूता आवहन्त्यानयन्ति बलिं स्वाराज्यप्राप्तौ सत्यामित्यर्थः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्यायभाष्ये पञ्चमोऽनुवाकः ॥ ५ ॥

एकैका व्याहृतयो यदा चतुष्प्रकाराश्चिन्त्यन्ते तदा षोडशकलः पुरुष उपासितो भवतीत्यभिप्रेत्य संक्षेपमाह—ता वा एता इति । स वेद ब्रह्मेति ब्रह्मवेदनं फलत्वेन न संकीर्त्यतेऽधिकारविधिवाक्ये । किंतु वक्ष्यमाणानुवाकेनास्मिन्नेव ब्रह्मोपासने गुणविधानं भविष्यतीति सूचयितुमित्याह—न तद्विशेषविवक्षुत्वादित्यादिना । यदि

---

१ क. ङ. च. छ इत्यन्तो ।

व्याहृत्यवयवमेव ब्रह्मोत्तरत्रोपास्यते तदैवोपासकस्य प्रथमव्याहृत्यात्मकेऽग्नौ प्रतिष्ठाभिधानं घटेत । तस्माद्व्याहृत्यात्मकदेवताप्राप्त्यभिधानम् । उपासनैकत्वे लिङ्गमाह—लिङ्गाच्चेति । किंचैकत्र प्रधानविद्याविधिरपरत्र गुणविधिरित्येवमनुवाकभेदे चरितार्थे[१] नानन्यथासिद्धं भेदकं प्रमाणमुपलभ्यत इत्याह—विधायकाभावाच्चेति । किं विधायकात्मक इति भिन्नविद्याबोधक इत्यर्थः ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां शीक्षाध्याये पञ्चमोऽनुवाकः ॥ ५ ॥

अथ शीक्षाध्याये षष्ठोऽनुवाकः ।

भूर्भुवःसुवःस्वरूपा मह इत्येतस्य व्याहृत्यात्मनो ब्रह्मणोऽङ्गान्यन्या देवता इत्युक्तम् । यस्य ता अङ्गभूतास्तस्यैतस्य ब्रह्मणः साक्षादुपलब्ध्यर्थमुपासनार्थं[३] च हृदयाकाशः[४] स्थानमुच्यते शालग्राम इव विष्णोः । तस्मिन्हि तद्ब्रह्मोपास्यमानं[५] मनोमयत्वादिधर्मविशिष्टं साक्षादुपलभ्यते । पाणाविवाऽऽमलकम् । मार्गश्च सर्वात्मभावप्रतिपत्तये वक्तव्य इत्यनुवाक आरभ्यते—

स य एषोऽन्तर्हृदय आकाशः । तस्मिन्नयं
पुरुषो मनोमयः । अमृतो हिरण्मयः ।
अन्तरेण तालुके । य एष स्तन इवावलम्बते ।
सेन्द्रयोनिः । यत्रासौ केशान्तो विव-
र्तते । व्यपोह्य शीर्षकपाले । भूरित्यग्नौ
प्रतितिष्ठति । भुव इति वायौ (१) ।

स इति व्युत्क्रम्य 'अयं पुरुषः' इत्यनेन संबध्यते । य एषोऽन्तर्हृदये हृदयस्यान्तर्हृदयमिति पुण्डरीकाकारो मांसपिण्डः प्राणायतनोऽनेकनाडीसुषिर

---

१ ख. °र्थेऽनुवाकभेदप्रमाणं तु नोपासनाभेदं सिध्यतीति वाच्यम् । तस्य गुणपरत्वेनान्यथासिद्धत्वात् । तस्मादन्यथासिद्धमुपासनाभेदेनैव सिद्धं प्रमाणं नोपल° । २ क. ख. ग. घ. ज. झ. ढ. यक इ° । ३ ङ. °लप्स्यत्युपा° । ४ ङ. °शः स स्था° । ५ ङ. °पासनं ।

ऊर्ध्वनालोऽधोमुखो विशस्यमाने पशौ प्रसिद्ध उपलभ्यते । तस्यान्तर्य एष आकाशः प्रसिद्ध एव करकाकाशवत् । तस्मिन्सोऽयं पुरुषः । पुरि शयनात्पूर्णा वा भूरादयो लोका येनेति पुरुषो मनोमयः । मनो विज्ञानम् । मनुतेर्ज्ञानकर्मणस्तन्मयस्तदुपलभ्यत्वात् । मनुतेऽनेनेति वा मनोऽन्तःकरणं तदभिमानी तन्मयस्तल्लिङ्गो वा । अमृतोऽमरणधर्मा हिरण्मयो ज्योतिर्मयः । तस्यैवंलक्षणस्य हृदयाकाशे साक्षात्कृतस्य विदुष आत्मभूतस्येन्द्रस्येश्वरस्वरूपप्रतिपत्तये मार्गोऽभिधीयते । हृदयादूर्ध्वं प्रवृत्ता सुषुम्ना नाम नाडी योगशास्त्रेषु च प्रसिद्धा । सा चान्तरेण मध्ये प्रसिद्धे तालुके तालुकयोर्गता । यश्चैष तालुकयोर्मध्ये स्तन इवावलम्बते मांसखण्डस्तस्य चान्तरेणेत्येतत् । यत्र च केशान्तः केशानामन्तोऽवसानं मूलं केशान्तो विवर्तते विभागेन वर्तते मूर्धप्रदेश इत्यर्थः । तं देशं प्राप्य तत्र विनिःसृता । व्यपोह्य विभज्य विदार्य शीर्षकपाले शिरःकपाले विनिर्गता या सेन्द्रयोनिरिन्द्रस्य ब्रह्मणो योनिर्मार्गः स्वरूपप्रतिपत्तिद्वारमित्यर्थः । तयैवं विद्वान्मनोमयात्मदर्शी मूर्ध्नो विनिष्क्रम्यास्य लोकस्याधिष्ठाता भूरितिव्याहृतिरूपो योऽग्निर्महतो ब्रह्मणोऽङ्गभूतस्तस्मिन्नग्नौ प्रतितिष्ठत्यग्न्यात्मनेमं लोकं व्याप्नोतीत्यर्थः । तथा भुव इति द्वितीयव्याहृत्यात्मनि वायौ । प्रतितिष्ठतीत्यनुवर्तते ।

तदुपलभ्यत्वादिति । ज्ञानाकारपरिणामिनि मनस्येवोपलभ्यत्वाद्ध्यातेरित्यर्थः । तस्य मनसः प्रवृत्तिं दृष्ट्वा तदधिष्ठातृतया हिरण्यनाडी योगशास्त्रे बोध्यते । तस्य शास्त्रे सकलकरणाधिष्ठातृत्वेन प्रसिद्धत्वादिति तल्लिङ्गत्वमुक्तमित्यर्थः ।

सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम् । आप्नोति मनसस्पतिम् । वाक्पतिश्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः । एतत्ततो भवति । आकाशशरीरं ब्रह्म । सत्यात्म प्राणारामं मनआनन्दम् । शान्तिसमृद्धम-

---

१ ङ. ञ. °स्तत्प्रायत्वा° । २ क. °पस्य ब्रह्मणः स्वरूपप्र° । ३ ञ. मूर्ध्नः प्र° । ४ ख. ङ. ज. ट. °व्यमाणा तेनान्तरेण त° । ५ ख. ग. ङ. च. छ. तथैवं । ६ क. ख. ग. च. ट. °भ्यमानत्वा° । ७ क. ख. ङ. °स्य जडस्य म° । ८ च. छ. ञ. °स्त्रे हिरण्यगर्भोऽनुमीयते । त° ।

मृतम् । इति प्राचीनयोग्योपास्स्व (२) ॥

वायावमृतमेकं च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि शीक्षाध्याये षष्ठोऽनुवाकः ॥ ६ ॥

सुवरिति तृतीयव्याहृत्यात्मन्यादित्ये । मह इत्यङ्गिनि चतुर्थव्याहृत्यात्मनि ब्रह्मणि प्रतितिष्ठति । तेष्वात्मभावेन स्थित्वाऽऽप्नोति ब्रह्मभूतः स्वाराज्यं स्वराड्भावं स्वयमेव राजाधिपतिर्भवति । अङ्गभूतानां देवानां यथा ब्रह्म । देवाश्च सर्वेऽस्मै बलिमावहन्त्यङ्गभूता यथा ब्रह्मणे । आप्नोति मनसस्पतिम् । सर्वेषां हि मनसां पतिः । सर्वात्मकत्वाद्ब्रह्मणः । सर्वैर्हि मनोभिस्तन्मनुते । तदाप्नोत्येवं विद्वान् । किंच वाक्पतिः सर्वासां वाचां पतिर्भवति । तथैव चक्षुष्पतिश्चक्षुषां पतिः । श्रोत्रपतिः श्रोत्राणां पतिः । विज्ञानपतिर्विज्ञानानां च पतिः । सर्वात्मकत्वात्सर्वप्राणिनां करणैस्तद्वान्भवतीत्यर्थः । किंच ततोऽप्यधिकतरमेतद्भवति । किं तत् । उच्यते । आकाशशरीरमाकाशः शरीरमस्याऽऽकाशवद्वा सूक्ष्मं शरीरमस्येत्याकाशशरीरम् । किं तत् । प्रकृतं ब्रह्म । सत्यात्म सत्यं मूर्तामूर्तमवितथं स्वरूपं चाऽऽत्मा स्वभावोऽस्य तदिदं सत्यात्म । प्राणारामं प्राणेष्वा[राम आ]रमणमाक्रीडा यस्य तत्प्राणारामम् । प्राणानां वाऽऽरामो यस्मिंस्तत्प्राणारामम् । मनआनन्दम् । आनन्दभूतं सुखकृदेव यस्य मनस्तन्मनआनन्दम् । शान्तिसमृद्धं शान्तिरुपशमः शान्तिश्च तत्समृद्धं च शान्तिसमृद्धम् । शान्त्या वा समृद्धं तदुपलभ्यत इति शान्तिसमृद्धम् । अमृतममरणधर्मि । एतच्चाधिकतरं विशेषणं तत्रैव मनोमय इत्यादौ द्रष्टव्यमिति । एवं मनोमयत्वादिधर्मैर्विशिष्टं यथोक्तं ब्रह्म हे प्राचीनयोग्य, उपास्स्वेत्याचार्यवचनोक्तिरादरार्था ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्यायभाष्ये षष्ठोऽनुवाकः ॥ ६ ॥

---

१ घ. °राममानन्दभूतप्राणे° । २ क. ख. च. छ. ञ. ट. प्राणेष्वा र° ।

स्वाराज्यं निरङ्कुशमैश्वर्यं जगत्स्रष्टृत्वादिलक्षणं न भवतीत्याह— **अङ्गभूतानां देवानामिति**। सावधिकमैश्वर्यमेवाऽऽह—**प्राप्नोतीत्यादिना**।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां शीक्षाध्याये षष्ठोऽनुवाकः ॥ ६ ॥

अथ शीक्षाध्याये सप्तमोऽनुवाकः ।

यदेतद्व्याहृत्यात्मकं ब्रह्मोपास्यमुक्तं तस्यैवेदानीं पृथिव्यादिपाङ्क्तस्वरूपेणोपासनमुच्यते। पञ्चसंख्यायोगात्पङ्क्तिच्छन्दःसंपत्तिः। ततः पाङ्क्तत्वं सर्वस्य। पाङ्क्तश्च यज्ञः। "पञ्चपदा पङ्क्तिः। पाङ्क्तो यज्ञः" इति श्रुतेः। तेन यत्सर्वं लोकाद्यात्मान्तं च पाङ्क्तं परिकल्पयन्ति(ति) यज्ञमेव तत्परिकल्पयति। तेन यज्ञेन परिकल्पितेन पाङ्क्तात्मकं प्रजापतिमभिसंपद्यते। तत्कथं पाङ्क्तमिदं सर्वमित्यत आह—

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशाः । अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि । आप ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम् ।

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशा इति लोकपाङ्क्तम्। अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणीति देवतापाङ्क्तम्। आप ओषधयो वनस्पतय आकाश आत्मेति भूतपाङ्क्तम्। आत्मेति विराड्भूताधिकारात्। इत्यधिभूतमित्यधिलोकाधिदैवतपाङ्क्तद्वयोपलक्षणार्थम्। लोकदेवतापाङ्क्तयोश्चाभिहितत्वात्।

उत्तरोऽप्यनुवाकः प्रकारान्तरेण हिरण्यगर्भोपासनविषय इत्याह—**यदेतदित्यादिना**। पृथिव्यादेः कथं पाङ्क्तत्वमित्याकाङ्क्षायां पङ्क्त्याख्यस्य च्छन्दसः संपादनादित्याह—**पञ्चसंख्येति**। न केवलं पञ्चसंख्यायोगात्पङ्क्तिच्छन्दःसंपादनं यज्ञत्वसंपादनमपि कर्तुं शक्यत इत्याह—**पाङ्क्तश्च यज्ञ इति**। पत्नीयजमानपुत्रदैवमानुषवित्तैः पञ्चभिः संपाद्यत इति यज्ञः पाङ्क्त इत्यर्थः।

अथाध्यात्मम् । प्राणो व्यानोऽपान उदानः

संमानः । चक्षुः श्रोत्रं मनो वाक्त्वक् । चर्म माꣳसꣳ स्नावास्थि मज्जा । एतदधिविधाय ऋषिरवोचत् । पाङ्क्तं वा इदꣳ सर्वम् । पाङ्क्तेनैव पाङ्क्तꣳ स्पृणोतीति (१) ।

सर्वमेकं च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि शीक्षाध्याये सप्तमोऽनुवाकः ॥ ७ ॥

अथानन्तरमध्यात्मं पाङ्क्तत्रयमुच्यते—प्राणादि वायुपाङ्क्तम् । चक्षुरादीन्द्रियपाङ्क्तम् । चर्मादि धातुपाङ्क्तम् । एतावद्धीदं सर्वमध्यात्मम् । बाह्यं च पाङ्क्तमेवेत्येतदेवमधिविधाय परिकल्प्यर्षिर्वेद एतद्दर्शनसंपन्नो वा कश्चिदृषिरवोचदुक्तवान् । किमित्याह—पाङ्क्तं वा इदं सर्वं पाङ्क्तेनैवाऽऽध्यात्मिकेन संख्यासामान्यात्पाङ्क्तं बाह्यं स्पृणोति बलयति पूरयति । एकात्मतयोपलभ्यत इत्येतदेव । पाङ्क्तमिदं सर्वमिति यो वेद स प्राजापत्यात्मैव भवतीत्यर्थः ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्यायभाष्ये सप्तमोऽनुवाकः ॥ ७ ॥

" उत्कृष्टदृष्टिर्निकृष्टे फलवती " इति न्यायाद्बाह्यपाङ्क्तरूपेणाऽऽध्यात्मिकपाङ्क्तत्रयमवगन्तव्यमित्यभिप्रेत्याऽऽह—एकात्मतयेति ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां शीक्षाध्याये सप्तमोऽनुवाकः ॥ ७ ॥

अथ शीक्षाध्यायेऽष्टमोऽनुवाकः ।

व्याहृत्यात्मनो ब्रह्मण उपासनमुक्तम् । अनन्तरं च पाङ्क्तस्वरूपेण तस्यैवोपासनमुक्तम् । इदानीं सर्वोपासनाङ्गभूतस्योंकारस्योपासनं विधित्स्यते । परापरब्रह्मदृष्ट्या ह्युपास्यमान ओंकारः शब्दमात्रोऽपि परापरब्रह्मप्राप्तिसाधनं भवति । स ह्यालम्बनं ब्रह्मणः परस्यापरस्य च । प्रतिमेव विष्णोः । " एतेनैवाऽऽयतनेनैकतरमन्वेति " इति श्रुतेः ।

ओमिति ब्रह्म । ओमितीदꣳ सर्वम् ।

ओमिति । इतिशब्दः स्वरूपपरिच्छेदार्थः । ओमित्येतच्छब्दरूपं ब्रह्मेति मनसा धारयेदुपासीत । यत ओमितीदं सर्वं हि शब्दरूपमोंकारेण व्याप्तम् । "तद्यथा शङ्कुना" इति श्रुत्यन्तरात् । अभिधानतन्त्रं ह्यभिधेयमित्यत इदं सर्वमोंकार इत्युच्यते ।

वृत्तानुवादपूर्वकमुत्तरानुवाकमवतारयति— व्याहृत्यात्मन इत्यादिना । वेदविदां हि सर्वाः क्रिया ओंकारमुच्चार्य प्रवर्तन्ते ततस्तस्य श्रद्धागृहीतत्वात्तत्परिहारेणोपादिष्टं ब्रह्म न बुद्धिमारोहेदतस्तमादायैवोपासनं विधीयत इत्यर्थः । नन्वोंकारस्य शब्दमात्रस्याचेतनत्वादहमनेनोपासित इतिज्ञानाभावात्कथं फलदातृत्वं स्यादित्याशङ्क्याऽऽह— परापरेति । प्रतिमाद्यर्चनमिव सर्वथेश्वर एव फलदातेति भावः । ओंकारे ब्रह्मत्वाध्यासे किं सादृश्यमित्यत आह— ओमितीदमिति । सर्वास्पदत्वमोंकारस्य ब्रह्मणा सादृश्यमित्यर्थः ।

ओमित्येतदनुकृति ह स्म वा अप्यो श्रावयेत्याश्रावयन्ति । ओमिति सामानि गायन्ति । ओꣳ शोमिति शस्त्राणि शꣳसन्ति । ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति (१) ॥

ओं दश ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि शीक्षाध्यायेऽष्टमोऽनुवाकः ॥ ८ ॥

ओंकारस्तुत्यर्थमुत्तरो ग्रन्थः । उपास्यत्वात्तस्य । ओमित्येतदनुकृतिरनुकरणम् । करोमि यास्यामि चेति कृतमुक्तमोमित्यनुकरोत्यन्यः । अत ओंकारोऽनुकृतिः । ह स्म वा इति प्रसिद्धावद्योतकाः । प्रसिद्धं

ह्योंकारस्यानुकृतित्वम् । अपि च " ओ श्रावय " इति प्रैषपूर्वकमाश्रावयन्त प्रतिश्रावयन्ति । तथोमिति सामानि गायन्ति सामगाः । ओमिति शस्त्राणि शंसन्ति शस्त्रशंसितारोऽपि। तथोमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ब्रह्मा प्रसौत्यनुजानाति प्रैषपूर्वकमाश्रावयति । ओमित्यग्निहोत्रमनुजानाति । जुहोमीत्युक्त ओमित्येवानुज्ञां प्रयच्छति । ओमित्येव ब्राह्मणः प्रवक्ष्यन्प्रवचनं करिष्यन्नध्येष्यमाण ओमित्येवाऽऽह । ओमिति प्रतिपद्यतेऽध्येतुमित्यर्थः । ब्रह्म वेदमुपाप्नवानीति प्राप्नुयां ग्रहीष्यामीति । उपाप्नोत्येव ब्रह्म । अथवा ब्रह्म परमात्मा तमुपाप्नवानीत्यात्मानं प्रवक्ष्यन्प्रापयिष्यन्नोमित्येवाऽऽह । स च तेनोंकारेण ब्रह्म प्राप्नोत्येव । ओंकारपूर्वं प्रवृत्तानां क्रियाणां फलवत्त्वं यस्मात्तस्मादोंकारं ब्रह्मेत्युपासीतेति वाक्यार्थः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकर-
भगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्यायभाष्येऽ-
ष्टमोऽनुवाकः ॥ ८ ॥

शस्त्राणि गीतिरहिता ऋच उच्यन्ते । प्रतिगरमिति । ओ शामो दैवेतिशब्दमध्वर्युः प्रतिगृणाति होतुः शंसनं प्रति । प्रतिशंसनमुच्चारयतीत्यर्थः । प्रवक्ष्यन्निति । " वच परिभाषणे " इत्यस्य रूपं प्रथमव्याख्याने । द्वितीये " वह प्रापणे " इत्यस्य द्रष्टव्यम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरी-
योपनिषच्छांकरभाष्यटीकायां शीक्षाध्यायेऽष्टमोऽनुवाकः । ८ ॥

अथ शीक्षाध्याये नवमोऽनुवाकः ।

ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । दमश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्यायप्रवचने च । अग्नयश्च स्वाध्यायप्रवचने च । अग्निहोत्रं च स्वाध्यायप्रवचने च । अतिथयश्च स्वाध्यायप्रवचने च । मानुषं च

स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रव-
चने च । प्रजनश्च स्वाध्यायप्रवचने च ।

विज्ञानादेवाऽऽप्नोति स्वाराज्यमित्युक्तत्वाच्छ्रौतस्मार्तानां कर्मणामानर्थक्यं प्राप्तमित्यतस्तन्मा प्रापदिति कर्मणां पुरुषार्थं प्रति साधनत्वप्रदर्शनार्थमिहोपन्यासः । ऋतमिति व्याख्यातम् । स्वाध्यायोऽध्ययनम् । प्रवचनमध्यापनं ब्रह्मयज्ञो वा । एतान्यृतादीन्यनुष्ठेयानीति वाक्यशेषः । सत्यं च सत्यवचनं यथाव्याख्यातार्थं वा । तपः कृच्छ्रादि । दमो बाह्यकरणोपशमः । शमोऽन्तःकरणोपशमः । अग्नय आधातव्याः । अग्निहोत्रं च होतव्यम् । अतिथयश्च पूज्याः । मानुषमिति लौकिकः संव्यवहारः । तच्च यथाप्राप्तमनुष्ठेयम् । प्रजा चोत्पाद्या । प्रजनश्च प्रजननमृतौ भार्यागमनमित्यर्थः ।

व्यवहितानुवाकेन संबन्धमाह—विज्ञानादेवेत्यादिना । अपरविद्यासहकारितया तत्फलेनैव फलवत्त्वसिद्ध्यर्थमुत्तरानुवाकारम्भ इत्यर्थः । [४]लौकिकसंव्यवहारो विवाहादिः ।

प्रजातिश्च स्वाध्यायप्रवचने च ।
सत्यमिति सत्यवचा राथीतरः ।

प्रजातिः पौत्रोत्पत्तिः । पुत्रो निवेशयितव्य इत्येतत् । सर्वैरेतैः कर्मभिर्युक्तस्यापि स्वाध्यायप्रवचने यत्नतोऽनुष्ठेये इत्येवमर्थं सर्वेण सह स्वाध्यायप्रवचनग्रहणम् । स्वाध्यायाधीनं ह्यर्थज्ञानम् । अर्थज्ञानायत्तं च परं श्रेयः । प्रवचनं च तदविस्मरणार्थं धर्मप्रवृद्ध्यर्थं च । अतः स्वाध्यायप्रवचनयोरादरः कार्यः । सत्यमिति सत्यमेवानुष्ठातव्यमिति । सत्यवचाः सत्यमेव वचो यस्य सोऽयं सत्यवचा नाम वा तस्य । राथीतरो रथितरस्य गोत्रो [६]राथीतराचार्यो मन्यते ।

पुनः पुनः स्वाध्यायप्रवचनग्रहणस्य तात्पर्यमाह—सर्वैरेतैरिति । किमिति यत्नतोऽनुष्ठेये तत्राऽऽह—स्वाध्यायाधीनमिति । त्रयाणामृषीणां मतभेदोपन्यासेन स्वाध्यायप्रवचनयोरेवाऽऽदरं विवृणोति— सत्यमित्यादिना ।

---

१ ग. च. एतदादीन्यृ° । २ क. ख ग. ङ. च. ञ. °वदनं । ३ क. ङ. ञ. °जाश्चोत्पाद्याः । प्र° । ४ क. ट. °किको वि° । ५ ङ. राधीतरो । ६ ङ. राधीतरा° ।

तप इति तपोनित्यः पौरुशिष्टिः ।
स्वाध्यायप्रवचने एवेति नाको
मौद्गल्यः । तद्धि तपस्तद्धि तपः (१) ॥

प्रजा च स्वाध्यायप्रवचने च षट् च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि शीक्षाध्याये
नवमोऽनुवाकः ॥ ९ ॥

तप इति तप एव कर्तव्यमिति । तपोनित्यस्तपसि नित्यस्तपःपरस्तपोनित्य इति वा नाम। पौरुशिष्टिः पुरुशिष्टस्यापत्यं पौरुशिष्टिराचार्यो मन्यते । स्वाध्यायप्रवचने एवानुष्ठेये इति नाको नामतो मुद्गलस्यापत्यं मौद्गल्य आचार्यो मन्यते । तद्धि तपस्तद्धि तपः । हि यस्मात्स्वाध्यायप्रवचने एव तपस्तस्मात्ते एवानुष्ठेये इति । उक्तानामपि सत्यतपःस्वाध्यायप्रवचनानां पुनर्ग्रहणमादरार्थम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छं-
करभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्यायभाष्ये
नवमोऽनुवाकः ॥ ९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनि-
षच्छांकरभाष्यटीकायां शीक्षाध्याये नवमोऽनुवाकः ॥ ९ ॥

अथ शीक्षाध्याये दशमोऽनुवाकः ।

अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरे-
रिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि ।

अहं वृक्षस्य रेरिवेति स्वाध्यायार्थो मन्त्राम्नायः । स्वाध्यायश्च विद्योत्पत्तये प्रकरणात् । विद्यार्थं हीदं प्रकरणम् । न चान्यार्थत्वमवगम्यते । स्वाध्यायेन च विशुद्धसत्त्वस्य विद्योत्पत्तिरवकल्प्यते । अहं वृक्षस्योच्छेदात्मकस्य संसारवृक्षस्य रेरिवा प्रेरयिताऽन्तर्याम्यात्मना । कीर्तिः ख्यातिर्गिरेः पृष्ठमिवोच्छ्रिता मम । ऊर्ध्वपवित्र ऊर्ध्वकारणं पवित्रं पावनं ज्ञानप्रकाश्यं पवित्रं

परमं ब्रह्म यस्य सर्वात्मनो मम सोऽहमूर्ध्वपवित्रः । वाजिनीव वाजवतीव । वाजमन्नं तद्वति सवितरीत्यर्थः । यथा सवितर्यमृतमात्मतत्त्वं विशुद्धं प्रसिद्धं श्रुतिस्मृतिशतेभ्य एवं स्वमृतं शोभनं विशुद्धमात्मतत्त्वमस्मि भवामि ।

स्वाध्यायार्थ इति जपार्थः । "इषे त्वेति शाखां छिनत्ति" इतिवत् । अन्यत्र विनियोजकं श्रुत्यादिप्रमाणमपि नोपलभ्यत इत्याह— न चान्यार्थत्वमिति । अक्षितमसीत्यादिवदुपासनाविधिविशे(षिशे)षत्वं वा वक्तुं न शक्यते । ज्ञानसाधनक्रियाविधेः प्रक्रान्तत्वादित्यर्थः ।

द्रविण॑ꣳ सव॑र्चसम् । सुमेधा अ॑मृतोक्षि॑तः ।

इति त्रिशङ्को॑र्वेदा॑नुव॒चनम् (१) ॥

अह॑ꣳ षट् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि शीक्षाध्याये दशमोऽनुवाकः ॥ १० ॥

द्रविणं धनं सवर्चसं दीप्तिमत्तदेवाऽऽत्मतत्त्वमस्मीत्यनुवर्तते । ब्रह्मज्ञानं वाऽऽत्मतत्त्वप्रकाशकत्वात्सवर्चसम् । द्रविणमिव द्रविणं मोक्षसुखहेतुत्वात् । अस्मिन्पक्षे प्राप्तं मयेत्यध्याहारः कर्तव्यः । सुमेधाः शोभना मेधा सर्वज्ञलक्षणा यस्य मम सोऽहं सुमेधाः । संसारस्थित्युत्पत्त्युपसंहारकौशलयोगात्सुमेधस्त्वम् । अत एवामृतोऽमरणधर्माऽक्षितोऽक्षीणोऽव्ययः । उक्षितो वाऽमृतेन वोक्षितः सिक्तः । "अमृतोक्षितोऽहम्" इत्यादिब्राह्मणम् । इत्येवं त्रिशङ्कोर्ऋषेर्ब्रह्मभूतस्य ब्रह्मविदो वेदानुवचनं वेदो वेदनमात्मैकत्वविज्ञानं तस्य प्राप्तिमनु वचनं वेदानुवचनम् । आत्मनः कृतकृत्यताख्यापनार्थं वामदेववत्त्रिशङ्कुनाऽऽर्षेण दर्शनेन दृष्टो मन्त्राम्नाय आत्मविद्याप्रकाशक इत्यर्थः । अस्य च जपो विद्योत्पत्त्यर्थोऽवगम्यते । ऋतं चेत्यादिकर्मोपन्यासादनन्तरं च वेदानुवचनपाठादेतदवगम्यते । एवं श्रौतस्मार्तेषु नित्येषु कर्मसु युक्तस्य निष्कामस्य परं ब्रह्म विविदिषोरार्षाणि दर्शनानि प्रादुर्भवन्त्यात्मादिविषयाणीति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्यायभाष्ये दशमोऽनुवाकः ॥ १० ॥

---

१ ङ. परं । २ ङ. °ताप्रख्या° । ३ अ. °ति गम्यते । इ° ।

अहं वृक्षस्येतिमन्त्रस्यर्षिस्त्रिशङ्कुः, पङ्क्तिश्छन्दः, परमात्मा देवता, ब्रह्मविद्यार्थे जपे विनियोगः । न केवलमस्य जपो विद्यार्थः पूर्वोक्तानि कर्माण्यपीत्याह–ऋतं चेत्यादिना ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां शीक्षाध्याये दशमोऽनुवाकः ॥ १० ॥

अथ शीक्षाध्याय एकादशोऽनुवाकः ।

वेदमनूच्याऽऽचार्योऽन्तेवासिनमनुशास्ति ।

वेदमनूच्येत्येवमादिकर्तव्यतोपदेशारम्भः प्राग्ब्रह्मविज्ञानान्नियमेन कर्तव्यानि श्रौतस्मार्तकर्माणीत्येवमर्थः । अनुशासनश्रुतेः पुरुषसंस्कारार्थत्वात् । संस्कृतस्य हि विशुद्धसत्त्वस्याऽऽत्मज्ञानमञ्जसैवोत्पद्यते । "तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते" इति स्मृतिः[१] । वक्ष्यति च—तपसा ब्रह्म विजिज्ञासस्व" इति । अतो विद्योत्पत्त्यर्थमनुष्ठेयानि कर्माणि । अनुशास्तीत्यनुशासनशब्दादनुशासनातिक्रमे हि दोषोत्पत्तिः । प्रागुपन्यासाच्च कर्मणां केवलब्रह्मविद्यारम्भाच्च पूर्वं कर्माण्युपन्यस्तानि । उदितायां च विद्यायां "अभयं प्रतिष्ठां विन्दते" "न बिभेति कुतश्चन" "किमहं साधु नाकरवम्" इत्येवमादिना कर्मनैष्किंचन्यं दर्शयिष्यतीत्यतोऽवगम्यते पूर्वोपचितदुरितक्षयद्वारेण विद्योत्पत्त्यर्थानि कर्माणीति । मन्त्रवर्णाच्च—"अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" इति । ऋतादीनां पूर्वत्रोपदेशानर्थक्यपरिहारार्थः[४] । इह तु ज्ञानोत्पत्त्यर्थत्वात्कर्तव्यनियमार्थः । वेदमनूच्याध्याप्याऽऽचार्योऽन्तेवासिनं शिष्यमनुशास्ति ग्रन्थग्रहणादनु पश्चाच्छास्ति तदर्थं ग्राहयतीत्यर्थः । अतोऽवगम्यतेऽधीतवेदस्य धर्मजिज्ञासामकृत्वा गुरुकुलान्न समावर्तितव्यमिति । "बुद्ध्वा कर्माणि चाऽऽरभेत्" इति स्मृतेश्च ।

उत्तरानुवाकस्य तात्पर्यमाह–वेदमनूच्येत्यादिना । विद्योत्पत्त्यर्थं नित्यनैमित्तिकान्यवश्यान्यनुष्ठेयानीत्येको नियम उक्तः । प्रागेव चानुष्ठेयानीति नियमान्तरमाह–प्रागुपन्यासाच्च कर्मणामिति । संग्रहवाक्यं विवृणोति—केवलेत्यादिना । अविद्यया कर्मणा मृत्युमधर्मं तीर्त्वेति मन्त्रोऽपि विद्योत्पत्तेः प्रागेव कर्मानुष्ठानं सूचयतीत्यर्थः ।

---

१ क. घ. ङ. ट. °स्मार्तानि क° । २ ख. °ति श्रुतिः । अ° । ३ ङ. °र्माणीति । अ° ४ ख. ग. घ. ङ. च. ञ. ट. °देश आन° ।

" ऋतं च स्वाध्यायप्रवचने च " इत्यादिना पूर्वत्र कर्मानुष्ठानमुक्तमेवातः पौनरुक्त्यमित्याशङ्क्याऽऽह- ऋतादीनामिति । विचारमकृत्वा गुरुकुलान्न निवर्तितव्यम् । किंत्वध्ययनविधेरर्थावबोधक (न)द्वारेण पुरुषार्थपर्यवसायितासिद्ध्यर्थमक्षरग्रहणानन्तरमर्थावबोधे प्रयतितव्यमित्याह-ग्रन्थग्रहणादन्विति । वेदमधीत्य स्नायादिति स्मृतिरप्येतच्छ्रुतिविरुद्धेत्याह—अतोऽवगम्यत इति ।

सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः ।

कथमनुशास्तीत्याह—सत्यं वद यथाप्रमाणावगतं वक्तव्यं तद्वद । तद्वद्धर्मं चर । धर्म इत्यनुष्ठेयानां सामान्यवचनं सत्यादिविशेषनिर्देशात् । स्वाध्यायादध्ययनान्मा प्रमदः प्रमादं मा कार्षीः । आचार्यायाऽऽचार्यार्थं प्रियमिष्टं धनमाहृत्याऽऽनीय दत्त्वा विद्यानिष्क्रयार्थम् । आचार्येण चानुज्ञातोऽनुरूपान्दारानाहृत्य प्रजातन्तुं प्रजासंतानं मा व्यवच्छेत्सीः प्रजासंततेर्विच्छित्तिर्न कर्तव्या । अनुत्पद्यमानेऽपि पुत्रे पुत्रकाम्यादिकर्मणां तदुत्पत्तौ यत्नः कर्तव्य इत्यभिप्रायः । प्रजाप्रजननप्रजा[2]तित्रयनिर्देशसामर्थ्यात् । अन्यथा प्रजननश्चे[3]त्येत[4]देकमेवावक्ष्यत् ।

वक्तव्यमिति । वचनार्हं परस्य हितमित्यर्थः ।

सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् (१) ।

सत्यान्न प्रमदितव्यं प्रमादो न कर्तव्यः । सत्याच्च प्रमदनमनृतप्रसङ्गः । प्रमादशब्दसामर्थ्यात् । विस्मृत्याप्यनृतं न वक्तव्यमित्यर्थः । + अन्य-

---

+ अत्र ख. पुस्तके ' अनृतवदनविषये दोषश्रुतेश्च, " योऽनृतं वदति समूलो वा एष परिशुष्यति " इति । " न सत्यात्परमो धर्मो नानृतात्पातकं परम् " इति स्मृतेः । इत्यधिकं दृश्यते ।

---

१ ख. ग. च. °बोधाय प्र° । २ छ. °तित्रितय° । ३ घ. °त्येतावदे° । ४ ख. °देवमे° ।

थाऽसत्यवदनप्रतिषेध एव स्यात्[1] । धर्मान्न प्रमदितव्यम् । धर्मशब्दस्यानुष्ठेयविषयत्वादननुष्ठानं प्रमादः स न कर्तव्यः । अनुष्ठातव्य एव धर्म इति यावत् । एवं कुशलादात्मरक्षार्थात्कर्मणो न प्रमदितव्यम् । भूतिर्विभूतिस्तस्यै भूत्यै भूत्यर्थान्मङ्गलयुक्तात्कर्मणो न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । स्वाध्यायोऽध्ययनं प्रवचनमध्यापनं ताभ्यां न प्रमदितव्यम् । ते हि नियमेन कर्तव्ये इत्यर्थः ।

देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकꣳ सुचरितानि । तानि त्वयोपास्यानि (२) । नो इतराणि ।

तथा देवपितृकार्याभ्यां न प्रमदितव्यम् । दैवपित्र्ये कर्मणी कर्तव्ये । मातृदेवो माता देवो यस्य स त्वं मातृदेवो भव स्याः । एवं पितृदेव आचार्यदेवोऽतिथिदेवो भव । देवतावदुपास्या एत इत्यर्थः । यान्यपि चान्यान्यनवद्यान्यनिन्दितानि शिष्टाचारलक्षणानि कर्माणि तानि सेवितव्यानि कर्तव्यानि त्वया । नो अकर्तव्यानीतराणि सावद्यानि शिष्टकृतान्यपि । यान्यस्माकमाचार्याणां सुचरितानि शोभनचरितान्याम्नायाद्यविरुद्धानि तान्येव[2] त्वयोपास्यान्यदृष्टार्थान्यनुष्ठेयानि । नियमेन कर्तव्यानीति यावत् । नो इतराणि विपरीतान्याचार्यकृतान्यपि ।

ये के चास्मच्छ्रेयाꣳसो ब्राह्मणाः । तेषां त्वयाऽऽसनेन प्रश्वसितव्यम्[3] ।

---

१ ख. घ. °त् । तथा ध° । २ ख. ग. च. °स्या एवैत । ३ छ. °भनानि च° ।

ये के च विशेषिता आचार्यत्वादिधर्मैरस्मदस्मत्तः श्रेयांसः प्रशस्यतरास्ते च ब्राह्मणा न क्षत्रियादयस्तेषामासनेनाऽऽसनदानादिना त्वया प्रश्वसितव्यम्। प्रश्वसनं प्रश्वासः श्रमापनयः, तेषां श्रमस्त्वयाऽपनेतव्य इत्यर्थः । तेषां चाऽऽसने गोष्ठीनिमित्ते समुदिते तेषु न प्रश्वसितव्यं प्रश्वासोऽपि न कर्तव्यः । केवलं तदुक्तसारग्राहिणा भवितव्यम् ।

श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् (३) । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः ।

किंच यत्किंचिद्देयं तच्छ्रद्धयैव दातव्यम् । अश्रद्धयाऽदे*यं न दातव्यम् । श्रिया विभूत्या देयं दातव्यम् । ह्रिया लज्जया च देयम् । भिया च भयेन देयम् । संविदा च । संविन्मित्रादिकार्यम् । अथैवं वर्तमानस्य यदि कदाचित्ते तव श्रौते स्मार्ते वा कर्मणि वृत्ते वाऽऽचारलक्षणे विचिकित्सा संशयः स्यात् । ये तत्र तस्मिन्देशे काले वा ब्राह्मणास्तत्र कर्मादौ युक्ता इति व्यवहितेन संबन्धः कर्तव्यः । संमर्शिनो विचारक्षमाः । युक्ता अभियुक्ताः कर्मणि वृत्ते वा । आयुक्ता अपरप्रयुक्ताः । अलूक्षा अरूक्षा अक्रूरमतयः । धर्मकामा अदृष्टार्थिनोऽ-

* ख पुस्तके टिप्पण्यां " देयमित्यपि विद्यारण्यैरुक्तम् " इति वर्तते ।

१ ख. ग. च. °रविल° । २ ख. ग. च. °स्याच्चेत् । ३ ख. °कामाः स्युरद° ।

कामहता इत्येतत्स्युर्भवेयुः । ते यथा येन प्रकारेण ब्राह्मणास्तत्र तस्मिन्कर्मणि वृत्ते वा वर्तेरंस्तथा त्वमपि वर्तेथाः । अथाभ्याख्यातेष्वभ्युक्ता दोषेण संदिह्यमानेन संयोजिताः केनचित्तेषु च यथोक्तं सर्वमुपनयेद्ये तत्रेत्यादि ।

एवं कर्तव्यमर्थमुपदिश्यानुष्ठानकाले समुत्पन्नसंशयनिवृत्त्यर्थं शिष्टाचारः प्रमाणयितव्य इत्याह—अथैवमित्यादिना । अपरप्रयुक्ता इति । स्वतन्त्रा इत्यर्थः । अभ्युक्ता अभिशस्ता इत्यर्थः ।

एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । एवमु चैतदुपास्यम् (४) ॥

स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं तानि त्वयोपास्यानि स्यात्तेषु वर्तेरन्त्सप्त च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि शीक्षाध्याये एकादशोऽनुवाकः ॥ ११ ॥

एष आदेशो विधिः । एष उपदेशः पुत्रादिभ्यः पित्रादीनाम् । एषा वेदोपनिषद्वेदरहस्यं वेदार्थ इत्येतत् । एतदेवानुशासनमीश्वरवचनम्[1] । आदेशवाक्यस्य विधेरुक्तत्वात्सर्वेषां वा प्रमाणभूतानामनुशासनमेतत्[2] । यस्मादेवं तस्मादेवं यथोक्तं सर्वमुपासितव्यं कर्तव्यम् । एवमु चैतदुपास्यमुपास्यमेव चैतन्नानुपास्यमित्यादरार्थं पुनर्वचनम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्यायभाष्ये एकादशोऽनुवाकः ॥ ११ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां शीक्षाध्याय एकादशोऽनुवाकः ॥ ११ ॥

---

१ ट. 'देव चानु' । २ ग. 'नुशमन' ।

अथ शीक्षाध्याये द्वादशोऽनुवाकः ।

शं नो॑ मि॒त्रः शं वरु॑णः । शं नो॑ भवत्वर्य॒मा ।
शं न॒ इन्द्रो॒ बृह॒स्पतिः॑ । शं नो॒ विष्णु॑रुरुक्र॒मः ।
न॒मो ब्रह्म॑णे । नम॑स्ते वायो । त्वमे॒व प्र॒त्यक्षं॒
ब्रह्मा॑सि । त्वामे॒व प्र॒त्यक्षं॒ ब्रह्मावा॑दिषम् । ऋ॒त-
म॑वादिषम् । स॒त्यम॑वादिषम् । तन्मामा॑वीत् । तद्व॒
क्तार॑मावीत् । आवी॒न्माम् । आवी॒द्वक्तार॑म् । ॐ
शान्तिः॒ शान्तिः॒ शान्तिः॑ (१) ॥

स॒त्यम॑वादि॒षं पञ्च॑ च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि शीक्षाध्याये
द्वादशोऽनुवाकः ॥ १२ ॥

* अतीतविद्याप्राप्त्युपसर्गशमनार्थं शान्तिं पठति—शं नो मित्र इति । व्याख्यातमेतत्पूर्वम् ।

शं नो मित्र इति । तदपरं ब्रह्म मामपरविद्यार्थिनमावीदरक्षदित्यर्थः ॥

अत्रैतच्चिन्त्यते विद्याकर्मणोर्विवेकार्थं किं कर्मभ्य एव केवलेभ्यः परं श्रेय उत विद्यासव्यपेक्षेभ्य आहोस्विद्विद्याकर्मभ्यां संहताभ्यां विद्याया वा कर्मापेक्षाया उत केवलाया एव विद्याया इति । तत्र केवलेभ्य एव कर्मभ्यः स्यात् । समस्तवेदार्थज्ञानवतः कर्माधिकारात् । "वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना" इति स्मरणात् । अधिगमश्च सहोपनिषदर्थेनाऽऽत्मज्ञानादिना । "विद्वान्यजते" "विद्वान्याजयति" इति च विदुष एव कर्मण्यधिकारः प्रदर्श्यते सर्वत्र । "ज्ञात्वा चानुष्ठानम्" इति च । कृत्स्नश्च वेदः कर्मार्थ इति हि मन्यन्ते केचित् । कर्मभ्यश्चेत्परं श्रेयो नावाप्यते वेदोऽनर्थकः स्यात् ।

---

* 'अतीत' इत्यारभ्य 'पूर्वम्' इत्यन्तं क. ख. ग. घ. ङ. च. छ. ञ. ट. पुस्तकेषु न विद्यते ।

---

१ ग. च. °वाप्येत वे° ।

आद्यानुवाके केवलाया विद्याया निःश्रेयससाधनत्वमुक्तमपि स्फुटीकर्तुं कर्मविधिमुपलभ्य प्रसङ्गात्पुनर्विचारयितुमुपक्रमते—अत्रैतच्चिन्त्यत इत्यादिना । विवेकार्थमिति पृथक्फलत्वज्ञापनार्थमित्यर्थः । 'भूतं भव्यायोपदिश्यते' इति न्यायेनाऽऽत्मज्ञानस्यापि कर्मकर्तृसंस्कारतया कर्मविधिशेषत्वाच्छ्रुतस्यापि फलस्यार्थवादमात्रत्वात्कर्मभ्य एव परं श्रेय इति पूर्वः पक्षः ।

न । नित्यत्वान्मोक्षस्य । नित्यो हि मोक्ष इष्यते । कर्मकार्यस्यानित्यत्वं प्रसिद्धं लोके, कर्मभ्यश्चेच्छ्रेयोऽनित्यं स्यात्तच्चानिष्टम् । "तद्यथेह कर्मचितो लोकः क्षीयते" इतिन्यायानुगृहीतश्रुतिविरोधात् । काम्यप्रतिषिद्धयोरनारम्भादारब्धस्य च कर्मण उपभोगेन क्षयान्नित्यानुष्ठानाच्च ज्ञाननिरपेक्ष एव मोक्ष इति चेत् । तच्च न । शेषकर्मसंभवात्तन्निमित्तशरीरान्तरोत्पत्तिः प्राप्नोतीति प्रत्युक्तम् । कर्मशेषस्य च नित्यानुष्ठानेनाविरोधात्क्षयानुपपत्तिरिति च यदुक्तं समस्तवेदार्थज्ञानवतः कर्माधिकारादित्यादि । तच्च न । श्रुतज्ञानव्यतिरेकादुपासनस्य । श्रुतज्ञानमात्रेण हि कर्मण्यधिक्रियते नोपासनामपेक्षते । उपासनं च श्रुतज्ञानादर्थान्तरं विधीयते । मोक्षफलमर्थान्तरप्रसिद्धं च स्यात् । "श्रोतव्यः" इत्युक्त्वा तद्व्यतिरेकेण "मन्तव्यो निदिध्यासितव्यः" इति यत्नान्तरविधानान्मनननिदिध्यासनयोश्च प्रसिद्धं श्रवणज्ञानादर्थान्तरत्वम् ।

सिद्धान्तमाह—न नित्यत्वादित्यादिना । यद्यप्यध्ययनविधिप्रैत्यु(यु)क्त्या कृत्स्नो वेदार्थ एकेन विचारितव्यस्तथाऽप्यध्ययनविधौ प्रतिवाक्याध्ययनं प्रतिवाक्यार्थविचारं च व्यापारभेदात्तत्प्रैत्यु(यु)क्त्याऽभ्युदयकामस्य कर्मोपयोगिवाक्यार्थज्ञानवत्त्वमात्रेण कर्मण्यधिकारसंभवाद्ब्रह्मसाक्षात्कारस्य तत्रानुपयोगित्वान्न समस्तवेदार्थज्ञानवतः कर्माधिकारे प्रमाणमस्तीत्याह—तच्च नेति । यद्यपि चाध्ययनविधिप्रयुक्त्या वेदान्तविचारोऽपि कृतो गुरुकुल एव तथाऽपि न समस्तवेदार्थज्ञानवतोऽधिकारः । उपासनासाध्यस्य ब्रह्मसाक्षात्कारस्य पृथग्भावादित्याह—श्रुतज्ञानेति । श्रुताद्गुरुकुले विचारिताद्वाक्यात्कर्मानुष्ठानोपयोगि यज्ज्ञानं तावन्मात्रेण

---

१ क. ग. च. अथ ग्रन्थादावाद्या° । ख. अथाऽऽद्य आ° । ज. अथाऽऽदावाद्यवाद आ° । झ. अथाऽऽदावद्या° । २ ङ. °स्कारार्थत° । ३ ख. ग. च. ट. °र्थस्य चानि° । ४ ख. ग. च. °च्च तत्प्रत्यवायानुत्पत्तेर्ज्ञान° । ५ क. ख. ग. च. ट. °सनम° । ६ ट. °ते । मानाभावात् । उ° । ७ ख. ग. झ. प्रयुक्तः कृ° । ८ क. ग. च. °वाक्यमध्य° । ९ ख. ज. झ. °त्प्रयुक्ताभ्यु° । १० ख. °नत्वमा° । ११ ग. °त्वादत्र स° । १२ ख. ज. °युक्तो वे° । १३ ख. य. ज. झ. ञ. °सनसा° ।

कर्मण्यधिक्रियते न ब्रह्मसाक्षात्कारफलमुपासनमपेक्षते व्यतिरेकभावादित्यर्थः[1] । अध्ययनविध्यापारोपरमेऽनुष्ठेयं तथाभूतं ब्रह्मोपासनमेत्र नास्ति, मानाभावादिति न वक्तव्यमित्याह-उपासनं चेति । एतच्च कर्ममीमांसान्यायाङ्गीकारमात्रेणोक्तम् । वस्तुतश्च श्रोतव्यविधिप्रयुक्त एवोपनिषद्विचारारम्भो भिन्नाधिकारः । कर्मकाण्डविचारोऽप्युत्तरविधिप्रयुक्त एवेति प्रकटार्थे प्रतिष्ठितम् ।

एवं तर्हि विद्यासव्यपेक्षेभ्यः कर्मभ्यः स्यान्मोक्षः । विद्यासहितानां च कर्मणां भवेत्कार्यान्तरारम्भसामर्थ्यम् । यथा स्वतो मरणज्वरादिकार्यारम्भसामर्थ्यानामपि विषदध्यादीनां मन्त्रशर्करादिसंयुक्तानां कार्यान्तरारम्भसामर्थ्यम् । एवं विद्यासहितैः कर्मभिर्मोक्ष आरभ्यत इति चेत् । न । आरभ्यस्यानित्यत्वादित्युक्तो दोषः । वचनादारभ्योऽपि नित्य एवेति चेत् । न । ज्ञापकत्वाद्वचनस्य । वचनं नाम यथाभूतस्यार्थस्य ज्ञापकं विद्यमानस्य कर्तृ । न हि वचनशतेनापि नित्यमारभ्यत आरब्धं वाऽविनाशि भवेत् ।

केवलं कर्म मोक्षसाधनमिति पक्षं निरस्य विद्यासमुच्चितं मोक्षसाधनमिति पक्षान्तरमाशङ्क्य निषेधति-एवं तर्हीत्यादिना । " न स पुनरावर्तते " इति वचनादारभ्योऽपि मोक्षो नित्य इति न शक्यं वक्तुम् । प्रसिद्धपदार्थयोग्यत्वमुपादाय वचनस्य संसर्गज्ञापकत्वात् । न चाऽऽरभ्यस्य नित्यत्वे योग्यत्वं प्रसिद्धम् । अन्यथा वचनस्य कारकत्वप्रसङ्गात् । " अन्धो मणिमविन्दत् " इत्यादिष्वपि योग्यताकल्पनप्रसङ्गादित्याह[2]-न ज्ञापकत्वादित्यादिना ।

एतेन विद्याकर्मणोः संहतयोर्मोक्षारम्भकत्वं प्रत्युक्तम् । विद्याकर्मणी मोक्षप्रतिबन्धहेतुनिवर्तके इति चेत् । न । कर्मणः फलान्तरदर्शनात् । उत्पत्तिसंस्कारविकाराप्तयो हि फलं कर्मणो दृश्यते । उत्पत्त्यादिफलविपरीतश्च मोक्षः । गतिश्रुतेराप्य इति चेत् । सूर्यद्वारेण "तयोर्ध्वमायन्" इत्येवमादिगतिश्रुतिभ्यः प्राप्यो मोक्ष इति चेत् । न । सर्वगतत्वाद्गन्तृभिश्चानन्यत्वादाकाशादिकारणत्वात्सर्वगतं ब्रह्म । ब्रह्माव्यतिरिक्ताश्च सर्वे विज्ञानात्मानः । अतो नाऽऽप्यो मोक्षः । गन्तुरन्यद्विभिन्नं[3] देशं प्रति भवति गन्तव्यम् । न हि येनैवाव्यतिरिक्तं[4] यत्तेनैव गम्यते तत् । अनन्यत्वप्रसिद्धेश्च[5] । " तत्सृष्ट्वा तदेवानुप्राविशत् " " क्षेत्रज्ञं चापि मां विद्धि " इत्येवमादिश्रुतिस्मृतिशतेभ्यः ।

---

१ ज. अ. °रेकाभा° । २ ज. °दित्यत आह । ३ ख. ङ. छ. ट. °न्नं च दे° । ४ ज. °क्तं यत्ते° । ५ क. ख. ग. घ. ङ. छ. ज. ठ. °सिद्धिश्च ।

कर्म प्रधानं विद्या चोपसर्जनमिति समुच्चयं निरस्य समसमुच्चयेऽप्यतिदिशति—एतेनेति । अनित्यत्वादिदोषप्रसङ्गेनेत्यर्थः । मोक्षेति । मोक्षस्य प्रतिबन्धहेतुरविद्याधर्मादिस्तान्निवर्तके विद्याकर्मणी न स्वरूपोत्पादके । ततः स्वरूपावस्थानस्य नित्यत्वम् । प्रध्वंसस्य च कृतकस्यापि नित्यत्वं प्रसिद्धमित्यर्थः । "भिद्यते हृदयग्रन्थिः" इत्यादिश्रुतेः । केवलविद्यासाध्यैवाविद्यानिवृत्तिः । न तत्र विद्यायाः सहकार्यपेक्षा । कर्मफलं त्वन्यदेव प्रसिद्धमित्याह—न कर्मण इति । उत्पत्तिः पुरोडाशादेः । संस्कारो व्रीह्यादेः । विकारः सोमस्य । आप्तिर्वेदस्य । कर्मफलं प्रसिद्धम् । आत्मस्वरूपस्य तु मोक्षस्यानादित्वादनाधेयातिशयत्वादविकार्यत्वान्नित्याप्तत्वाच्च कर्मफलाद्वैपरीत्यमित्यर्थः । गतिश्रुतेरिति । अर्चिरादिगतिश्रवणाद्ब्रह्माण्डाद्बहिःस्थितब्रह्मप्राप्तिर्मोक्षः । ततो नित्याप्तत्वमसिद्धमित्यर्थः । गत्वा प्राप्तिः किं संयोगलक्षणा तादात्म्यलक्षणा वा, नोभयथाऽपीत्याह—न सर्वगतत्वादिति ।

गत्यैश्वर्यादिश्रुतिविरोध इति चेत् । अथापि स्याद्यद्यप्राप्यो मोक्षस्तदा गतिश्रुतीनां, "स एकधा" "स यदि पितृलोककामो भवति" "स्त्रीभिर्वा यानैर्वा" इत्यादिश्रुतीनां च कोपः स्यादिति चेन्न । कार्यब्रह्मविषयत्वात्तासाम् । कार्ये हि ब्रह्मणि रूपादयः स्युर्न कारणे "एकमेवाद्वितीयम्" "यत्र नान्यत्पश्यति" तत्केन कं पश्येत्" इत्यादिश्रुतिभ्यः । विरोधाच्च विद्याकर्मणोः समुच्चयानुपपत्तिः । प्रविलीनकर्त्रादिकारकविशेषतत्त्वविषया हि विद्या तद्विपरीतकारकसाध्येन कर्मणा विरुध्यते । न ह्येकं वस्तु परमार्थतः कर्त्रादिविशेषवत्तच्छून्यं चेत्युभयथा द्रष्टुं शक्यते । अवश्यं ह्यन्यतरन्मिथ्या स्यादन्यतरस्य च मिथ्यात्वप्रसङ्गे युक्तं यत्स्वाभाविकाज्ञानविषयस्य द्वैतस्य मिथ्यात्वम्, "यत्र हि द्वैतमिव भवति" "मृत्योः स मृत्युमाप्नोति" "अथ यत्रान्यत्पश्यति तदल्पम्" "अन्योऽसावन्योऽहमस्मि" "उदरमन्तरं कुरुते" "अथ तस्य भयं भवति" इत्यादिश्रुतिशतेभ्यः । सत्यत्वं चैकत्वस्यैकधैवानुद्रष्टव्यम् । "एकमेवाद्वितीयम्" "ब्रह्मैवेदꣳ सर्वम्" "आत्मैवेदꣳ सर्वम्" इत्यादिश्रुतिभ्यः । न च संप्रदानादिकारकभेदादर्शने कर्मोपपद्यते । अन्यत्वदर्शनापवादश्च विद्याविषये सहस्रशः श्रूयते । अतो विरोधो विद्याकर्मणोः । अतश्च समुच्चयानुपपत्तिः ।

---

१ ग. °बन्धे हे° । २ ज. °कार्यपे° । ३ क. °प्तिरपूर्वस्य । ४ झ. गत्या । ५ च. मोक्षोऽस्ति सदा ।

गत्यादिश्रुतेस्तात्पर्यं शङ्कापूर्वकं दर्शयति—गत्यैश्वर्येत्यादिना । समुच्चयमभ्युपगम्य कर्मकार्यं किंचिन्मोक्षे न संभवतीत्युक्तम् । सोऽपि न संभवतीत्याह—विरोधाचेत्यादिना ।

तत्र यदुक्तं संहताभ्यां विद्याकर्मभ्यां मोक्ष इति । अनुपपन्नं तत् । विहितत्वात्कर्मणां श्रुतिविरोध इति चेत् । यद्युपमृद्य कर्त्रादिकारकविशेषमात्मैकत्वविज्ञानं विधीयते । सर्पादिभ्रान्तिविज्ञानोपमर्दकरज्ज्वादिविषयविज्ञानवत्प्राप्तः कर्मविधिश्रुतीनां निर्विषयत्वाद्विरोधः । विहितानि च कर्माणि । स च विरोधो न युक्तः । प्रमाणत्वाच्छ्रुतीनामिति चेन्न । पुरुषार्थोपदेशपरत्वाच्छ्रुतीनाम् ।

यदि कर्त्रादिकारकभेदस्य सत्यत्वांशमपबाध्य ब्रह्मज्ञानमुपदिश्यते तदा मिथ्यार्थत्वात्कर्मविधीनामप्रामाण्यं स्यादित्याह—विहितत्वादिति । शङ्कां विवृणोति —यदीत्यादिना । अध्ययनविधिगृहीतानां श्रुतीनां पुरुषार्थोपदर्शकत्वेन प्रामाण्यं वक्तव्यम् । न तु भेदस्य सत्यत्वेन । ततः प्रसिद्धिसिद्धं कारकादिभेदमर्थक्रियासमर्थमादाय प्रवृत्तानां प्रामाण्यं न विरुध्यत इत्याह—न पुरुषार्थेति ।

विद्योपदेशपरा तावच्छ्रुतिः संसारात्पुरुषो मोक्षयितव्य इति संसारहेतोरविद्याया विद्यया निवृत्तिः कर्तव्येति विद्याप्रकाशकत्वेन प्रवृत्तेति न विरोधः । एवमपि कर्त्रादिकारकसद्भावप्रतिपादनपरं शास्त्रं विरुध्यत एवेति चेन्न । यथाप्राप्तमेव कारकास्तित्वमुपादायोपात्तदुरितक्षयार्थं कर्माणि विदधच्छास्त्रं मुमुक्षूणां फलार्थिनां च फलसाधनं न कारकास्तित्वे व्याप्रियते । उपचितदुरितप्रतिबन्धस्य हि विद्योत्पत्तिर्नावकल्पते । तत्क्षये च विद्योत्पत्तिः स्यात्ततश्चाविद्यानिवृत्तिस्तत आत्यन्तिकः संसारोपरमः ।

संग्रहवाक्यं विवृणोति—विद्योपदेशपरा तावदित्यादिना ।

अपि चानात्मदर्शिनो ह्यनात्मविषयः कामः । कामयमानश्च करोति कर्माणि । ततस्तत्फलोपभोगाय शरीराद्युपादानलक्षणः संसारः । तद्व्यतिरेकेणाऽऽत्मैकत्वदर्शिनो विषयाभावात्कामानुत्पत्तिरात्मनि चानन्यत्वात्कामानुत्पत्तौ स्वात्मन्यवस्थानं मोक्ष इत्यतोऽपि विद्याकर्मणोर्विरोधः ।

---

१ ख. ग. घ. ङ. च. छ. ज. ट. °नुपपत्ति° । २ घ. ङ. छ. ञ. °नुपपत्तौ ।

पूर्वं सत्यमिथ्याविषयत्वेन विद्याकर्मणोर्विरोधमादाय समुच्चयो निरस्तः । इदानीं काम्यकामिविषयत्वेन विरोधमाह—अपि चेत्यादिना ।

विरोधादेव च विद्या मोक्षं प्रति न कर्माण्यपेक्षते । स्वात्मलाभे तु पूर्वोपचितप्रतिबन्धापनयद्वारेण विद्याहेतुत्वं प्रतिपद्यन्ते कर्माणि नित्यानीति । अत एवास्मिन्प्रकरण उपन्यस्तानि कर्माणीत्यवोचाम । एवं चाविरोधः कर्मविधिश्रुतीनाम् । अतः केवलाया एव विद्यायाः परं श्रेय इति सिद्धम् ।

समसमुच्चयं निरस्य गुणप्रधानभावेनापि समुच्चयं निरस्यति—विरोधादेव चेति । विद्या चेत्कर्माणि स्वफले नापेक्षते विरुद्धत्वान्त्रिदण्डिधर्मवदृतुगमनं कथं तर्हि विद्यासंनिधाने कर्मणां पाठ इत्यत आह—स्वात्मलाभे त्विति । कर्मणां विद्यासाधनत्वं श्रुत्वा गार्हस्थ्यमेवैकमनुष्ठेयमिति प्रत्यवतिष्ठन्ते कर्मजडाः ।

एवं तर्ह्याश्रमान्तरानुपपत्तिः । कर्मनिमित्तत्वाद्विद्योत्पत्तेः । गार्हस्थ्ये च विहितानि कर्माणीत्यैकाश्रम्यमेव । अतश्च यावज्जीवादिश्रुतयोऽनुकूलतराः । न । कर्मानेकत्वात् । न ह्यग्निहोत्रादीन्येव कर्माणि । ब्रह्मचर्यं तपः सत्यवदनं शमो दमोऽहिंसेत्येवमादीन्यपि कर्माणीतराश्रमप्रसिद्धानि विद्योत्पत्तौ साधकतमान्यसंकीर्णत्वाद्विद्यन्ते ध्यानधारणादिलक्षणानि च । वक्ष्यति च—"तपसा ब्रह्म विजिज्ञासस्व" इति । जन्मान्तरकृतकर्मभ्यश्च प्रागपि गार्हस्थ्याद्विद्योत्पत्तिसंभवात्कर्मार्थत्वाच्च गार्हस्थ्यप्रतिपत्तेः । कर्मसाध्यायां च विद्यायां सत्यां गार्हस्थ्यप्रतिपत्तिरनर्थिकैव । लोकार्थत्वाच्च पुत्रादीनाम् । पुत्रादिसाध्येभ्यश्चायं लोकः पितृलोको देवलोक इत्येतेभ्यो व्यावृत्तकामस्य नित्यसिद्धात्मलोकदर्शिनः कर्मणि प्रयोजनमपश्यतः कथं प्रवृत्तिरुपपद्यते प्रतिपन्नगार्हस्थ्यस्यापि विद्योत्पत्तौ विद्यापरिपाकाद्विरक्तस्य कर्मसु प्रयोजनमपश्यतः कर्मभ्यो निवृत्तिरेव स्यात् । "प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि" इत्येवमादिश्रुतिलिङ्गदर्शनात् । कर्म प्रति श्रुतेर्यत्नाधिक्यदर्शनादयुक्तमिति चेदग्निहोत्रादिकर्म प्रति श्रुतेरधिको यत्नो महांश्च कर्मण्यायासोऽनेकसाधनसाध्यत्वादग्निहोत्रादीनाम् । तपोब्रह्मचर्यादीनां चेतराश्रमकर्मणां गार्हस्थ्येऽपि समानत्वादल्पसाधनापेक्षत्वाच्चेतरेषां न युक्तस्तुल्यवद्विकल्प आश्रमिभिस्तस्येति चेन्न । जन्मान्तरकृतानुग्रहात् ।

---

१ ख. ग. च. काम्याकाम्यवि° ।

एवं तर्हीति । श्रुतिस्मृतिष्वाश्रमान्तराणामपि विहितत्वाविशेषात्तदीयकर्मसु कर्मत्वाविशेषाच्च ग्राम्यधर्मरागिणामेवैतच्चोद्यमित्याह—न कर्मानेकत्वादिति । असंकीर्णत्वादिति । हिंसाद्यमिश्रितत्वादित्यर्थः । इतश्च कर्मणो विद्यासाधनत्वेऽपि न गार्हस्थ्यमावश्यकमित्याह—जन्मान्तरेति । कामिनां गार्हस्थ्यस्यानुष्ठेयत्वेऽपि न सर्वैरनुष्ठेयत्वमित्यत्र हेत्वन्तरमाह—लोकार्थत्वाच्चेत्यादिना । गार्हस्थ्यस्यानावश्यकत्वेन वैकल्पिकमनुष्ठानमुक्तं तत्रातुल्यबलत्वेन विकल्पमाक्षिपति—कर्म प्रति श्रुतेरिति ।

यदुक्तं कर्मणि श्रुतेरधिको यत्न इत्यादि । नासौ दोषः । यतो जन्मान्तरकृतमप्यग्निहोत्रादिलक्षणं कर्म ब्रह्मचर्यादिलक्षणं चानुग्राहकं भवति विद्योत्पत्तिं प्रति । येन जन्मनैव विरक्ता दृश्यन्ते केचित् । केचित्तु कर्मसु प्रवृत्ता अविरक्ता विद्याद्वेषिणः । तस्माज्जन्मान्तरकृतसंस्कारेभ्यो विरक्तानामाश्रमान्तरप्रतिपत्तिरेवेष्यते । कर्मफलबाहुल्याच्च पुत्रस्वर्गब्रह्मवर्चसादिलक्षणस्य कर्मफलस्यासंख्येयत्वात् । तत्प्रति च पुरुषाणां कामबाहुल्यात्तदर्थः श्रुतेरधिको यत्नः कर्मसूपपद्यते । आशिषां बाहुल्यदर्शनादिदं मे स्यादिदं मे स्यादित्युपायत्वाच्च । उपायभूतानि हि कर्माणि विद्यां प्रतीत्यवोचाम । उपायेऽधिको यत्नः कर्तव्यो नोपेये ।

जन्मान्तरकृतानुग्रहादिति परिहारभाष्यं विवृणोति—यदुक्तमित्यादिना । कर्मणि यत्नाधिक्यस्यान्यथासिद्धत्वाद्विकल्पविघातकत्वं न संभवतीत्यर्थः ।

कर्मनिमित्तत्वाद्विद्याया यत्नान्तरानर्थक्यमिति चेत्कर्मभ्य एव पूर्वोपचितदुरितप्रतिबन्धक्षयादेव विद्योत्पद्यते चेत्कर्मभ्यः पृथगुपनिषच्छ्रवणादियत्नोऽनर्थक इति चेत् । न । नियमाभावात् । न हि प्रतिबन्धक्षयादेव विद्योत्पद्यते नत्वीश्वरप्रसादतपोध्यानाद्यनुष्ठानादिति नियमोऽस्ति । अहिंसाब्रह्मचर्यादीनां च विद्यां प्रत्युपकारकत्वात्साक्षादेव च कारणत्वाच्छ्रवणमनननिदिध्यासनानाम् । अतः सिद्धान्याश्रमान्तराणि । सर्वेषां चाधिकारो विद्यायां परं च श्रेयः केवलाया विद्याया एवेति सिद्धम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्यायभाष्ये द्वादशोऽनुवाकः ॥ १२ ॥

---

१ क. ख. ग. 'मिश्रत्वादि' ।

इदानीं गृहस्थाश्रमकर्मणां बहिरङ्गत्वं संन्यासाश्रमकर्मणां त्वन्तरङ्गविद्यासाधनत्वमिति विशेषं दर्शयितुं चोद्यमुद्भावयति—कर्मनिमित्तत्वादित्यादिना ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां शीक्षाध्याये द्वादशोऽनुवाकः ॥ १२ ॥

शं नः शीक्षा१ सह नौ यश्छन्दसां भूः स यः पृथिव्योमित्यृतं चाहं वेदमनूच्य शं नो द्वादश ॥

शं नो मह इत्यादित्यो नो इतराणि त्रयोविंशतिः ॥

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ।

ॐ शान्तिः शान्तिः शान्तिः ।

हरिः ॐ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि शीक्षाध्यायः समाप्तः * ॥ १ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य शंकरभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्ये प्रथमः शीक्षाध्यायः ॥ १ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दभगवत्पूज्यपादशिष्यश्रीमद्भगवदानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां प्रथमः शीक्षाध्यायः ॥ १ ॥

---

* तैत्तिरीयारण्यकक्रमेण सप्तमप्रपाठकस्य समाप्तिरत्र ।

१ क. "थिव्यमोमि" ।

अथ तैत्तिरीयोपनिषदि

द्वितीयो ब्रह्मवल्ल्यध्यायः ।

तत्र प्रथमोऽनुवाकः ।

हरिः ॐ ।

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ॥

शं नो मित्र इत्याद्यतीतविद्याप्राप्त्युपसर्गप्रशमनार्था शान्तिः पठिता । इदानीं तु वक्ष्यमाणब्रह्मविद्याप्राप्त्युपसर्गोपशमनार्था शान्तिः पठ्यते—शं नो मित्र इति । सह नाववत्विति च । शं नो मित्र इत्यादि पूर्ववत्स्पष्टम् । सह नाववतु नौ शिष्याचार्यौ सहैवावतु रक्षतु । सह नौ भुनक्तु भोजयतु । सह वीर्यं विद्यादि निमित्तं सामर्थ्यं करवावहै निर्वर्तयावहै । तेजस्वि नावावयोस्तेजस्विनोरधीतं स्वधीतमस्तु । अर्थज्ञानयोग्यमस्त्वित्यर्थः[1] । मा विद्विषावहै विद्याग्रहणनिमित्तं शिष्यस्याऽऽचार्यस्य वा प्रमादकृतादन्यायाद्विद्वेषः प्राप्तस्तच्छमनायेयमाशीर्मा विद्विषावहा इति । मैवेतरेतरं विद्वेषमापद्यावहै । शान्तिः शान्तिः शान्तिरिति

---

१ क. ग. घ. छ. ञ. ट. °नर्सयोग्यस्त्वि° ।

त्रिर्वचनमुक्तार्थम् । वक्ष्यमाणविद्याविघ्नप्रशमनार्थं चेयं शान्तिः । अविघ्नेनाऽऽत्मविद्याप्राप्तिराशास्यते तन्मूलं हि परं श्रेय इति ।

शान्तिद्वयस्यापौनरुक्त्यमाह— शं नो मित्र इति । इदानीं परविद्यार्थिनमप्यवतु । साधारण्येन मया पूर्वं प्रार्थितत्वादित्यर्थः । असाधारण्येन परविद्योपसर्गशान्त्यर्थमाह— सह नाववत्विति । नावावयोस्तेजस्विनोरधीतं तेजस्व्यस्त्विति योजना ।

ॐ ब्रह्मविदाप्नोति परम् ।

संहितादिविषयाणि कर्मभिरविरुद्धान्युपासनान्युक्तानि । अनन्तरं चान्तःसोपाधिकात्मदर्शनमुक्तं व्याहृतिद्वारेण स्वाराज्यफलम् । नचैतावताऽशेषतः संसारबीजस्योपमर्दनमस्तीत्यतोऽशेषोपद्रवबीजस्याज्ञानस्य निवृत्त्यर्थं विधूतसर्वोपाधिविशेषात्मदर्शनार्थमिदमारभ्यते—ब्रह्मविदाप्नोति परमित्यादि । प्रयोजनं चास्या ब्रह्मविद्याया अविद्यानिवृत्तिस्तत आत्यन्तिकः संसाराभावः । वक्ष्यति च—"विद्वान्न बिभेति कुतश्चन" इति । संसारनिमित्ते च सत्यभयं प्रतिष्ठां च विन्दत इत्यनुपपन्नम् । "कृताकृते पुण्यपापे न तपतः" इति च । अतोऽवगम्यतेऽस्माद्विज्ञानात्सर्वात्मब्रह्मविषयादात्यन्तिकः संसाराभाव इति । स्वयमेव च प्रयोजनमाह—ब्रह्मविदाप्नोति परमित्यादावेव संबन्धप्रयोजनज्ञापनार्थम् । निर्ज्ञातयोर्हि संबन्धप्रयोजनयोर्विद्याश्रवणग्रहणधारणाभ्यासार्थं प्रवर्तते । श्रवणादिपूर्वकं हि विद्याफलम् "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यादिश्रुत्यन्तरेभ्यः । ब्रह्मविद्ब्रह्मेति वक्ष्यमाणलक्षणं बृहत्तमत्वाद्ब्रह्म तद्वेत्ति विजानातीति ब्रह्मविदाप्नोति परं निरतिशयं तदेव ब्रह्म परम् । न ह्यन्यस्य विज्ञानादन्यस्य प्राप्तिः । स्पष्टं च श्रुत्यन्तरं ब्रह्मप्राप्तिमेव ब्रह्मविदो दर्शयति- "स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति" इत्यादि ।

वृत्तानुवादपूर्वकमानन्दवल्ल्यास्तात्पर्यमाह—संहितादीत्यादिना । ननु यथा पूर्वमाप्नोति स्वाराज्यमित्यपरविद्याफलमुक्तं संसारगोचरमेव तथा परविद्याफलमपि "सोऽश्नुते सर्वान्कामान्" इति सर्वविषयसाध्यानन्दान्संसारगोचरानेव दर्शयिष्यति । कथमात्यन्तिकः संसाराभाव इत्यत आह—प्रयोजनं चास्या इति । सर्वकामशब्देन निरतिशयानन्दाभिव्यक्तिर्विवक्षिता । सा च स्वभावानन्दा[1]नभिव्यक्तिरूपाविद्यानिवृत्तिरेवेति न संसारगोचरं फलमित्यर्थः । आद्यवाक्यस्यावान्तरतात्पर्यमाह—स्वयमेव चेति ।

---

१ ख. ज. °न्दाभिव्यक्तिरूपाऽवि° ।

विद्ययैव केवलया मोक्षः साधयितुं शक्यते । ब्रह्मविदितिविशेषणात्संबन्धज्ञापनस्य पुरुषाकाङ्क्षाविषयतया परप्राप्तिः प्रयोजनं विद्याया इति ज्ञापनस्य वा कुत्रोपयोग इत्याशङ्क्य यज्ञादिपरित्यागेन वेदान्तश्रवणादावेव मुमुक्षुणा प्रवर्तितव्यमित्यत्रेत्याह—निर्ज्ञातयोर्हीति । परशब्देनोत्कृष्टमुच्यते । कथं ब्रह्मेति व्याख्यायते तत्राऽऽह—न हीति ।

ननु सर्वगतं सर्वस्याऽऽत्मभूतं ब्रह्म वक्ष्यति । अतो नाऽऽप्यं प्राप्तिश्चान्यस्यान्येन परिच्छिन्नस्य च परिच्छिन्नेन दृष्टा । अपरिच्छिन्नं सर्वात्मकं च ब्रह्मेत्यतः परिच्छिन्नवदनात्मवच्च तस्याऽऽप्तिरनुपपन्ना । नायं दोषः । कथम् । दर्शनादर्शनापेक्षत्वाद्ब्रह्मण आप्त्यनाप्त्योः । परमार्थतो ब्रह्मरूपस्यापि सतोऽस्य जीवस्य भूतमात्राकृतबाह्यपरिच्छिन्नान्नमयाद्यात्मदर्शिनस्तदासक्तचेतसः प्रकृतसंख्यापूरणस्याऽऽत्मनोऽव्यवहितस्यापि बाह्यसंख्येयविषयासक्तचित्ततया स्वरूपाभावदर्शनवत्परमार्थब्रह्मस्वरूपाभावदर्शनलक्षणयाऽविद्ययाऽन्नमयादीन्बाह्याननात्मन आत्मत्वेन प्रतिपन्नत्वादन्नमयाद्यनात्मभ्यो नान्योऽहमस्मीत्यभिमन्यते । एवमविद्ययाऽऽत्मभूतमपि ब्रह्मानाप्तं स्यात् । तस्यैवमविद्ययाऽनाप्तब्रह्मस्वरूपस्य प्रकृतसंख्यापूरणस्याऽऽत्मनोऽविद्ययाऽनाप्तस्य सतः केनचित्स्मारितस्य पुनस्तस्यैव विद्ययाऽऽप्तिर्यथा तथा श्रुत्युपदिष्टस्य सर्वात्मब्रह्मण आत्मत्वदर्शनेन विद्यया तदाप्तिरुपपद्यत एव ।

आप्नोतिशब्दस्यौपचारिकमर्थं दर्शयितुं शङ्कामुखेन मुख्यार्थे बाधकमाह—ननु सर्वगतमित्यादिना । परमार्थतो ब्रह्मस्वरूपस्यापि सतो जीवस्याविद्यया ब्रह्मानाप्तं स्यादिति संबन्धः । भूतमात्राभिर्भूतांशैः कृता ये बाह्याः परिच्छिन्नाश्चान्नमयादयस्तदात्मत्वदर्शिन इत्यविद्याया विक्षेपकत्वं स्वरूपमुक्तम् । परमार्थं ब्रह्मस्वरूपं नास्तीत्यभावदर्शनमावरणलक्षणं लिङ्गं यस्याः सा तथोक्ता । स्वरूपेऽप्यग्रहणविपर्ययौ भवत इत्यत्र दृष्टान्तमाह—प्रकृतेति । प्रकृतसंख्यापूरणस्य दशमस्य नवैव वयं वर्तामह इति विपर्ययः स्वरूपादर्शनं च यथेत्यर्थः । अदर्शननिमित्तामनाप्तिं विविच्य दर्शननिमित्तामाप्तिं विवृणोति—तस्यैवमिति ।

ब्रह्मविदाप्नोति परमिति वाक्यं सूत्रभूतं सर्वस्य वल्ल्यर्थस्य ब्रह्मविदाप्नोति परमित्यनेन वाक्येन वेद्यतया सूत्रितस्य ब्रह्मणोऽनिर्धारितस्वरूपविशेषस्य सर्वतो व्यावृत्तस्वरूपविशेषसमर्पणसमर्थस्य लक्षणस्याभिधानेन स्वरूपनिर्धारणायाविशेषेण चोक्तवेदनस्य ब्रह्मणो वक्ष्यमाणलक्षणस्य

---

१ ख. ग. °ज्ञानस्य । २ ज. झ. ज्ञानस्य । ३ ठ. °मित्याह ।

विशेषेण प्रत्यगात्मतयाऽनन्यरूपेण विज्ञेयत्वाय ब्रह्मविद्याफलं च ब्रह्मविदो यत्परब्रह्मप्राप्तिलक्षणमुक्तं स सर्वात्मभावः सर्वसंसारधर्मातीतब्रह्मस्वरूपत्वमेव नान्यादित्येतत्प्रदर्शनायैषर्गुदाह्रियते—

तदेषाऽभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म ।

तदेषाऽभ्युक्तेति । तत्तस्मिन्नेव ब्राह्मणवाक्योक्तेऽर्थ एषर्गभ्युक्ताऽऽम्नाता । सत्यं ज्ञानमनन्तं ब्रह्मेति ब्रह्मणो लक्षणार्थं वाक्यम् । सत्यादीनि हि त्रीणि विशेषणार्थानि पदानि विशेष्यस्य ब्रह्मणः । विशेष्यं ब्रह्म विवक्षितत्वाद्वेद्यतया । विशेषणविशेष्यत्वादेव सत्यादीन्येकविभक्त्यन्तानि पदानि समानाधिकरणानि । सत्यादिभिस्त्रिभिर्विशेषणैर्विशेष्यमाणं ब्रह्म विशेष्यान्तरेभ्यो निर्धार्यते । एवं हि तज्ज्ञानं भवति यदन्येभ्यो निर्धारितम् । यथा लोके नीलं महत्सुगन्ध्युत्पलमिति ।

आद्यं ब्राह्मणवाक्यं व्याख्यायोत्तरं मन्त्रं संक्षेपतोऽर्थकथनेनावतारयति—ब्रह्मविदाप्नोतीत्यादिना । सर्वतो व्यावृत्तो यः स्वरूपविशेषस्तत्समर्पणे समर्थस्य लक्षणस्याभिधानेन स्वरूपनिर्धारणायैषर्गुदाह्रियत इति संबन्धः । बृहत्त्वाद्ब्रह्मेति व्युत्पत्तिबलेनास्ति किमपि महद्वस्त्वित्यविशेषेण प्रतीयते । ततो लक्ष्योद्देशेन लक्षणविधानमिति प्रसिद्धिरुपपद्यते । अव्याकृतादि ब्रह्मशब्दवाच्यतया सजातीयं घटादि विजातीयम् । तस्मात्सजातीयविजातीयव्यावर्तकतया सत्यादिलक्षणस्य लक्षणत्वप्रसिद्धिरुपपद्यते । लक्षणाभिधानद्वारेण स्वरूपविशेषप्रतिपादने तात्पर्यमिति वाक्यस्य व्यर्थतादोषः परिहृतः । पूर्वत्र ब्रह्मविदित्यनेनाविशेषेणोक्तं वेदनं यस्य ब्रह्मणस्तस्य यो वेद निहितं गुहायामित्यनेन प्रत्यगात्मतया वेदनं वक्तव्यमित्येवमर्था चगुदाह्रियत इत्याह—अविशेषेण चेति । आपातप्रतिपन्नं विशेषणविशेष्यभावमादाय पदानि विभजते—सत्यादीनि हि त्रीणीति । विशेषणार्थानीति । व्यावृत्त्यर्थानि । कुतो विशेषणविशेष्यभावप्रतीतिरित्यत आह—विशेषणविशेष्यत्वादेवेति । नीलं महत्सुगन्ध्युत्पलमित्यादौ सत्येव विशेषणविशेष्यभावे समानाधिकरणतयैकविभक्त्यन्तानि प्रसिद्धान्येतान्यपि च तथाभूतानि नानार्थगतविशेषणविशेष्यभावनिबन्धनानीति गम्यत इत्यर्थः । विशेषणविशेष्यभावस्य फलमाह—एवं हीति ।

ननु विशेष्यं विशेषणान्तरं व्यभिचरद्विशेष्यते । यथा नीलं रक्तं चोत्पलमिति । यदा ह्यनेकानि द्रव्याण्येकजातीयान्यनेकविशेषणयोगीनि तदा विशे-

---

१ झ. °त्तरमत्र सं° ।

षणस्यार्थवत्त्वम् । न ह्येकस्मिन्नेव वस्तुनि विशेषणान्तरायोगाद्यथाऽसावेक आदित्य इति तथैकमेव च ब्रह्म न ब्रह्मान्तराणि येभ्यो विशेष्येत नीलोत्पलवत् । न । लक्षणार्थत्वाद्विशेषणानाम् । नायं दोषः । कस्मात् । यस्माल्लक्षणार्थप्रधानानि विशेषणानि न विशेषणप्रधानान्येव । कः पुनर्लक्षणलक्ष्ययोर्विशेषणविशेष्ययोर्वा विशेष इति । उच्यते । समानजातीयेभ्य एव निवर्तकानि विशेषणानि विशेष्यस्य लक्षणं तु सर्वत एव यथाऽवकाशदात्राकाशमिति । लक्षणार्थं च वाक्यमित्यवोचाम ।

विशेषणविशेष्यभावमाक्षिपति—नन्विति । नीलत्वं व्यभिचरदुत्पलं रक्तमपि संभवतीति नीलं विशेषणं घटते न तथा सत्यत्वादिकं व्यभिचरद्ब्रह्मान्तरं लोके प्रसिद्धम् । ततः सजातीयव्यवच्छेद्यस्याभावाद्विशेषणविशेष्यभावो न घटत इत्यर्थः । विशेषणविशेष्यभावस्य तात्पर्येणाप्रतिपाद्यत्वादव्याकृतादिशास्त्रीयब्रह्मपदार्थव्यवच्छेदेनानिर्वाच्यविशेषणविशेष्यभावसंभवात्तद्द्वारेण ब्रह्मलक्षणं विवक्षितमित्याह—नेति । संग्रहवाक्यं विवृणोति—नायं दोष इत्यादिना । सर्वत एवेति । सजातीयाद्विजातीयाच्च यथा महाभूतत्वेन सदृशभावात्पृथिव्यादेर्विसदृशाच्चाऽऽत्मादेराकाशस्य व्यावर्तकमवकाशदातृत्वमित्यर्थः।एतदुक्तं भवति—अतिव्याप्त्यादिरहितो व्यावर्तको धर्मो लक्षणं न्यायविशेष इति मीमांसकाः। ब्रह्मपदव्युत्पत्तिबलेन यदविशेषतः प्रतिपन्नं किंचिन्महदस्तीति तत्सत्यं ज्ञानमनन्तमनृतजडपरिच्छेदविरोधिस्वरूपमिति विशेषतः प्रतिपत्तव्यमिति विशेषावगतिशेषभूतं लक्षणं प्रमितिस्तु प्रमाणादेवेति तार्किकाः । पुनर्लक्षणं केवलव्यतिरेक्यनुमानमाचक्षते तदा लक्षणादेव स्वभावविशेषप्रमितिः । यथा गुणवद्द्रव्यमिति लक्षणाद्गुणाश्रयत्वयोग्यस्वभावविशेषस्य प्रमितिः सामान्यप्रतिपन्नस्य द्रव्यपदाभिधेयस्य भवति । यद्वा व्यवहारसिद्धिः फलं गुणवद्द्रव्यमिति व्यवहर्तव्यं गुणवत्त्वान्न यदेवं न तदेवं यथा रूपं तथा सत्यत्वादिमद्ब्रह्मेति व्यवहर्तव्यं सत्यत्वादिभावान्न यदेवं न तदेवं यथा घट इति । एतच्च खण्डनयुक्त्यसहमानमपि व्यवहाराङ्गं भवतीति नातीव सूक्ष्मेक्षिका[1] कार्या ।

सत्यादिशब्दा न परस्परं संबध्यन्ते परार्थत्वाद्विशेष्यार्था हि ते । अत एकैको विशेषणशब्दः परस्परं निरपेक्षो ब्रह्मशब्देन संबध्यते । सत्यं ब्रह्म ज्ञानं ब्रह्मानन्तं ब्रह्मेति । सत्यमिति यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत्सत्यं यद्रूपेण निश्चितं यत्तद्रूपं व्यभिचरदनृतमित्युच्यते । अतो विकारोऽनृतं "वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" एवं सदेव

---

१ अ. ठ. सूक्ष्मशङ्का का° ।

सत्यमित्यवधारणादतः सत्यं ब्रह्मेति ब्रह्म विकारान्निवर्तयति । अतः कारणत्वं प्राप्तं ब्रह्मणः । कारणस्य च कारकत्वं वस्तुत्वान्मृद्वदचिद्रूपता च प्राप्ताऽत इदमुच्यते ज्ञानं ब्रह्मेति । ज्ञानं ज्ञप्तिरवबोधो भावसाधनो ज्ञानशब्दो ब्रह्मविशेषणत्वात्सत्यानन्ताभ्यां सह । न हि सत्यताऽनन्तता च ज्ञानकर्तृत्वे सत्युपपद्यते । ज्ञानकर्तृत्वेन हि विक्रियमाणं कथं सत्यं भवेदनन्तं च । यद्धि न कुतश्चित्प्रविभज्यते तदनन्तम् । ज्ञानकर्तृत्वे च ज्ञेयज्ञानाभ्यां प्रविभक्तमित्यनन्तता न स्यात् । " यत्र नान्यद्विजानाति स भूमा " " अथ यत्रान्यद्विजानाति तदल्पम् " इति श्रुत्यन्तरात् ।

पुनर्विशेषणविशेष्यभावपक्ष[१]मवलम्ब्याऽऽह—सत्यादिशब्दा इति । सत्यं ब्रह्मेत्युक्ते जाड्यव्यावृत्तिः परिच्छेदव्यावृत्तिश्च यद्यपि लभ्यते जडस्य परिच्छिन्नस्य सर्वस्यानृतत्वाज्ज्ञानं ब्रह्मेत्युक्ते चानृतपरिच्छेदव्यावृत्तिर्लभ्यते स्वप्रकाशस्य बाधाविषयत्वात्परिच्छेदग्राहकप्रमाणाविषयत्वाच्च लक्षणमपि[२] चैकैकं वैकल्पिकमदुष्टं तथाऽपि मन्दमतिव्युत्पाद[३]नाय स्यात्सत्यादिपदार्थव्याख्यानपूर्वकं प्रत्येकं व्यावर्त्यमाह—सत्यमिति यद्रूपेणेत्यादिना । भावसाधन इति । भावव्युत्पत्तिकः । क्रियासामान्यं यद्यप्यन्यत्र भाव उच्यते तथाऽप्यत्र निर्विशेषं चिन्मात्रं भावव्युत्पत्त्या लक्ष्यते सत्यादिशब्दसंनिधानादिति द्रष्टव्यम् ।

नान्यद्विजानातीति विशेषप्रतिषेधादात्मानं विजानातीति चेन्न । भूमलक्षणविधिपरत्वाद्वाक्यस्य । यत्र नान्यत्पश्यतीत्यादि भूम्नो लक्षणविधिपरं वाक्यम् । यथा प्रसिद्धमेवान्योऽन्यत्पश्यतीत्येतदुपादाय यत्र तन्नास्ति स भूमेति भूमस्वरूपं तत्र ज्ञाप्यतेऽन्यग्रहणस्य प्राप्तप्रतिषेधार्थत्वान्न स्वात्मनि क्रियास्तित्वपरं वाक्यम् । स्वात्मनि च भेदाभावाद्विज्ञानानुपपत्तिः । आत्मनश्च विज्ञेयत्वे ज्ञात्रभावप्रसङ्गः । ज्ञेयत्वेनैव विनियुक्तत्वात् । एक एवाऽऽत्मा ज्ञेयत्वेन ज्ञातृत्वेन चोभयथा भवतीति चेन्न । युगपदनंशत्वात् । न हि निरवयवस्य युगपज्ज्ञेयज्ञातृत्वोपपत्तिः । आत्मनश्च घटादिवद्विज्ञेयत्वे ज्ञानोपदेशानर्थक्यम् । न हि घटादिवत्प्रसिद्धस्य ज्ञानोपदेशोऽर्थवान् । तस्माज्ज्ञातृत्वे सत्यानन्त्यानुपपत्तिः । सन्मात्रत्वं चानुपपन्नं ज्ञानकर्तृत्वादिविशेषवत्त्वे सति । सन्मात्रत्वं च सत्यत्वम् । तत्सत्यमिति श्रुत्यन्तरात् । तस्मात्सत्यानन्तशब्दाभ्यां सह विशेषणत्वेन ज्ञानशब्दस्य प्रयोगाद्भावसाधनो ज्ञानशब्दः । ज्ञानं ब्रह्मेति

---

१ ज. झ. ठ. °क्षद्वयम° । २ ग. झ. °पि वैकं वै° । ३ ख. ग. °दनीयं स्या° ।

कर्तृत्वादिकारकनिवृत्त्यर्थं मृदादिवदचिद्रूपतानिवृत्त्यर्थं च प्रयुज्यते । ज्ञानं ब्रह्मेतिवचनात्प्राप्तमन्तवत्त्वम् । लौकिकस्य ज्ञानस्यान्तवत्त्वदर्शनात् । अतस्तन्निवृत्त्यर्थमाह—अनन्तमिति ।

विशेषनिषेधः शेषाभ्यनुज्ञाविषय इति न्यायेन प्रासङ्गिकं स्वज्ञातृत्वे तात्पर्यमाशङ्क्य निषेधति—नान्यद्विजानातीत्यादिना । कर्तृत्वं कर्मत्वं चैकक्रियावच्छिन्नं धर्मद्वयं भिन्नाधिकरणं प्रसिद्धम् । स्वात्मनि च भेदाभावान्निरुपपत्तिके स्वज्ञातृत्वे तात्पर्यं कल्पयितुं न शक्यत इत्याह—स्वात्मनि चेति ।

सत्यादीनामनृतादिधर्मनिवृत्तिपरत्वाद्विशेष्यस्य ब्रह्मण उत्पलादिवदप्रसिद्धत्वात् ।

" मृगतृणाम्भसि स्नातः खपुष्पकृतशेखरः ।
एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः " ॥

इतिवच्छून्यार्थतैव प्राप्ता सत्यादिवाक्यस्येति चेन्न । लक्षणार्थत्वात् । विशेषणत्वेऽपि सत्यादीनां लक्षणार्थप्राधान्यमित्यवोचाम । शून्ये हि लक्ष्येऽनर्थकं लक्षणवचनं लक्षणार्थत्वान्मन्यामहे न शून्यार्थतेति । विशेषणार्थत्वेऽपि च सत्यादीनां स्वार्थापरित्याग एव ।

सत्यादीनि व्यावृत्त्यर्थानीत्युक्तं तत्र शङ्कते—सत्यादीनामिति । प्रमाणान्तरासिद्धमुत्पलादि विशेष्यं दृष्टं ब्रह्म तु प्रमाणान्तरासिद्धम् । पदमात्रस्याप्रमाणत्वात्सत्यादीनां च व्यावृत्त्यर्थत्वादसदर्थं वाक्यं स्यादित्यर्थः । सिद्धत्वमात्रेण विशेष्यत्वे संभवति प्रमाणान्तरविशेषणमनर्थकं केवलव्यतिरेकाभावान्मिथ्यार्थस्य रज्जुसर्पादेः सदधिष्ठानत्वदर्शनात्प्रपञ्चस्यापि दृश्यत्वादिहेतुभिर्मिथ्यात्वेनावगतस्य सदधिष्ठानत्वं संभाव्यते । तस्य प्रपञ्चाधिष्ठानतया संभावितस्य स्वरूपविशेषलक्षणार्थमिदं वाक्यं ततो नासदर्थत्वमित्याह—न लक्षणार्थत्वादिति । विशेषणार्थत्वमभ्युपगम्याऽऽह—विशेषणार्थत्वेऽपि चेति । नीलं महदित्यादिविशेषणपदानि स्वार्थसमर्पणेन तद्विरुद्धव्यावर्तकानि प्रसिद्धानि, तथा सत्यशब्दोऽप्यबाधितसत्त्वे व्युत्पन्नो ज्ञानशब्दः स्वप्रकाशे विषयसंवेदनेऽनन्तोऽयमाकाश इत्यादावनन्तशब्दो व्यापके । ततः स्वार्थसमर्पणेन विरोधिव्यावर्तकत्वान्न व्यावृत्तिमात्रपर्यवसानमित्यर्थः ।

शून्यार्थत्वे हि सत्यादिशब्दानां विशेष्यनियन्तृत्वानुपपत्तिः । सत्याद्यर्थैरर्थवत्त्वे तु तद्विपरीतधर्मवद्भ्यो विशेषेभ्यो ब्रह्मणो विशेष्यस्य नियन्तृत्वमुपपद्यते । ब्रह्मशब्दोऽपि स्वार्थेनार्थवानेव । तत्रानन्तशब्दोऽन्तवत्त्वप्रतिषेधद्वारेण

१ ख. °णसमर्थे के° । ग. ज. झ. °णमसमर्थे के° । २ क. °सायीत्य° ।

विशेषणम् । सत्यज्ञानशब्दौ तु स्वार्थसमर्पणेनैव विशेषणे भवतः ।

किंच विशेषणस्य व्यावर्तकत्वं सति व्यावर्त्ये घटतेऽतो विशेषणत्वानुपपत्त्यैव सदर्थत्वं वाच्यमित्याह–**शून्यार्थत्वे** हीति । यच्चोक्तं ब्रह्मशब्दोऽप्रसिद्धार्थ इति तत्राऽऽह–**ब्रह्मशब्दोऽपी**ति । "बृह बृहि वृद्धौ" इति धातोर्ब्रह्मेतिशब्दो निष्पन्नो वृद्धौ महत्त्वे वर्तते । तच्च महत्त्वं देशतः कालतो वस्तुतश्चानवच्छिन्नत्वं संकोचकमानान्तराभावान्निरतिशयमहत्त्वसंपन्ने धर्मिणि पर्यवस्यति । ततो वन्ध्यासुतादिशब्दविलक्षणो ब्रह्मशब्द इत्यर्थः । सत्यादिषु त्रिषु विशेषणेष्ववान्तरभेदमाह—**तत्रानन्ते**ति ।

तस्माद्वा एतस्मादात्मन इति ब्रह्मण्येवाऽऽत्मशब्दप्रयोगाद्वेदितुरात्मा ब्रह्म । एतमानन्दमयमात्मानमुपसंक्रामतीति[1] च तत्प्रवेशाच्च । तत्सृष्ट्वा तदेवानुप्राविशदिति च तस्यैव जीवरूपेण शरीरप्रवेशं दर्शयति । अतो वेदितुः स्वरूपं ब्रह्म । एवं तर्ह्यात्मत्वाज्ज्ञानकर्तृत्वमात्मा ज्ञातेति हि प्रसिद्धम् । सोऽकामयतेति च कामिनो ज्ञानकर्तृत्वप्रसिद्धिः । अतो ज्ञानकर्तृत्वाज्ज्ञप्तिर्ब्रह्मेत्ययुक्तमनित्यत्वप्रसङ्गाच्च । यदि नाम ज्ञप्तिर्ज्ञानमिति भावरूपता ब्रह्मणस्तथाऽप्यनित्यत्वं प्रसज्येत पारतन्त्र्यं च । धात्वर्थानां कारकापेक्षत्वात् । ज्ञानं च धात्वर्थोऽतोऽस्यानित्यत्वं परतन्त्रता च । न । स्वरूपाव्यतिरेकेण कार्यत्वोपचारात् । आत्मनः स्वरूपं ज्ञप्तिर्न ततो व्यतिरिच्यतेऽतो नित्यैव तथाऽपि बुद्धेरुपाधिलक्षणायाश्चक्षुरादिद्वारैर्विषयाकारेण परिणामिन्या ये शब्दाद्याकारावभासास्त आत्मविज्ञानस्य विषयभूता उत्पद्यमाना[2] एवाऽऽत्मविज्ञानेन व्याप्ता उत्पद्यन्ते[3] । तस्मादात्मविज्ञानावभासाश्च ते विज्ञानशब्दवाच्याश्च धात्वर्थभूता आत्मन एव धर्मा विक्रियारूपा इत्यविवेकिभिः परिकल्प्यन्ते ।

अनन्तमित्यनेन चाऽऽत्मैक्यं ब्रह्मण उक्तमित्यभिप्रेत्यैक्ये शास्त्रतात्पर्यं दर्शयति—**तस्माद्वा इत्यादिना** । ब्रह्मण आत्मैक्यं चेद्विवक्षितं तर्हि ज्ञानशब्दस्य भावसाधनत्वव्याख्यानं हीयेतेत्याह—**एवं तर्ही**ति । इतश्च भावव्युत्पत्तिरसंगतेत्याह—**अनित्यत्वप्रसङ्गाच्चे**ति । वृत्तिमदन्तःकरणोपहितत्वेनाऽऽत्मनो ज्ञातृत्वं न स्वतः कार्यत्वं च । ज्ञानस्यान्तःकरणवृत्त्युपहितत्वेन तत आत्माभिन्नत्वेऽपि ब्रह्मणो न ज्ञानकर्तृत्वं नापि कार्यत्वं प्रसज्यत इत्याह—**न स्वरूपे**ति ।

यत्तु त(य)द्ब्रह्मणो विज्ञानं तत्सवितृप्रकाशवदग्न्युष्णवच्च ब्रह्मस्वरूपा-

---

१ ख. °ति चाऽऽत्मतां दर्शयति । त° । २ ख. उत्पाद्य° । ३ ठ. उपपद्य° ।

व्यतिरिक्तं स्वरूपमेव तन्न तत्कारणान्तरसव्यपेक्षम् । नित्यस्वरूपत्वात् । सर्व-भावानां च तेनाविभक्तदेशकालत्वात्कालाकाशादिकारणत्वाच्च निरतिशय-सूक्ष्मत्वाच्च न तस्यान्यदविज्ञेयं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भवद्भविष्यद्वाऽस्ति तस्मात्सर्वज्ञं तद्ब्रह्म । मन्त्रवर्णाच्च—

"अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्" इति ।

"न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्‍द्वितीयमस्ति' इत्यादिश्रुतेश्च ।

नित्यं चेज्ज्ञानं तर्हि तत्र ब्रह्मणः कर्तृत्वाभावे कथं सर्वज्ञत्वमित्यत आह—सर्व-भावानां चेति । संविदव्यवधानमेव हि विषयस्य सिद्धिः । सर्वं च संवित्स्वभावेन ब्रह्म-णाऽव्यवहितमिति सर्वज्ञं ब्रह्मोपचर्यत इत्यर्थः । नित्यं ज्ञानं ब्रह्मणि विद्यत इत्यत्र मन्त्रसंमतिमाह—मन्त्रवर्णाच्चेति ।

विज्ञातृस्वरूपाव्यतिरेकात्करणादिनिमित्तानपेक्षत्वाच्च ब्रह्मणो ज्ञान-स्वरूपत्वेऽपि नित्यत्वप्रसिद्धिरतो नैव धात्वर्थस्तदक्रियारूपत्वात् । अत एव च न ज्ञानकर्तृ । तस्मादेव च न ज्ञानशब्दवाच्यमपि तद्ब्रह्म । तथाऽपि तदाभा-सवाचकेन बुद्धिधर्मविषयेण ज्ञानशब्देन तल्लक्ष्यते न तूच्यते । शब्दप्रवृत्तिहेतु-जात्यादिधर्मरहितत्वात् । तथा सत्यशब्देनापि सर्वविशेषप्रत्यस्तमितस्वरू-पत्वाद्ब्रह्मणो बाह्यसत्तासामान्यविषयेण सत्यशब्देन लक्ष्यते सत्यं ब्रह्मेति न तु सत्यशब्दवाच्यमेव ब्रह्म । एवं सत्यादिशब्दा इतरेतरसंनिधावन्योन्यनियम्य-नियामकाः सन्तः सत्यादिशब्दवाच्यात्तन्निवर्तका ब्रह्मणो लक्षणार्थाश्च भवन्ती-त्यतः सिद्धं "यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह" "अनिरुक्तेऽनि-लयने" इति चावाच्यत्वं नीलोत्पलवदवाक्यार्थत्वं च ब्रह्मणः ।

ब्रह्मानित्यं ज्ञानत्वाल्लौकिकज्ञानवदित्यादि चोद्यमप्युक्तन्यायेन निरस्तमित्याह—विज्ञातृत्वस्वरूपेति । लौकिकज्ञानस्य करणादिसापेक्षत्वादानित्यत्वम् । आत्मस्वरूपं तु ज्ञानं न करणादिसापेक्षं सकलकरणव्यापारोपरमेऽपि सुषुप्ते भावादन्यथा सुषुप्तिसिद्ध्य-नुपपत्तेः परामर्शासंभवप्रसङ्गादतः श्रुतितात्पर्यगम्येऽर्थे न सामान्यतो दृष्टस्य प्रवेश इति भावः । आत्मनः स्वरूपभूतं ज्ञानं कारकसाध्यं धात्वर्थत्वादिति चासिद्धमि-

१ ख. °त्वात्सत्यानन्तसामानाधिकरण्यात्तथा । ङ. ट. °त्वात्सत्यानन्तशब्दाभ्यां सामानाधि-करण्यात्तथा । २ ख. ट. °वाच्यान्नि° । ग. घ. ङ. ठ. °वाच्यत्वान्नि° । ३ ख. करणसाध्यं ।

त्याह—अत इति । नित्यात्मस्वरूपत्वादेवेत्यर्थः । अत एव चेति । नित्यत्वादेव ज्ञानस्य न तत्र कर्तृत्वमपि ब्रह्मण आपादयितुं शक्यते । लौकिकानित्यज्ञानविलक्षणत्वादेव च ज्ञानशब्दवाच्यमपि ब्रह्म न भवतीत्याह—तस्मादेव चेति । कथं तर्हि विज्ञानं ब्रह्मेति प्रयोगस्तत्राऽऽह—तथाऽपीति । शब्दस्य प्रवृत्तिहेतवो जात्यादिधर्मा गौः शुक्ल इत्यादौ तदभावाच्छब्दान्तरेणापि वाच्यं न भवतीत्याह—तथेति । तथा सत्यशब्देनापि न वाच्यं ब्रह्मेति शेषः । एतत्स्फुटयति—सर्वविशेषेति । सत्ता यस्यास्ति तत्सत्यमिति लोकरूढिः । सत्ता चानुगतरूपं सामान्यं व्यावृत्ताः सत्ताविशेषाः । स चायमनुवृत्तव्यावृत्तभावो न वस्तु परस्परापेक्षसिद्धत्वादतो यस्मिन्नयं व्यावृत्तानुवृत्तभावः कल्पितस्तदव्यावृत्ताननुगतं ब्रह्म लक्ष्यत इत्यर्थः । एवमेकैकस्य शब्दस्यार्थमुक्त्वा वाक्यार्थमाह—एवं सत्यादीति । यद्यपि सत्यादिशब्दानां ब्रह्मणा मुख्योऽन्वयस्तथाऽप्यरुणयैकहायन्येत्यादिवत्पौर्ष्णिकान्वयेनेतरेतरसंनिधावन्योन्यस्य वृत्तिनियामका भवन्ति । ज्ञानेन विशेषणात्सत्यशब्दो न जडे कारणे वर्तते । सत्येन विशेषणाज्ज्ञानशब्दो न विषयसापेक्षे ज्ञाने वर्तते । ज्ञानेन विशेषणाच्चानन्तशब्दो ज्ञातृव्यतिरिक्ते वर्तते । ततश्च सत्यादिशब्देन यल्लौकिकं वाच्यं तद्विलक्षणेन भवितव्यमिति संभावयन्तः सकललौकिकाध्यासाधिष्ठानं ब्रह्मत्वेन लक्षयन्तीत्यर्थः । ततः किं फलतीत्यत आह—अतः सिद्धमिति । वाचकशक्त्या बोधकत्वानङ्गीकारादवाच्यत्वं सकलानिष्टव्यवच्छेदेनैकस्यैव लक्ष्यत्वाभ्युपगमाच्च गुणगुण्यादिसंभेदरूपवाक्यार्थवैलक्षण्यं च ब्रह्मणः सिद्धमित्यर्थः ।

यो वेद॒ निहि॑तं॒ गुहा॑यां पर॒मे व्यो॑मन् ।

तद्यथाव्याख्यातं ब्रह्म यो वेद विजानाति निहितं स्थितं गुहायाम् । गूहतेः संवरणार्थस्य निगूढा अस्यां ज्ञानज्ञेयज्ञातृपदार्था इति गुहा बुद्धिः । गूढावस्यां भोगापवर्गौ पुरुषार्थाविति वा तस्यां परमे प्रकृष्टे व्योमन्व्योम्न्याकाशेऽव्याकृताख्ये । तद्धि परमं व्योम "एतस्मिन्खल्वक्षरे गार्ग्याकाशः" इत्यक्षरसंनिकर्षात् । गुहायां व्योम्नीति वा सामानाधिकरण्यादव्याकृताकाशमेव गुहा । तत्रापि निगूढाः सर्वे पदार्थास्त्रिषु कालेषु कारणत्वात्सूक्ष्मतरत्वाच्च । तस्मिन्नन्तर्निहितं ब्रह्म । हार्दमेव तु परमं व्योमेति न्याय्यं विज्ञानाङ्गत्वेनोपासनाङ्गत्वेन व्योम्नो विवक्षितत्वात् ।

बुद्धौ कार्ये यदनुगतं परमं व्योमाव्याकृताख्यं तस्मिन्निहितमिति सप्तमीद्वयं वैयधि-

---

१ ख. ठ. °त्पार्ष्णिका° । २ झ. ढ. °न्यव्यावृ° । ३ ख. ग. °कशब्दान° ।

करणेन व्याख्यातम् । व्योमशब्दस्य भूताकाशे रूढिं परित्यज्य किमित्यव्याकृतविषयत्वं व्याख्यातं तत्राऽऽह—तद्धीति । भूताकाशस्य कार्यत्वेनापरत्वादव्याकृताकाशस्य कारणत्वेन परमत्वविशेषणसंभवाच्छाखान्तरे शतपथे चाक्षरेण ब्रह्मणा सामीप्यावगमादव्याकृतं व्योमशब्देन लक्ष्यत इत्यर्थः । एवं पराभिप्रायेण व्याख्याय स्वाभिप्रायं व्याचष्टे—हार्दमेव त्विति । हृदयावच्छिन्ने भूताकाशे या गुहा तस्यां बुद्धौ साक्षितया निहितमभिव्यक्तं ब्रह्मेति व्याख्यानं युक्तम् । द्रष्टृभेदेन ब्रह्मण आपरोक्ष्यलाभात् । अन्यथा समष्टिरूपेऽव्याकृते मायातत्त्वेऽवस्थितं ब्रह्मेत्युक्ते ब्रह्मणः पारोक्ष्यं प्रसज्येत । पारोक्ष्येण च ज्ञानं नापरोक्षसंसाराध्यासनिवर्तकम् । तस्मादपरोक्षद्रष्टृचैतन्याभेदेन ब्रह्मणः स्वहृदये प्रत्यक्षताया विवक्षितत्वाद्धृदयाकाशमेव विज्ञानशेषभूतं विवक्षितमित्यर्थः ।

"यो वै स बहिर्धा पुरुषादाकाशो यो वै सोऽन्तः पुरुष आकाशो योऽयमन्तर्हृदय आकाशः" इति श्रुत्यन्तरात्प्रसिद्धं हार्दस्य व्योम्नः परमत्वम् । तस्मिन्हार्दे व्योम्नि या बुद्धिर्गुहा तस्यां निहितं ब्रह्म तद्वृत्त्या विविक्ततयोपलभ्यत इति । न ह्यन्यथा विशिष्टदेशकालसंबन्धोऽस्ति ब्रह्मणः सर्वगतत्वान्निर्विशेषत्वाच्च ।

यदुक्तं भूताकाशस्य परमत्वानुपपत्तिरिति तत्राऽऽह—यो वा इति । ननु निहितशब्दः स्थितिं ब्रूते कथं विविक्ततया स्फुटतयोपलम्भाभिप्रायेण व्याख्यायते तत्राऽऽह—न हीति । अन्यथेति । उपलम्भव्यतिरेकेणाविद्यावस्थायाम् ।

सोऽश्नुते सर्वान्कामान्त्सह । ब्रह्मणा विपश्चितेति ।

स एवं ब्रह्म विजानन्किमित्याह—अश्नुते भुङ्क्ते सर्वान्निरवशिष्टान्कामान्भोगानित्यर्थः । किमस्मदादिवत्पुत्रस्वर्गादीन्पर्यायेण नेत्याह । सह युगपदेकक्षणोपारूढानेवैकयोपलब्ध्या सवितृप्रकाशवन्नित्यया ब्रह्मस्वरूपाव्यतिरिक्तया यामवोचाम सत्यं ज्ञानमनन्तमिति । एतत्तदुच्यते—ब्रह्मणा सहेति । ब्रह्मभूतो विद्वान्ब्रह्मस्वरूपेणैव सर्वान्कामान्सहाश्नुते, न यथोपाधिकृतेन स्वरूपेणाऽऽत्मना जलसूर्यकादिवत्प्रतिबिम्बभूतेन सांसारिकेण धर्मादिनिमित्तापेक्षांश्चक्षुरादिकरणापेक्षांश्च कामान्पर्यायेणाश्नुते लोकः । कथं तर्हि यथोक्तेन प्रकारेण सर्वज्ञेन सर्वगतेन सर्वात्मना नित्यब्रह्मात्मस्वरूपेण धर्मादिनिमित्तानपेक्षांश्चक्षुरादिकरणनिरपेक्षांश्च सर्वान्कामान्सहैवाश्नुत इत्यर्थः । विपश्चिता मेधाविना सर्वज्ञेन

१ ख. ग. °क्तयेत्यवो° ।

तद्धि वैपश्चित्यं यत्सर्वज्ञत्वं तेन सर्वज्ञस्वरूपेण ब्रह्मणाऽश्नुत इति । इतिशब्दो मन्त्रपरिसमाप्त्यर्थः ।

ये सुखविशेषा हिरण्यगर्भाद्युपाधिषु भोग्यत्वेनाभिमतास्तेषां सर्वेषां ब्रह्मानन्दाव्यतिरेकाद्ब्रह्मीभूतो विद्वान्सर्वानेवाऽऽनन्दानश्नुत इत्युपचारेण बहुवचनमित्यर्थः ।

सर्व एव वल्ल्यर्थो ब्रह्मविदाप्नोति परमिति ब्राह्मणवाक्येन सूत्रितः । स च सूत्रितोऽर्थः संक्षेपतो मन्त्रेण व्याख्यातः । पुनस्तस्यैव विस्तरेणार्थनिर्णयः कर्तव्य इत्युत्तरस्तद्वृत्तिस्थानीयो ग्रन्थ आरभ्यते–तस्माद्वा एतस्मादित्यादिः । तत्र च सत्यं ज्ञानमनन्तं ब्रह्मेत्युक्तं मन्त्रादौ तत्कथं सत्यं ज्ञानमनन्तं चेत्यत आह—तत्र त्रिविधं ह्यानन्त्यं देशतः कालतो वस्तुतश्चेति । तद्यथा–देशतोऽनन्त आकाशो न हि देशतस्तस्य परिच्छेदोऽस्ति । न तु कालतश्चाऽऽनन्त्यं वस्तुतश्चाऽऽकाशस्य । कस्मात्कार्यत्वात् । नैवं ब्रह्मण आकाशवत्कालतोऽप्यन्तवत्त्वमकार्यत्वात् । कार्यं हि वस्तु कालेन परिच्छिद्यते । अकार्यं च ब्रह्म । तस्मात्कालतोऽप्यनन्तम् । तथा वस्तुतः । कथं पुनर्वस्तुत आनन्त्यं सर्वानन्यत्वात् । भिन्नं हि वस्तु वस्त्वन्तरस्यान्तो भवति । वस्त्वन्तरबुद्धिर्हि प्रसक्ता वस्त्वन्तरान्निवर्तते । यतो यस्य बुद्धेर्विनिवृत्तिः स तस्यान्तः । तद्यथा–गोत्वबुद्धिरश्वत्वाद्विनिवर्तत इत्यश्वत्वान्तं गोत्वमित्यन्तवदेव भवति । स चान्तो भिन्नेषु वस्तुषु दृष्टो नैवं ब्रह्मणो भेदः । अतो वस्तुतोऽप्यानन्त्यम् । कथं पुनः सर्वानन्यत्वं ब्रह्मण इत्युच्यते । सर्ववस्तुकारणत्वात् । सर्वेषां हि वस्तूनां कालाकाशादीनां कारणं ब्रह्म । कार्यापेक्षया वस्तुतोऽन्तवत्त्वमिति चेन्न । अनृतत्वात्कार्यवस्तुनः । न हि कारणव्यतिरेकेण कार्यं नाम वस्तुतोऽस्ति । यतः कारणबुद्धिर्विनिवर्तेत । वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमेवं सदेव सत्यमिति श्रुत्यन्तरात् । तस्मादाकाशादिकारणत्वाद्देशतस्तावदनन्तं ब्रह्म । आकाशो ह्यनन्त इति प्रसिद्धम् । देशतस्तस्य चायं कारणं तस्मात्सिद्धं देशत आत्मन आनन्त्यम् । न ह्यसर्वगतात्सर्वगतमुत्पद्यमानं लोके किंचिद्दृश्यते । अतो निरतिशयमात्मन आनन्त्यं देशतस्तथाऽकार्यत्वात्कालतस्तद्भिन्नवस्त्वन्तराभावाच्च वस्तुतोऽत एव निरतिशयसत्यत्वम् ।

वृत्तमनुवदत्युत्तरग्रन्थावतारणाय–सर्व एवेत्यादिना । आकाशादिकारणत्वाभिधाने-

नाऽऽनन्त्यप्रपञ्चः क्रियत इति स[1]मनन्तरग्रन्थतात्पर्यं दर्शयितुं पूर्वोक्तेष्वर्थविशेषमनुवदति—तत्र चेति । वस्तुत आनन्त्यं व्याख्यातुं वस्तुनोऽन्तवत्त्वं तावदाह—भिन्नं हीत्यादिना । विस्तरेणोक्तमानन्त्यं संक्षिप्याऽऽह—तस्मात्सिद्धमिति । देशतोऽनवच्छिन्नस्याऽऽकाशस्य कारणत्वाद्व्यापकत्वान्निरतिशयमात्मनो देशत आनन्त्यमकार्यत्वाच्च कालत आनन्त्यं तद्यतो व्यावर्तेत तस्य पृथगसत्त्वात्कार्यस्योपादानादन्यत्र सत्त्वायोगाद्वस्तुतोऽप्यानन्त्यं सिद्धमित्यर्थः । अत इति । निरतिशयानन्त्यादेव सत्यत्वमपि सिद्धमन्तवत एव रज्जुसर्पादिवदसत्यत्वादित्यर्थः ।

तस्माद्वा एतस्मादात्मन आकाशः संभूतः ।
आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः
पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् ।
अन्नात्पुरुषः । स वा एष पुरुषोऽन्नरसमयः ।

तस्मादिति मूलवाक्यसूत्रितं ब्रह्म परामृश्यते । एतस्मादिति मन्त्रवाक्येनानन्तरं यथालक्षितम् । यद्ब्रह्माऽऽदौ ब्राह्मणवाक्येन सूत्रितं यच्च सत्यं ज्ञानमनन्तं ब्रह्मेत्यनन्तरमेव लक्षितं तस्मादेतस्माद्ब्रह्मण आत्मन आत्मशब्द[2]वाच्यात् । आत्मा हि तत्सर्वस्य तत्सत्यं स आत्मेति श्रुत्यन्तरादतो ब्रह्माऽऽत्मा । तस्मादेतस्माद्ब्रह्मण आत्मस्वरूपादाकाशः संभूतः समुत्पन्नः । आकाशो नाम शब्दगुणोऽवकाशकरो मूर्तद्रव्याणाम् । तस्मादाकाशात्स्वेन स्पर्शगुणेन पूर्वेण च कारणगुणेन शब्देन द्विगुणो वायुः । संभूत इत्यनुवर्तते । वायोश्च स्वेन रूपगुणेन पूर्वाभ्यां च त्रिगुणोऽग्निः संभूतः । अग्नेः स्वेन रसगुणेन पूर्वैश्च त्रिभिश्चतुर्गुणा आपः संभूताः । अद्भ्यः स्वेन गन्धगुणेन पूर्वैश्चतुर्भिः पञ्चगुणा पृथिवी संभूता । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नाद्रेतोरूपेण परिणतात्पुरुषः शिरःपाण्याद्याकृतिमान् । स वा एष पुरुषोऽन्नरसमयोऽन्नरसविकारः । पुरुषाकृतिभावितं हि सर्वेभ्योऽङ्गेभ्यस्तेजः संभूतं रेतो बीजं तस्माद्यो जायते सोऽपि तथा पुरुषाकृतिरेव स्यात् । सर्वजातिषु जायमानानां जनकाकृतिनियमदर्शनात् ।

---

१ ख. ग. °मग्रग्रन्थस्य ता° । २ ङ. ठ. °वाच्यत्वात् ।

एवं सृष्टिवाक्यतात्पर्यमुक्त्वा पदानि विभजते—तस्मादित्यादिना । अन्त्यकार्यपर्यन्तं परमात्मनः सर्वत्रोपादानत्वादाकाशभावापन्नात्परमात्मन एव वायुः संभूतोऽत एव तद्गुणस्योत्तरत्रानुवृत्तिर्गुणशब्दप्रयोगोऽपि भेदकल्पनया तत्तन्त्रत्वाभिप्रायेण न वैशेषिकपक्षवत्तत्त्वभेदाभिप्रायेण । तत्त्वतो भेदे प्रमाणाभावादिति द्रष्टव्यम् ।

सर्वेषामप्यन्नरसविकारत्वे ब्रह्मवंश्यत्वे चाविशिष्टे कस्मात्पुरुष एव गृह्यते । प्राधान्यात् । किं पुनः प्राधान्यम् । कर्मज्ञानाधिकारः । पुरुष एव हि शक्तत्वादर्थित्वादपर्युदस्तत्वाच्चार्थी विद्वान्समर्थः कर्मज्ञानयोरधिक्रियते– “ पुरुषे त्वेवाऽऽविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सति ” इत्येवं संपन्नः । अथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानमित्यादिश्रुत्यन्तरदर्शनात् ।

पुरुषग्रहणस्य तात्पर्यमाह—सर्वेषामपीति । शक्तत्वादिति विधिनिषेधविवेकसामर्थ्योपेतत्वादित्युक्तं तत्रैतरेयकश्रुतिसंमतिमाह—पुरुषे त्वेवेति । ब्राह्मण्यादिजातिमति मनुष्यादिदेह आविस्तरामतिशयेन प्रकट आत्मा । ज्ञानातिशयदर्शनादित्यर्थः । मर्त्येन ज्ञानकर्मादिसाधनेनाक्षयफलं प्राप्तुमिच्छतीत्यर्थः । येन विवेकज्ञानेन पुरुषस्य प्राधान्यं विवक्षितं तत्पश्वादीनां नास्तीत्याह—अथेतरेषामिति ।

तस्येदमेव शिरः । अयं दक्षिणः पक्षः ।
अयमुत्तरः पक्षः । अयमात्मा । इदं
पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि द्वितीये ब्रह्मवल्ल्यध्याये प्रथमोऽनुवाकः ॥ १ ॥

स हि पुरुष इह विद्ययाऽन्तरतमं ब्रह्म संक्रामयितुमिष्टस्तस्य च बाह्याकारविशेषेष्वनात्मस्वात्मभाविता बुद्धिरनालम्ब्य विशेषं कंचित्सहसाऽन्तरतमप्रत्यगात्मविषया निरालम्बना च कर्तुमशक्येति दृष्टशरीरात्मसामान्यकल्पनया शाखाचन्द्रनिदर्शनवदन्तः प्रवेशयन्नाह–तस्येदमेव शिरः । तस्यास्य पुरुषस्यान्नरसमयस्येदमेव शिरः प्रसिद्धम् । प्राणमयादिष्वशिरसां शिरस्त्वदर्शनादिहापि

१ ख. ग. ब्रह्मांशत्वे । २ घ. ट. °रूपत्वे वा° ।

तत्प्रसङ्गो मा भूदितीदमेव शिर इत्युच्यते। एवं पक्षादिषु योजना। अयं दक्षिणो बाहुः पूर्वाभिमुखस्य दक्षिणः पक्षः। अयं सव्यो बाहुरुत्तरः पक्षः। अयं मध्यमो देहभाग आत्माऽङ्गानाम्। "मध्यं ह्येषामङ्गानामात्मा" इति श्रुतेः। इदमिति नाभेरधस्ताद्यदङ्गं तत्पुच्छं प्रतिष्ठा। प्रतितिष्ठत्यनयेति प्रतिष्ठा। पुच्छमिव पुच्छमधोलम्बनसामान्याद्यथा गोः पुच्छम्। एतत्प्रकृत्यो-त्तरेषां प्राणमयादीनां रूपकत्वसिद्धिः। मूषानिषिक्तद्रुतताम्रप्रतिमावत्। तदप्येष श्लोको भवति। तत्तस्मिन्नेवार्थे ब्राह्मणोक्तेऽन्नमयात्मप्रकाशक एष श्लोको मन्त्रो भवति।

* इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकर-
भगवतः कृतौ तैत्तिरीयोपनिषदि द्वितीयब्रह्मवल्ल्यध्यायभाष्ये
प्रथमोऽनुवाकः ॥ १ ॥

कोशपञ्चकोपन्यासस्य तात्पर्यमाह——स हीत्यादिना। पक्षपुच्छशब्दप्रयोगात्सुपर्णा-कारक्लृप्तिं दर्शयति। उत्तरत्र तत्कल्पनया बाह्यविषयासङ्गव्यपोहेन बुद्धेरात्मनि स्थिरी-करणार्थं नोपासनविधानमिह विवक्षितम्। उपक्रमोपसंहारयोर्ब्रह्मात्मैकत्वप्रतिपादने-नैवोपक्षयान्मध्ये ग्रन्थस्योपासनविधौ तात्पर्ये च वाक्यभेदप्रसङ्गादत एवाङ्गे स्तुतिः परार्थत्वादितिन्यायेन यथा प्रयाजादिषु फलश्रवणमर्थवादस्तथाऽन्नमयादिप्रतिपत्तेरपि फलश्रवणमर्थवाद एव। तत्तद्बुद्धिस्थिरीकारस्य पूर्वपूर्वबुद्धिविलापनेनाऽऽत्मनः प्रतिप-त्तिशेषत्वादिति द्रष्टव्यम्।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्ति-
रीयोपनिषच्छांकरभाष्यटीकायां द्वितीयब्रह्मवल्ल्यध्याये
प्रथमोऽनुवाकः ॥ १ ॥

अथ ब्रह्मवल्ल्यध्याये द्वितीयोऽनुवाकः।

अन्नाद्वै प्रजाः प्रजायन्ते। याः काश्च
पृथिवीꣳ श्रिताः। अथो अन्नेनैव जीवन्ति।
अथैनदपि यन्त्यन्ततः। अन्नꣳ हि
भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते।

---

* अत्र भाष्ये टीकायां च वैदिकपाठानुसारिसूत्रानुरोधेनैवानुवाकसमाप्तिर्ग्रथिता। एवमेव परतोऽपि ब्रह्मवल्लीसमाप्तिपर्यन्तं ज्ञेयम्।

अन्नाद्रसादिभावपरिणतात् । वा इति स्मरणार्थः । प्रजाः स्थावरजङ्गमाः प्रजायन्ते । याः काश्चाविशिष्टाः पृथिवीं श्रिताः पृथिवीमाश्रितास्ताः सर्वा अन्नादेव प्रजायन्ते । अथो अपि जाता अन्नेनैव जीवन्ति प्राणान्धारयन्ति । वर्धन्त इत्यर्थः । अथाप्येनदन्नमपि यन्त्यपि गच्छन्ति । अपिशब्दः प्रतिशब्दार्थे । अन्नं प्रति प्रलीयन्त इत्यर्थः । अन्ततोऽन्ते जीवनलक्षणाया वृद्धेः परिसमाप्तौ । कस्मात् । अन्नं हि यस्माद्भूतानां प्राणिनां ज्येष्ठं प्रथमजम् । अन्नमयादीनां हीतरेषां भूतानां कारणमन्नमतोऽन्नप्रभवा अन्नजीवना अन्नप्रलयाश्च सर्वाः प्रजाः । यस्माच्चैवं तस्मात्सर्वौषधं सर्वप्राणिनां देहदाहप्रशमनमन्नमुच्यते ।

सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते ।
अन्नꣳहि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते ।
अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते ।
अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति ।

अन्नब्रह्मविदः फलमुच्यते । सर्वं वै ते समस्तमन्नजातमाप्नुवन्ति । के । येऽन्नं ब्रह्म यथोक्तमुपासते । कथमन्नजोऽन्नात्माऽन्नप्रलयोऽहं तस्मादन्नं ब्रह्मेति । कुतः पुनः सर्वान्नप्राप्तिफलमन्नात्मोपासनमित्युच्यते । अन्नं हि भूतानां ज्येष्ठम् । भूतेभ्यः पूर्वं निष्पन्नत्वाज्ज्येष्ठं हि यस्मात्तस्मात्सर्वौषधमुच्यते । तस्मादुपपन्ना सर्वान्नात्मोपासकस्य सर्वान्नप्राप्तिः । अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्त इत्युपसंहारार्थं पुनर्वचनम् । इदानीमन्ननिर्वचनमुच्यते । अद्यते भुज्यते चैव यद्भूतैरन्नमत्ति च भूतानि स्वयं तस्माद्भूतैर्भुज्यमानत्वाद्भूतभोक्तृत्वाच्चान्नं तदुच्यते । इतिशब्दः प्रथमकोशपरिसमाप्त्यर्थः ।

तस्माद्वा एतस्मादन्नरसमयात् । अन्योऽन्तर
आत्मा प्राणमयः । तेनैष पूर्णः ।

अन्नमयादिभ्य आनन्दमयान्तेभ्य आत्मभ्योऽभ्यन्तरतमं ब्रह्म विद्यया प्रत्यगात्मत्वेन दिदर्शयिषु शास्त्रमविद्याकृतपञ्चकोशापनयनेनानेकतुषकोद्रववितुषी-

---

१ क. च । भूतानि स्वयं यस्मात्तस्मादन्नं तदुच्यते । इ॰ ।

करणेनेव तदन्तर्गततण्डुलान्प्रस्तौति तस्माद्वा एतस्मादन्नरसमयादित्यादि। तस्मादेतस्माद्यथोक्तादन्नरसमयात्पिण्डादन्यो व्यतिरिक्तोऽन्तरोऽभ्यन्तर आत्मा पिण्डवदेव मिथ्यापरिकल्पित आत्मत्वेन प्राणमयः प्राणो वायुस्तन्मयस्तत्मायः। तेन प्राणमयेनान्नरसमय आत्मैष पूर्णो वायुनेव दृतिः।

स वा एष पुरुषविध एव। तस्य पुरुषविध
तामू। अन्वयं पुरुषविधः। तस्य प्राण एव
शिरः। व्यानो दक्षिणः पक्षः। अपान
उत्तरः पक्षः। आकाश आत्मा। पृथिवी
पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि द्वितीये ब्रह्मवल्ल्यध्याये द्वितीयोऽनुवाकः॥ २॥

स वा एष प्राणमय आत्मा पुरुषविध एव पुरुषाकार एव। शिरःपक्षादिभिः किं स्वत एव, नेत्याह। प्रसिद्धं तावदन्नरसमयस्याऽऽत्मनः पुरुषविधत्वम्। तस्यान्नरसमयस्य पुरुषविधतां पुरुषाकारताम्। अन्वयं प्राणमयः पुरुषविधो मूषानिषिक्तप्रतिमावन्न स्वत एव। एवं पूर्वस्य पूर्वस्य पुरुषविधतामनूत्तरोत्तरः पुरुषविधो भवति पूर्वः पूर्वश्चोत्तरोत्तरेण पूर्णः। कथं पुनः पुरुषविधताऽस्येत्युच्यते। तस्य प्राणमयस्य प्राण एव शिरः। प्राणमयस्य वायुविकारस्य प्राणो मुखनासिकानिःसरणो वृत्तिविशेषः शिर एव परिकल्प्यते। वचनात्। सर्वत्र वचनादेव पक्षादिकल्पना। व्यानो व्यानवृत्तिर्दक्षिणः पक्षः। अपान उत्तरः पक्षः। आकाश आत्मा। य आकाशस्थो वृत्तिविशेषः समानाख्यः स आत्मेवाऽऽत्मा। प्राणवृत्त्यधिकारान्मध्यस्थत्वादितराः पर्यन्ता वृत्तीरपेक्ष्याऽऽत्मा। "मध्यं ह्येषामङ्गानामात्मा" इति श्रुतिप्रसिद्धं मध्यमस्थस्याऽऽत्मत्वम्। पृथिवी पुच्छं प्रतिष्ठा। पृथिवीति पृथिवी देवताऽऽध्यात्मिकस्य प्राणस्य धारयित्री। स्थितिहेतुत्वात्। "सैषा पुरुषस्यापानमवष्टभ्य" इति श्रुत्यन्तरम्। अन्यथोदानवृत्त्योर्ध्वगमनं गुरुत्वाच्च पतनं

१ च. °न्प्रसौति।

वा स्याच्छरीरस्य । तस्मात्पृथिवी देवता पुच्छं प्रतिष्ठा प्राणमयस्याऽऽत्मनः । तत्तस्मिन्नेवार्थे प्राणमयात्मविषय एष श्लोको भवति ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषदि द्वितीयब्रह्मवल्ल्यध्यायभाष्ये द्वितीयोऽनुवाकः ॥ २ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां ब्रह्मवल्ल्यध्याये द्वितीयोऽनुवाकः ॥ २ ॥

अथ ब्रह्मवल्ल्यध्याये तृतीयोऽनुवाकः ।

प्राणं देवा अनु प्राणन्ति । मनुष्याः पशवश्च ये ।
प्राणो हि भूतानामायुः । तस्मात्सर्वायुषमुच्यते ।
सर्वमेव त आयुर्यन्ति । ये प्राणं ब्रह्मोपासते ।
प्राणो हि भूतानामायुः । तस्मात्सर्वायुषमुच्यत
इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य ।

प्राणं देवा अनु प्राणन्ति । देवा अग्न्यादयः प्राणं वाय्वात्मानं प्राणनशक्तिमन्तमनु तदात्मभूताः सन्तः प्राणन्ति प्राणनकर्म कुर्वन्ति प्राणनक्रियया क्रियावन्तो भवन्ति । अध्यात्माधिकाराद्देवा इन्द्रियाणि प्राणमनु प्राणन्ति मुख्यप्राणमनु चेष्टन्त इति वा । तथा मनुष्याः पशवश्च ये ते प्राणनकर्मणैव चेष्टावन्तो भवन्ति । अतश्च नान्नमयेनैव परिच्छिन्नेनाऽऽत्मनाऽऽत्मवन्तः प्राणिनः किं तर्हि तदन्तर्गतेन प्राणमयेनापि साधारणेनैव सर्वपिण्डव्यापिनाऽऽत्मवन्तो मनुष्यादयः । एवं मनोमयादिभिः पूर्वपूर्वव्यापिभिरुत्तरोत्तरैः सूक्ष्मैरानन्दमयान्तैराकाशादिभूतारब्धैरविद्याकृतैरात्मवन्तः सर्वे प्राणिनः[१] । तथा स्वाभाविकेनाप्याकाशादिकारणेन नित्येनाविकृतेन सर्वगतेन सत्यज्ञानानन्तलक्षणेन पञ्चकोशातिगेन सर्वात्मनाऽऽत्मवन्तः । स हि परमार्थत आत्मा सर्वेषामित्येतदप्यर्थादुक्तं भवति । प्राणं देवा अनु प्राणन्तीत्युक्तं तत्कस्मादित्याह । प्राणो हि

---

१ ख. ग. ङ. °णिनो यथाऽनेकास्तुषकोद्रवास्तथा ।

यस्माद्भूतानां प्राणिनामायुर्जीवनम् । "यावद्ध्यस्मिञ्शरीरे प्राणो वसति तावदायुः" इति श्रुत्यन्तरात् । तस्मात्सर्वायुषम् । सर्वेषामायुः सर्वायुः । सर्वायुरेव सर्वायुषमित्युच्यते । प्राणापगमे मरणप्रसिद्धेः । प्रसिद्धं हि लोके सर्वायुष्ट्वं प्राणस्य । अतोऽस्माद्बाह्यादसाधारणादन्नमयादात्मनोऽपक्रम्यान्तः साधारणं प्राणमयमात्मानं ब्रह्मोपासते येऽहमस्मि प्राणः सर्वभूतानामात्माऽऽयुर्जीवनहेतुत्वादिति ते सर्वमेवाऽऽयुरस्मिँल्लोके यन्ति नापमृत्युना म्रियन्ते । *प्राक्प्राप्तादायुष इत्यर्थः । शतं वर्षाणीति तु युक्तम् । सर्वमायुरिति श्रुतिप्रसिद्धेः । किं कारणम् । प्राणो हि भूतानामायुस्तस्मात्सर्वायुषमुच्यत इति । यो यद्गुणकं ब्रह्मोपास्ते स तद्गुणभाग्भवतीति विद्याफलप्राप्तिहेत्वर्थं पुनर्वचनं प्राणो हीत्यादि । तस्य पूर्वस्यान्नमयस्यैष एव शरीरेऽन्नमये भवः शारीर आत्मा । कः । य एष प्राणमयः ।

पूर्वपूर्वकोशस्योत्तरोत्तरः कोश एवाऽऽत्मेति व्याख्यातमापातदर्शनेन । तदसत् । आत्मशब्दस्यामुख्यार्थत्वप्रसङ्गात्प्रकृतपरामर्शकेतच्छब्दकोपाच्च । अतः सर्वकोशाध्यासाधिष्ठानभूतश्चिदात्मैवात्राऽऽत्मशब्देन विवक्षित इति तात्पर्यमाह—**तथा स्वाभाविकेनेति । अर्थादिति** । आत्मशब्दसामर्थ्यात्कल्पितस्याधिष्ठानत्वानुपपत्तेश्चेत्यर्थः । **असाधारणादिति** । व्यावृत्तस्वरूपात् । अपक्रम्य तत्राऽऽत्मबुद्धिं हित्वेत्यर्थः । **साधारणमिति** । सर्वेन्द्रियसाधारणम् । प्राणकृतेनाशनादिना सर्वेषां पुष्ट्यादिदर्शनादित्यर्थः । **सर्वभूतानामात्मेति** । सूत्रात्मना पूर्वस्य य आत्मा चिद्धेतुरेष एव तस्य प्राणमयस्याऽऽत्मेति योजना ।

तस्माद्वा एतस्मात्प्राणमयात् । अन्योऽन्तर आत्मा मनोमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः ।

---

* प्राप्तादायुषः प्रागपमृत्युना न म्रियन्त इति योजना ।

---

१ अ. प्राक्शतादा° ।

तस्माद्वा एतस्मादित्युक्तार्थमन्यत् । अन्योऽन्तर आत्मा मनोमयः । मन इति संकल्पाद्यात्मकमन्तःकरणं तन्मयो मनोमयो यथाऽन्नमयः । सोऽयं प्राणमयस्याऽऽभ्यन्तर आत्मा । तस्य यजुरेव शिरः । यजुरित्यनियताक्षरपादावसानो मन्त्रविशेषस्तज्जातीयवचनो यजुःशब्दस्तस्य शिरस्त्वं प्राधान्यात् । प्राधान्यं च यागादौ संनिपत्योपकारात् । यजुषा हि हविर्दीयते स्वाहाकारादिना । वाचनिकी वा शिरआदिकल्पना सर्वत्र । मनसो हि स्थानप्रयत्ननादस्वरवर्णपदवाक्यविषया तत्संकल्पात्मिका तद्भाविता वृत्तिः श्रोत्रादिकरणद्वारा यजुःसंकेतविशिष्टा यजुरित्युच्यते । एवमृगेवं साम च । एवं च मनोवृत्तित्वे मन्त्राणां वृत्तिरेवाऽऽवर्त्यत इति मानसो जप उपपद्यते । अन्यथाऽविषयत्वान्मन्त्रो नाऽऽवर्तयितुं शक्यो घटादिवदिति मानसो जपो नोपपद्यते । मन्त्रावृत्तिश्च चोद्यते बहुशः कर्मसु । अक्षरविषयस्मृत्यावृत्त्या मन्त्रावृत्तिः स्यादिति चेन्न । मुख्यार्थासंभवात् । "त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" इति ऋगावृत्तिः श्रूयते । तत्रर्चोऽविषयत्वे तद्विषयस्मृत्यावृत्तौ च क्रियमाणायां त्रिः प्रथमामन्वाहेति ऋगावृत्तिर्मुख्योऽर्थश्चोदितः परित्यक्तः स्यात् । तस्मान्मनोवृत्त्युपाधिपरिच्छिन्नं मनोवृत्तिनिष्ठमात्मचैतन्यमनादिनिधनं यजुःशब्दवाच्यमात्मविज्ञानं मन्त्रा इति । एवं च नित्यत्वोपपत्तिर्वेदानाम् । अन्यथा विषयत्वे रूपादिवदनित्यत्वं च स्यान्नैतद्युक्तम् । "सर्वे वेदा यत्रैकं भवन्ति स मानसीन आत्मा" इति च श्रुतिर्नित्यात्मनैकत्वं ब्रुवत्यृगादीनां नित्यत्वे समञ्जसा स्यात् । "ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः" इति च मन्त्रवर्णः ।

यजुःशब्देन बाह्यो यजुर्वेद उच्यते । तस्य कथमान्तरं मनोमयं प्रति शिरस्त्वमित्याशङ्क्याऽऽह—मनसो हीति । यद्यपि यजुःशब्दो बाह्ये शब्दराशौ रूढस्तथाऽपि श्रुतेरनतिशङ्कनीयत्वात्तत्प्रामाण्याद्विशिष्टमनोवृत्तिर्यजुःसंकेतविषयभूता यजुर्वेदमधीमह एतत्क्रमका वर्णा यजुर्वेदतयाऽध्येतव्या इत्येवं संकल्परूपा ग्राह्येत्यर्थः । श्रुत्यनुग्राहिकां युक्तिमप्याह—एवं चेति । अन्यथेति । शब्दानां घटादिवद्बाह्यद्रव्यत्वे मनोविषयत्वासंभवान्मनसो बाह्येऽर्थेऽस्वातन्त्र्यान्मानसो जपो न स्यादित्यर्थः । इतश्च मनोवृत्तित्वं मन्त्राणां वाच्यमित्याह—मन्त्रावृत्तिश्चेति । शब्दानां घटादिवद्बाह्यद्रव्यत्वे मन्त्राणां घटादिवदावृत्तिर्नोपपद्यते क्रियैव ह्यावर्त्यते[1] । आवृत्तिसिद्ध्यनुपपत्त्या क्रियात्वं वाच्यमित्युक्तं तत्रान्यथाऽप्युपपत्तिमाशङ्कते—अक्षरविषयेति । मन्त्रेभ्यः स्मृते-

1 क. ग. °र्तिष्यद्°।

रन्यत्वादन्याऽऽवृत्तिर्गौणी प्रसज्यतेऽतो नान्यथाऽप्युपपत्तिरित्युक्तमेतत्स्फुटयति—**त्रिः प्रथमामित्यादिना**। सामिधेन्यः समिधो यदाऽध्वर्युणा हूयन्ते तदा "प्र वो वाजा अभिद्यवः" इत्यष्टादशर्चं सूक्तं होता शंसति तासां चर्चां मध्ये प्रथमामृचं सूक्तस्यान्त्यां चर्चं होता त्रिरनुब्रूयादित्यावृत्तिः श्रूयत इत्यर्थः। मन्त्राणां मनोवृत्तित्वमुक्त्वा मनोवृत्तीनां सदा चिद्व्याप्तत्वेनैव सिद्धेश्चिदात्मतामाह—**तस्मादिति**। मन्त्राणां मनोवृत्तित्वेनाऽऽवृत्तिर्घटत इत्युक्तम्। परम्परया चिदात्मत्वेन नित्यत्वमपि घटत इत्याह—**एवं चेति**। चैतन्यरूपत्वे सति। **अन्यथेति**। स्वप्रकाशचिदात्मत्वानङ्गीकारे रूपादिवद्विषयत्वादनित्यत्वमपि प्रसज्येत। कालिदासादिवाक्यानामप्येतेन न्यायेन नित्यत्वापाताद्युक्त्याभासमेतत्। अस्त्वनित्यत्वमिति न वाच्यमित्याह—**नैतद्युक्तमिति**। वाचा विरूप नित्ययेति श्रुत्या नित्यत्वस्याऽऽवेदितत्वाद्वेदानित्यत्वं युक्तं न भवतीत्यर्थः। वेदानां जडत्वे स्वप्रकाशेनाऽऽत्मनैकत्वं न संभवति। जडाजडयोर्विरोधादतो मनोवृत्तिव्यापकचिदात्मत्वं सूचितमित्यर्थः। साक्षितया मनसि भवो मानसीनोऽक्षरे परमे व्योमकल्पे ब्रह्मणि ऋचो विधिनिषेधरूपा निषेद्धुस्तादात्म्येन व्यवस्थिता इति च मन्त्रवर्ण एकत्वं दर्शयतीत्यर्थः।

आदेश आत्मा। अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि द्वितीये ब्रह्मवल्ल्यध्याये तृतीयोऽनुवाकः ॥ ३ ॥

आदेशोऽत्र ब्राह्मणमतिदेष्टव्यविशेषानतिदिशतीति। अथर्वाङ्गिरसा च दृष्टा मन्त्रा ब्राह्मणं च शान्तिकपौष्टिकादिप्रतिष्ठाहेतुकर्मप्रधानत्वात्पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति मनोमयात्मप्रकाशकः पूर्ववत्।

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषदि द्वितीयब्रह्मवल्ल्यध्यायभाष्ये तृतीयोऽनुवाकः ॥ ३ ॥

अतिदेष्टव्यविशेषान्कर्तव्यविशेषानिदमेवं कर्तव्यमित्युपदिशतीत्यर्थः।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां ब्रह्मवल्ल्यध्याये तृतीयोऽनुवाकः ॥ ३ ॥

अथ ब्रह्मवल्ल्यध्याये चतुर्थोऽनुवाकः ।

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान् । न बिभेति कदा-
चनेति । तस्यैष एव शारीर आत्मा । यः
पूर्वस्य । तस्माद्वा एतस्मान्मनोमयात् ।
अन्योऽन्तर आत्मा विज्ञानमयः । तेनैष
पूर्णः । स वा एष पुरुषविध एव ।
तस्य पुरुषविधताम् । अन्वयं पुरुषविधः ।

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सहेत्यादि । तस्य पूर्वस्य प्राणमयस्यैष एवाऽऽत्मा शारीरः । शरीरे प्राणमये भवः शारीरः । कः । य एष मनोमयः । तस्माद्वा एतस्मादित्यादि पूर्ववत् । अन्योऽन्तर आत्मा विज्ञानमयो मनोमयस्याऽऽभ्यन्तरो विज्ञानमयो मनोमयो वेदात्मोक्तः । वेदार्थविषया बुद्धिर्निश्चयात्मिका विज्ञानं तच्चाध्यवसायलक्षणमन्तःकरणस्य धर्मः । तन्मयो निश्चयविज्ञानैः प्रमाणस्वरूपैर्निव(र्व)र्तित आत्मा विज्ञानमयः । प्रमाणविज्ञानपूर्वको हि यज्ञादिस्तायते । यज्ञादिहेतुत्वं च वक्ष्यति श्लोकेन ।

वाङ्मनसयोर्वाङ्मनसगोचरत्वं नोपपद्यते स्वात्मनि वृत्तिविरोधादतो वाङ्मनोविशिष्टान्मनोमयाद्वाचो मनसा सह निवर्तन्त इत्यर्थः । तस्य च मनोमयस्य ब्रह्मण उपास[१]फलभूतमाधिदैविकमानन्दं विद्वान्न बिभेति । गर्भवासादिदुःखादित्यर्थः । तथाऽध्यवसायलक्षणं लौकिकमपि विज्ञानं ग्राह्यमित्यर्थः ।

तस्य श्रद्धैव शिरः । ऋतं दक्षिणः पक्षः ।
सत्यमुत्तरः पक्षः । योग आत्मा । महः

१ ख. ङ. च. °स्यादिः । त° । २ क. ख. ग. छ. °ज्ञादिः स्तूय° । ञ. ट. °दिर्जायते । ङ. °दिर्ज्ञायते । ३ ट. °स्यर्थः । वेदार्थेति । त° । ४ ज. ञ. °था ऽध्यव° ।

पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि द्वितीये ब्रह्म-
वल्ल्यध्याये चतुर्थोऽनुवाकः ॥ ४ ॥

निश्चयविज्ञानवतो हि कर्तव्येष्वर्थेषु पूर्वं श्रद्धोत्पद्यते । सा सर्वकर्तव्यानां प्राथम्याच्छिर इव शिरः । ऋतसत्ये यथाव्याख्याते एव । योगो युक्तिः समाधानम् । आत्मेवाऽऽत्मा । आत्मवतो हि युक्तस्य समाधानवतोऽङ्गानीव श्रद्धादीनि यथार्थप्रतिपत्तिक्षमाणि भवन्ति, तस्मात्समाधानं योग आत्मा विज्ञानमयस्य । महः पुच्छं प्रतिष्ठा । मह इति महत्तत्त्वं प्रथमजम् । "महद्यक्षं प्रथमजम्" इति श्रुत्यन्तरात् । पुच्छं प्रतिष्ठाकारणत्वात् । कारणं हि कार्याणां प्रतिष्ठा । यथा वृक्षवीरुधां पृथिवी । सर्वबुद्धिविज्ञानानां च महत्तत्त्वं कारणम् । तेन तद्विज्ञानमयस्याऽऽत्मनः प्रतिष्ठा । तदप्येष श्लोको भवति पूर्ववत् । यथाऽन्नमयादीनां ब्राह्मणोक्तानां प्रकाशकाः श्लोका एवं विज्ञानमयस्यापि ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः
कृतौ तैत्तिरीयोपनिषदि द्वितीये ब्रह्मवल्ल्यध्यायभाष्ये
चतुर्थोऽनुवाकः ॥ ४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयो-
पनिषच्छांकरभाष्यटीकायां द्वितीये ब्रह्मवल्ल्यध्याये चतुर्थोऽनुवाकः ॥ ४ ॥

अथ ब्रह्मवल्ल्यध्याये पञ्चमोऽनुवाकः ।

विज्ञानं यज्ञं तनुते । कर्माणि तनुतेऽपि च ।
विज्ञानं देवाः सर्वे । ब्रह्म ज्येष्ठमुपासते । विज्ञानं
ब्रह्म चेद्वेद । तस्माच्चेन्न प्रमाद्यति । * शरीरे
पाप्मनो हित्वा । सर्वान्कामान्त्समश्नुत इति ।

विज्ञानं यज्ञं तनुते । विज्ञानवान्हि यज्ञं तनोति श्रद्धादिपूर्वकम् । अतो विज्ञानस्य कर्तृत्वं तनुत इति कर्माणि च तनुते । यस्माद्वि-

---

* अत्र शकाराकारस्य सानुदात्तः पाठोऽपि वैदिकेषु प्रसिद्धः ।

ज्ञानकर्तृकं सर्वं तस्माद्युक्तं विज्ञानमय आत्मा ब्रह्मेति । किंच विज्ञानं ब्रह्म सर्वे देवा इन्द्रादयो ज्येष्ठं प्रथमजत्वात्सर्वप्रवृत्तीनां वा तत्पूर्वकत्वात्प्रथमजं विज्ञानं ब्रह्मोपासते ध्यायन्ति । तस्मिन्विज्ञानमये ब्रह्मण्यभिमानं कृत्वोपासत इत्यर्थः । तस्मात्ते महतो ब्रह्मण उपासनाज्ज्ञानैश्वर्यवन्तो भवन्ति । तच्च विज्ञानं ब्रह्म चेद्यदि वेद विजानाति न केवलं वेदैव तस्माद्ब्रह्मणश्चेन्न प्रमाद्यति । बाह्ये ष्वेवानात्मस्वात्मभावितत्वात्प्राप्तं विज्ञानमये ब्रह्मण्यात्मभावनायाः प्रमदनं, तन्निवृत्त्यर्थमुच्यते तस्माच्चेन्न प्रमाद्यतीति । अन्नमयादिष्वात्मभावं हित्वा केवले विज्ञानमये ब्रह्मण्यात्मत्वं भावयन्नास्ते चेदित्यर्थः । ततः किं स्यादित्युच्यते— शरीरे पाप्मनो हित्वा । शरीराभिमाननिमित्ता हि सर्वे पाप्मानस्तेषां च विज्ञानमये ब्रह्मण्यात्माभिमानान्निमित्तापाये हानमुपपद्यते । छत्रापाय इव च्छायापायः । तस्माच्छरीराभिमाननिमित्तान्सर्वान्पाप्मनः शरीप्रभवाञ्शरीर एव हित्वा विज्ञानमयब्रह्मस्वरूपापन्नस्तत्स्थान्सर्वान्कामान्विज्ञानमयेनैवाऽऽत्मना समश्नुते । सम्यग्भुङ्क्त इत्यर्थः ।

प्रथमजत्वादिति । हिरण्यगर्भाभेदेनेत्यर्थः ।

तस्यैष एव शारीर आत्मा । यः
पूर्वस्य । तस्माद्वा एतस्माद्विज्ञानम-
यात् । अन्योऽन्तर आत्माऽऽनन्द-
मयः । तेनैष पूर्णः । स वा एष
पुरुषविध एव । तस्य पुरुष-
विधताम् । अन्वयं पुरुषविधः ।

तस्य पूर्वस्य मनोमयस्याऽऽत्मैष एव शरीरे मनोमये भवः शारीरः । कः । य एष विज्ञानमयः । तस्माद्वा एतस्मादित्युक्तार्थम् । आनन्दमय इति कार्यात्मप्रतीतिरधिकारान्मयट्शब्दाच्च । अन्नादिमया हि कार्यात्मानो भौतिका इहाधिकृताः । तदधिकारपतितश्चायमानन्दमयः । मयट्चात्र विकारार्थे दृष्टो यथाऽन्नमय इत्यत्र । तस्मात्कार्यात्माऽऽनन्दमयः प्रत्येतव्यः । संक्रमणाच्च, आनन्दमयमात्मानमुपसंक्रामतीति वक्ष्यति । कार्यात्मनां च संक्रमणमनात्मनां दृष्टम् । संक्रमणकर्मत्वेन चाऽऽनन्दमय आत्मा श्रूयते । यथाऽन्नमयमात्मानमुपसंक्रामतीति । नचाऽऽत्मन एवोपसंक्रमणम् । अधिकार-

विरोधादसंभवाच्च । न ह्यात्मनैवाऽऽत्मन उपसंक्रमणं संभवति । स्वात्मनि भेदाभावात् । आत्मभूतं च ब्रह्म । संक्रमितुः शिरआदिकल्पनानुपपत्तेश्च । न हि यथोक्तलक्षण आकाशादिकारणेऽकार्यपतिते शिरआद्यवयवरूपकल्पनोपपद्यते । अदृश्येऽनात्म्येऽनिलयनेऽनिरुक्तेऽस्थूलमनणु नेति नेत्यात्मेत्यादिविशेषापोहश्रुतिभ्यश्च । मन्त्रोदाहरणानुपपत्तेश्च । न हि प्रियशिरआद्यवयवविशिष्टे प्रत्यक्षतोऽनुभूयमान आनन्दमय आत्मनि ब्रह्मणि नास्ति ब्रह्मेत्याशङ्काभावात् "असन्नेव स भवति । असद्ब्रह्मेति वेद चेत्" इति मन्त्रोदाहरणमुपपद्यते । ब्रह्म पुच्छं प्रतिष्ठेत्यपि चानुपपन्नं पृथग्ब्रह्मणः प्रतिष्ठात्वेन ग्रहणम् । तस्मात्कार्यपतित एवाऽऽनन्दमयो न पर एवाऽऽत्माऽऽनन्द इति विद्याकर्मणोः फलम् । तद्विकार आनन्दमयः । स च विज्ञानमयादन्तरः । यज्ञादिहेतोर्विज्ञानमयस्यान्तर[त्व ?]श्रुतेः । ज्ञानकर्मणोर्हि फलं भोक्त्रर्थत्वादन्तरतमं स्यात् । अन्तरतमश्चाऽऽनन्दमय आत्मा पूर्वेभ्यः । विद्याकर्मणोः प्रियाद्यर्थत्वाच्च । प्रियादिप्रयुक्ते हि विद्याकर्मणी । तस्मात्प्रियादीनां फलरूपाणामात्मसंनिकर्षाद्विज्ञानमय्स्याऽऽभ्यन्तरत्वमुपपद्यते । प्रियादिवासनानिर्वृत्तो ह्यानन्दमयो विज्ञानमयाश्रितः स्वप्न उपलभ्यते ।

आनन्दमयः परमात्मेति वृत्तिकारैरुक्तं तन्निषेधेन व्याचष्टे—कार्यात्मप्रतीतिरित्यादिना । संक्रामतीत्येतदतिक्रामतीत्यभिप्रायेण व्याख्यातम् । प्राप्त्यभिप्रायं कस्मान्न व्याख्यायत इत्यत आह—न चाऽऽत्मन एवेति । अन्नमयादीनामतिक्रमणीयतया प्रकृतत्वादेकस्य कर्तृत्वकर्मत्वासंभवाच्च प्राप्तिः संक्रमणं न भवतीत्यर्थः । आनन्दमयस्य परमात्मत्वासंभवे हेत्वन्तराण्याह—शिरआदीत्यादिना । आनन्दमयस्य परमात्मत्वविवक्षायां मन्त्रे तस्यैवासत्त्वाशङ्का वक्तव्या । तदसंभवाच्च नाऽऽनन्दमयः परमात्मतया प्रतिपाद्यत इत्याह—मन्त्रोदाहरणानुपपत्तेश्चेति । न हि मन्त्रोदारहणमुपपद्यत इति संबन्धः । विशिष्टस्य विशेषणकार्यत्वात्सुख्यहमित्युपलभ्यमानो भोक्ताऽऽनन्दमय इत्युक्तम् । कथं तस्य विज्ञानमयादान्तरत्वमित्यत आह—स चेति । कर्त्रपेक्षया भोक्तृत्वस्योत्तरभावित्वं प्रसिद्धमेव । श्रुत्योक्तमित्यर्थः । एतत्स्फुटयति—ज्ञानकर्मणोर्हीति । शरीरादिभ्य आनन्दसाधनेभ्यः सकाशात्साध्येनाऽऽनन्देन विशिष्टोऽन्तरतमः प्रसिध्यतीत्यर्थः । किंच प्रियं च तत्साधनं चोद्दिश्य कर्ता विज्ञानकर्मणी अनुतिष्ठति । तत उद्देश्यत्वादस्याऽऽन्तर्यं सिद्धमित्याह—विद्याकर्मणोरिति । प्रियादिविशिष्टस्य स्वप्ने साक्षिणोपलभ्यत्वाच्च न मुख्यात्मत्वमित्याह—प्रियादिवासनेति ।

---

१ क. न ह्यात्मनैवे° । २ ख. ग. °या फलस्यो° । ३ ख. ग. °दप्यानन्त° ।

तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः ।
प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म
पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि द्वितीये
ब्रह्मवल्ल्यध्याये पञ्चमोऽनुवाकः ॥ ५ ॥

तस्याऽऽनन्दमयस्याऽऽत्मन इष्टपुत्रादिदर्शनजं प्रियं शिर इव शिरः। प्राधान्यात् । मोद इति प्रियलाभनिमित्तो हर्षः । स एव च प्रकृष्टो हर्षः प्रमोदः । आनन्द इति सुखसामान्यमात्मा। प्रियादीनां सुखावयवानां तेष्वनुस्यूतत्वादानन्द इति परं ब्रह्म । तद्धि शुभकर्मणा प्रत्युपस्थाप्यमाने पुत्रमित्रादिविषयविशेषोपाधावन्तःकरणवृत्तिविशेषे तमसाऽप्रच्छाद्यमाने प्रसन्नेऽभिव्यज्यते । तद्विषयसुखमिति प्रसिद्धं लोके । तद्वृत्तिविशेषप्रत्युपस्थापकस्य कर्मणोऽनवस्थितत्वात्सुखस्य क्षणिकत्वम् । तद्यदाऽन्तःकरणं[1] तपसा तमोघ्नेन विद्यया ब्रह्मचर्येण श्रद्धया च निर्मलत्वमापद्यते यावद्यावत्तावत्तावद्विविक्ते प्रसन्नेऽन्तःकरण आनन्दविशेष उत्कृष्यते विपुली भवति । वक्ष्यति च–"रसो वै सः। रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवति । एष ह्येवाऽऽनन्दयाति । एतस्यैवाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति च श्रुत्यन्तरात् । एवं च कामोपशमोत्कर्षापेक्षया शतगुणोत्तरोत्तरोत्कर्ष आनन्दस्य वक्ष्यते। एवं चोत्कृष्यमाणस्याऽऽनन्दमयस्याऽऽत्मनः परमार्थब्रह्मविज्ञानापेक्षया ब्रह्म परमेव यत्प्रकृतं सत्यज्ञानानन्तलक्षणं यस्य च प्रतिपत्त्यर्थं पञ्चान्नादिमयाः कोशा उपन्यस्ताः । यच्च तेभ्योऽभ्यन्तरं येन च ते सर्वे आत्मवन्तस्तद्ब्रह्म पुच्छं प्रतिष्ठा । तदेव च सर्वस्याविद्यापरिकल्पितस्य द्वैतस्यावसानभूतमद्वैतं ब्रह्म प्रतिष्ठा । आनन्दमयस्यैकत्वावसानत्वात् । अस्ति तदेकमविद्याकल्पितस्य द्वैतस्यावसानभूतमद्वैतं ब्रह्म प्रतिष्ठा पुच्छम् । तदेतस्मिन्नप्यर्थ एष श्लोको भवति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषदि द्वितीये ब्रह्मवल्ल्यध्याये पञ्चमोऽनुवाकः ॥ ५ ॥

---

१ क. तद्यथाऽन्तः° । ख. च. तद्यदन्त.° ।

यदुक्तं ज्ञानकर्मणोः फलभूत आनन्दमय इति तस्य साध्यत्वमौपाधिकं स्वमतानुसारेणाऽऽह—आनन्द इति । परमिति । कथं तर्हि विषयसुखस्य क्षणिकत्वं सातिशयत्वं च व्यञ्जकवृत्तिनिबन्धनमित्याह—तद्वृत्तिविशेषेति । ब्रह्मण आनन्दस्वभावत्व एव किं प्रमाणमित्यत आह—वक्ष्यति चेति । अन्तःकरणशुद्ध्युत्कर्षादेवाऽऽनन्दस्य सातिशयत्वमित्यत्र लिङ्गमाह— एवं चेति । यदि विषयविशेषजन्यत्वेनाऽऽनन्दोत्कर्षस्तदा निष्कामस्य विषयविशेषोपभोगासंभवादानन्दोत्कर्षो न श्राव्येत । आत्मस्वभावस्यैवाऽऽनन्दस्य व्यञ्जकान्तःकरणशुद्ध्युत्कर्षादेवोत्कर्ष इत्येवं तु सत्यकामहतत्वोत्कर्षादुत्कर्षः संभाव्यत इत्यर्थः । उक्तप्रकारेण विषयानन्दस्य सातिशयत्वे सति तद्विशिष्टस्याऽऽनन्दमयस्याब्रह्मत्वं सिद्धम् । सातिशयत्वेन प्रतिशरीरं भिन्नत्वात् । ब्रह्म तु तदध्यासाधिष्ठानमद्वितीयमित्याह-–एवं चेति । एतस्मिन्नप्यर्थ इति । आनन्दमयस्य प्रतिष्ठाभूतब्रह्मप्रकाशनपर इत्यर्थः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां द्वितीये ब्रह्मवल्ल्यध्याये पञ्चमोऽनुवाकः ॥ ५ ॥

अथ ब्रह्मवल्ल्यध्याये षष्ठोऽनुवाकः ।

असन्नेव स भवति । असद्ब्रह्मेति
वेद चेत् । अस्ति ब्रह्मेति चेद्वेद ।
सन्तमेनं ततो विदुरिति ।

असन्नेवासत्सम एव यथाऽसन्न पुरुषार्थसंबन्ध्येवं स भवति पुरुषार्थसंबन्धी । कोऽसौ । योऽसदविद्यमानं ब्रह्मेति वेद विजानाति चेद्यदि । तद्विपर्ययेण यत्सर्वविकल्पास्पदं सर्वप्रवृत्तिबीजं सर्वविशेषप्रत्यस्तमितमप्यस्ति तद्ब्रह्मेति वेद चेत् । कुतः पुनराशङ्का तन्नास्तित्वे, व्यवहारातीतत्वं ब्रह्मण इति ब्रूमः । व्यवहारविषये हि वाचाऽऽरम्भणमात्रेऽस्तित्वभाविता बुद्धिस्तद्विपरीते व्यवहारातीते नास्तित्वमपि प्रतिपद्यते । यथा घटादिर्व्यवहारविषयतयोपपन्नः संस्तद्विपरीतोऽसन्निति प्रसिद्धम् । एवं तत्सामान्यादिहापि स्याद्ब्रह्मणो नास्तित्वप्रत्याशङ्का। तस्मादुच्यते—अस्ति ब्रह्मेति चेद्वेदेति। किं पुनः स्यात्तदस्तीति विजानतस्तदाह—सन्तं विद्यमानब्रह्मस्वरूपेण परमार्थसदात्मापन्नमेनमेवंविदं

---

१ क. ज. झ. ञ. ट. °णवृत्त्युत्क°।

विदुर्ब्रह्मविदस्ततस्तस्मादस्तित्ववेदनात्सोऽन्येषां ब्रह्मवद्विज्ञेयो भवतीत्यर्थः । अथवा यो नास्ति ब्रह्मेति मन्यते स सर्वस्यैव सन्मार्गस्य वर्णाश्रमादिव्यवस्थालक्षणस्याश्रद्दधानतया नास्तित्वं प्रतिपद्यतेऽब्रह्मप्रतिपत्त्यर्थत्वात्तस्य । अतो नास्तिकः सोऽसन्नसाधुरुच्यते लोके । तद्विपरीतः सन्योऽस्ति ब्रह्मेति चेद्वेद स तद्ब्रह्मप्रतिपत्तिहेतुं सन्मार्गं वर्णाश्रमादिव्यवस्थालक्षणं श्रद्दधानतया यथावत्प्रतिपद्यते यस्मात्ततस्तस्मात्सन्तं साधुमार्गस्थमेनं विदुः साधवः । तस्मादस्तीत्येव ब्रह्म प्रतिपत्तव्यमिति वाक्यार्थः ।

तस्यैष एव शारीर आत्मा ।

यः पूर्वस्य । अथातोऽनुप्रश्नाः ।

तस्य पूर्वस्य विज्ञानमयस्यैष एव शरीरे विज्ञानमये भवः शारीर आत्मा । कोऽसौ । य एष आनन्दमयः । तं प्रति नास्त्याशङ्का नास्तित्वे, अपोढसर्वविशेषत्वात्तु ब्रह्मणो नास्तित्वं प्रत्याशङ्का युक्ता । सर्वसामान्याच्च ब्रह्मणो यस्मादेवमतस्तस्मात् । अथानन्तरं श्रोतुः शिष्यस्यानुप्रश्ना आचार्योक्तिमन्वेते प्रश्ना अनुप्रश्नाः ।

आनन्दमयस्य प्रकाशकोऽयं श्लोक इति केचन तान्प्रत्याह—तं प्रतीति । सविशेषतया प्रत्यक्षत्वादित्यर्थः । सर्वेषां साधारणत्वाच्च ब्रह्मणो व्यवहार्यत्वं सर्वान्प्रति भवेन्न च दृश्यते ततोऽपि नास्तित्वाशङ्का जायत इत्यर्थः ।

उताविद्वानमुं लोकं प्रेत्य । कश्चन

गच्छती३ । आहो विद्वानमुं लोकं

प्रेत्य । कश्चित्समश्नुता३ उ ।

सामान्यं हि ब्रह्माऽऽकाशादिकारणत्वाद्विदुषोऽविदुषश्च । तस्मादविदुषोऽपि ब्रह्मप्राप्तिराशङ्क्यते । उतापि । अविद्वानमुं लोकं परमात्मानमितः प्रेत्य कश्चन । चनशब्दोऽप्यर्थे । अविद्वानपि गच्छति प्राप्नोति किंवा न गच्छतीति द्वितीयोऽपि प्रश्नो द्रष्टव्योऽनुप्रश्ना इति बहुवचनाद्विद्वांसं प्रत्यन्यौ प्रश्नौ । यद्यविद्वान्सामान्यं कारणमपि ब्रह्म न गच्छति ततो विदुषोऽपि ब्रह्मागमनमाशङ्क्यते । अतस्तं प्रति प्रश्न आहो विद्वानिति । विद्वान्ब्रह्मविदपि कश्चिदितः प्रेत्यामुं लोकं समश्नुते उ इत्येवं स्थितेऽयादेशे यलोपे च कृतेऽकारस्य प्लुतिः

समश्नुता उ इत्युकारं च वक्ष्यमाणमधस्तादपकृष्य तकारं च पूर्वस्मादुतशब्दाद्व्यासज्याऽऽहो इत्येतस्मात्पूर्वमुतशब्दं संयोज्य पृच्छ्यत उताऽऽहो विद्वानिति। विद्वान्समश्नुतेऽमुं लोकम्।

आकाशादिकारणत्वादिति। भूतविशिष्टसर्वजीवकारणत्वादित्यर्थः।

किंवा यथाऽविद्वानेवं विद्वानपि न समश्नुत इत्यपरः प्रश्नः। द्वावेव वा प्रश्नौ विद्वदविद्वद्विषयौ। बहुवचनं तु सामर्थ्यप्राप्तप्रश्नान्तरापेक्षया घटते। "असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद" इति श्रवणादस्ति नास्तीति संशयस्ततोऽर्थप्राप्तः किमस्ति नास्तीति प्रथमोऽनुप्रश्नः। ब्रह्मणोऽपक्षपातित्वादविद्वान्गच्छति न गच्छतीति द्वितीयः। ब्रह्मणः समत्वेऽप्यविदुष इव विदुषोऽप्यगमनमाशङ्क्यते। किं विद्वान्समश्नुते न समश्नुत इति तृतीयोऽनुप्रश्नः। एतेषां प्रतिवचनार्थमुत्तरग्रन्थ। आरभ्यते तत्राऽस्तित्वमेव तावदुच्यते। यच्चोक्तं "सत्यं ज्ञानमनन्तं ब्रह्म" इति। तच्च कथं सत्यत्वमित्येतद्वक्तव्यमितीदमुच्यते सत्त्वोक्त्यैव सत्यत्वमुच्यते। उक्तं हि "सदेव सत्यम्" इति। तस्मात्सत्त्वोक्त्यैव सत्यत्वमुच्यते। कथमेवमर्थताऽवगम्यतेऽस्य ग्रन्थस्य शब्दानुगमादनेनैव ह्यर्थेनान्वितान्युत्तराणि वाक्यानि। "तत्सत्यमित्याचक्षते" "यदेष आकाश आनन्दो न स्यात्" इत्यादीनि।

कस्य सामर्थ्येन प्राप्तं प्रश्नान्तरमित्यत आह—असद्ब्रह्मेति। चेच्छब्दात्पाक्षिकसत्त्वावगमसामर्थ्यादित्यर्थः। सत्त्वं चेदुपपन्नं ब्रह्मणस्तावतैव सत्यत्वं सिध्यति। सतो बाधासंभवादित्यर्थः। एवमर्थतेति। सत्त्वोपपादनेन सत्यवस्तुविषयतेत्यर्थः।

तत्रासदेव ब्रह्मेत्याशङ्क्यते। कस्मात्। यदस्ति तद्विशेषतो गृह्यते यथा घटादि। यन्नास्ति तन्नोपलभ्यते यथा शशविषाणादि। तथा नोपलभ्यते ब्रह्म। तस्माद्विशेषतोऽग्रहणान्नास्तीति। तन्न। आकाशादिकारणत्वाद्ब्रह्मणः। न नास्ति[1] ब्रह्म कस्मादाकाशादि हि सर्वं कार्यं ब्रह्मणो जातं गृह्यते। यस्माच्च जायते किंचित्तदस्तीति दृष्टं लोके यथा घटाङ्कुरादिकारणं मृद्बीजादि। तस्मादाकाशादिकारणत्वादस्ति ब्रह्म। न चासतो जातं किंचिद्गृह्यते लोके कार्यम्। असतश्चेन्नामरूपादिकार्यं निरात्मकत्वान्नोपलभ्येत। उपलभ्यते तु, तस्मादस्ति ब्रह्म। असतश्चेत्कार्यं गृह्यमाणमप्यसदन्वितमेव तत्स्यात्। न चैवं तस्मादस्ति ब्रह्म।

---

[1] ख. ग. °स्तिता क°।

ब्रह्मणः सत्त्वसाधनं नामासत्त्वव्यावृत्तिरेवेत्यभिप्रेत्यासत्त्वशङ्कामुद्भावयति—तत्रासदेवेति । विप्रतिपन्नमाकाशादि सत्पूर्वकं कार्यत्वाद्घटवदिति लौकिकव्याप्त्यवष्टम्भेन सत्कारणं तावात्सिद्धम् । तस्य च देशादिकारणत्वेन देशाद्यनवच्छिन्नत्वाद्ब्रह्मपदवाच्यत्वं सिद्धम् । तस्य विशेषतोऽनुपलम्भेनासच्छङ्का जायते सा कारणत्वेन व्यावर्त्यतेऽनेन तु कारणत्वात्सत्त्वं साध्यते । आश्रयासिद्धिप्रसङ्गादिति भावः । इतोऽपि जगदुपादाने नासत्त्वाशङ्का कार्येत्याह—न चासत इति ।

तत्र कथमसतः सज्जायेतेति श्रुत्यन्तरमसतः सज्जन्मासंभवमन्वाचष्टे न्यायतः । तस्मात्सदेव ब्रह्मेति युक्तम् । तद्यदि मृद्बीजादिवत्कारणं स्यादचेतनं तर्हि । न । कामयितृत्वात् । न हि कामयित्रचेतनमस्ति लोके । सर्वज्ञं हि ब्रह्मेत्यवोचाम । अतः कामयितृत्वोपपत्तिः । कामयितृत्वादस्मदादिवदनाप्तकामं चेत् । न । स्वातन्त्र्यात् । यथाऽन्यान्परवशीकृत्य कामादिदोषाः प्रवर्तयन्ति न तथा ब्रह्मणः प्रवर्तकाः कामाः । कथं तर्हि, सत्यज्ञानलक्षणाः स्वात्मभूतत्वाद्विशुद्धा न तैर्ब्रह्म प्रवर्त्यते । तेषां तु तत्प्रवर्तकं ब्रह्म प्राणिकर्मापेक्षया । तस्मात्स्वातन्त्र्यं कामेषु ब्रह्मणः । अतो नानाप्तकामं ब्रह्म साधनान्तरानपेक्षत्वाच्च ।

न्यायत इति । असदन्वयादर्शनादिति युक्तित इत्यर्थः । एवमसत्त्वाशङ्कां निरस्याचेतनत्वाशङ्कां प्रधानवादिनः प्रसङ्गान्निराचष्टे—तद्यदीति । यद्यपि सांख्यमते चेतनस्य निर्विकारत्वात्कामयितृत्वमसिद्धं तथाऽपि लौकिकव्याप्तिबलेन कामयितृत्वादचेतनत्वशङ्का निवर्त्येत इत्याह—न हीति । तर्हि लौकिकव्याप्तिबलेनैवानाप्तकामत्वमपि प्राप्तमित्याशङ्क्याऽऽह—कामयितृत्वादित्यादिना । जीवानामनाप्तानन्दत्वं परवशत्वान्न तदस्ति ब्रह्मण इत्यर्थः । कथंभूतास्तर्हि ब्रह्मणः कामा इत्याशङ्क्यामाह—सत्यज्ञानलक्षणा इति । सत्यज्ञान(नं) लक्षणं स्वरूपं येषां ते तथोक्ताः । एतदुक्तं भवति । मायाप्रतिबिम्बितं हि ब्रह्म जगतः कारणं मायापरिणामैरेव कामैः कामयितृ । तेषां च परिणामानामविद्याद्यनभिभूतचिद्व्याप्तत्वात्सत्यज्ञानात्मकत्वं ब्रह्मतादात्म्याच्चाधर्माद्यननुस्पृष्टत्वेन शुद्धत्वम् । ततो जीवकामवैलक्षण्यं सिद्धमिति । तर्हि ब्रह्मणः कामाः पुण्यकारिणामप्यनिष्टफलप्राप्त्यनुकूलाः स्युः स्वातन्त्र्यादित्याशङ्क्याऽऽह—तेषां त्विति । कामस्य शरीरादिसंबन्धजन्यत्वप्रसिद्धेर्ब्रह्मणः शरीरादिमत्त्वप्रसङ्ग इति नाऽऽशङ्कनीयमित्याह—साधनान्तरानपेक्षत्वाच्चेति । कामसंस्कारवत्या मायाया ब्रह्मतादात्म्यात्तत्परिणामानां कामानां ब्रह्मतादात्म्यान्न शरीरादिनिमित्तापेक्षाऽस्तीत्यर्थः ।

---

१ ड. ठ. तत्कथं ।

किंच यथाऽन्येषामनात्मभूता धर्मादिनिमित्तापेक्षाः कामाः स्वात्मव्यतिरि[१]क्तकार्यकरणसाधनान्तरापेक्षाश्च न तथा ब्रह्मणो निमित्ताद्यपेक्षत्वं किं तर्हि स्वात्मनोऽनन्यास्तदेतदाह—

सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽ-
तप्यत । स तप[२]स्तप्त्वा । इद सर्वमसृजत ।

सोऽकामयत स आत्मा यस्मादाकाशः संभूतोऽकामयत कामितवान् । कथं, बहु स्यां बहु प्रभूतं स्यां भवेयम् । कथमेकस्यार्थान्तराननुप्रवेशे बहुत्वं स्यादित्युच्यते । प्रजायेयोत्पद्येय । न हि पुत्रोत्पत्त्येवार्थान्तरविषयं बहुभवनं कथं तर्ह्यात्मस्थानभिव्यक्तनामरूपाभिव्यक्त्या । यदाऽऽत्मस्थे अनभिव्यक्ते नामरूपे व्याक्रियेते तदा नामरूपे आत्मस्वरूपापरित्यागेनैव ब्रह्मणाऽप्रविभक्तदेशकाले सर्वावस्थासु व्याक्रियेते तदा तन्नामरूपव्याकरणं ब्रह्मणो बहुभवनम् । नान्यथा निरवयवस्य ब्रह्मणो बहुत्वापत्तिरुपपद्यतेऽल्पत्वं वा । यथाऽऽकाशस्याल्पत्वं बहुत्वं च वस्त्वन्तरकृतमेव । अतस्तद्द्वारेणैवाऽऽत्मा बहु भवति । न ह्यात्मनोऽन्यदनात्मभूतं तत्प्रविभक्तदेशकालं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भवद्भविष्यद्वा वस्तु विद्यते । अतो नामरूपे सर्वावस्थे ब्रह्मणैवाऽऽत्मवती, न ब्रह्म तदात्मकम् । ते तत्प्रत्याख्याने न स्त एवेति तदात्मके उच्येते । ताभ्यां चोपाधिभ्यां ज्ञातृज्ञेयज्ञानशब्दार्थादिसर्वसंव्यवहारभाग्ब्रह्म । स आत्मैवंकामः संस्तपोऽतप्यत । तप इति ज्ञानमुच्यते । "यस्य ज्ञानमयं तपः" इति श्रुत्यन्तराद्वाप्तकामत्वाच्चेतरस्यासंभव एव तपसः । तत्तपोऽतप्यत तप्तवान् । सृज्यमानजगद्रचनादिविषयामालोचनामकरोदात्मेत्यर्थः । स एवमालोच्य तपस्तप्त्वा प्राणिकर्मादिनिमित्तानुरूपमिदं सर्वं जगद्देशतः कालतो नाम्ना रूपेण च यथानुभवं सर्वैः प्राणिभिः सर्वावस्थैरनुभूयमानमसृजत सृष्टवान् ।

तद्द्वारेणैवेति । नामरूपशक्त्यात्मकमायापरिणामद्वारेणैव । नामरूपशक्त्यात्मिका जडरूपा मायाऽङ्गीकृता चेत्तर्हि सा प्रधानवत्पृथक्सतीत्यद्वैतहानिरित्याशङ्क्याऽऽह—न हीति । आत्मातिरिक्तं किं स्वतः सिध्यति परतो वा । नाऽऽद्यः । जाड्यहानेरतिरेकहानेश्च । न द्वितीयः । प्रमासंसर्गानिरूपणात् । न च भिन्नदेशकालयोः संयो-

१ ख. ग. घ. 'रिक्ताः कार्यकार' । २ ख. ग. घ. ङ. ठ. 'सः । स तपोऽ' ।

आदि संभवति विषयविषयिभावो वा । नियामकगवेषणात् । न च स्वभाव एव संबन्धः । द्वयोः स्वभावयोः संबन्धत्वेनैवोपक्षये संबन्ध्यभावप्रसङ्गात् । न हि स्वात्मानं प्रति स्वस्यैव संबन्धित्वमात्माश्रयापातात् । तथाविधार्थाभावे व्यवहारमात्रप्रवर्तकत्वे च मिथ्याव्यवहारापातादनिर्वचनीयवाद एव पर्यवस्यतीति भावः । यस्मादात्मातिरिक्तं वस्तु न संभाव्यते तस्मादात्मतादात्म्येनैव नामरूपयोः सिद्धिरित्याह— अत इति । तर्हि ब्रह्मणः सप्रपञ्चताप्रसङ्ग इति न वाच्यमित्याह— न ब्रह्मेति । न ब्रह्म तदात्मकमजडत्वात्तत्परिहारेणापि सिद्धिसंभवादित्यर्थः । कथं तर्हि ते ब्रह्मात्मके तत्राऽऽह— ते तदिति । स्वप्नावबुद्धनभोमक्षणवदारोपितस्यानुभवप्रत्याख्यानेन सिद्ध्यसंभवादनुभाव्ये नामरूपे अनुभवात्मकब्रह्मात्मके कथ्येते न त्वैक्याभिप्रायेणेत्यर्थः । न केवलं ब्रह्मणो बहुरूपत्वं मायोपाधिकं सर्वव्यवहारास्पदत्वं चेत्याह— ताभ्यामिति ।

यदिदं किंच । तत्सृष्ट्वा । तदेवानुप्राविशत् ।

यदिदं किंच यत्किंचेदमविशिष्टम् । तदिदं जगत्सृष्ट्वा किमकरोदित्युच्यते— तदेव सृष्टं जगदनुप्राविशदिति । तत्रैतच्चिन्त्यं कथमनुप्राविशदिति । किं यः स्रष्टा स तेनैवाऽऽत्मनाऽनुप्राविशदुतान्येनेति । किं तावद्युक्तम् । क्त्वाप्रत्ययश्रवणाद्यः स्रष्टा स एवानुप्राविशदिति ।

प्रवेशस्यानिर्वाच्यताद्योतनेन जीवस्य ब्रह्मात्मतायां प्रवेशवाक्यस्य तात्पर्यं दर्शयितुं विचारमारभते— तत्रैतच्चिन्त्यमित्यादिना । विमर्शे सति क्त्वाश्रुत्यनुरोधात्स्रष्टुरेव प्रवेश इत्युक्तं सिद्धान्तिना ।

ननु न युक्तं मृद्वच्चेत्कारणं ब्रह्म तदात्मकत्वात्कार्यस्य । कारणमेव हि कार्यात्मना परिणतमित्यतोऽप्रविष्ट इव कार्योत्पत्तेरूर्ध्वं पृथक्कारणस्य पुनः प्रवेशोऽनुपपन्नः । न हि घटपरिणामव्यतिरेकेण मृदो घटे प्रवेशोऽस्ति । यथा घटे चूर्णात्मना मृदोऽनुप्रवेश एवमन्येनाऽऽत्मना नामरूपकार्येऽनुप्रवेश आत्मन इति चेच्छ्रुत्यन्तराच्च "अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य" इति । नैवं युक्तमेकत्वाद्ब्रह्मणः । मृदात्मनस्त्वनेकत्वात्सावयवत्वाच्च युक्तो घटे मृदश्चूर्णात्मनाऽनुप्रवेशः । मृदश्चूर्णस्याप्रविष्टदेशवत्त्वाच्च । न त्वात्मन एकत्वे सति निरवयवत्वादप्रविष्टदेशाभावाच्च प्रवेश उपपद्यते । कथं तर्हि प्रवेशः स्यात् । युक्तश्च प्रवेशः श्रुतत्वात्तदेवानुप्राविशदिति । सावयवमेवास्तु तर्हि सावयवत्वान्मुखे हस्तप्रवेशवन्नामरूपकार्ये जीवात्मनाऽनुप्रवेशो युक्त एवेति चेन्नाशून्यत्वात् । न हि

---

१ झ. ठ. °त्मतया प्र° ।

कार्यात्मना परिणतस्य नामरूपकार्यदेशव्यतिरेकेणाऽऽत्मशून्यः प्रदेशोऽस्ति यं प्रविशेज्जीवात्मना । कारणमेव चेत्प्रविशेज्जीवात्मत्वं जह्याद्यथा घटो मृत्प्रवेशे घटत्वं जहाति । तदेवानुप्राविशदिति च श्रुतेर्न कारणानुप्रवेशो युक्तः ।

पूर्ववाद्याह— ननु न युक्तमिति । सृष्टिप्रवेशक्रिययोः पूर्वापरकालीनत्वसंभवे सति कर्त्रैक्यं क्त्वाश्रुत्या बोध्येत न तु प्रवेशस्योत्तरकालता संभवति । सृष्टिसमय एवोपादानस्य कार्यात्मनाऽवस्थितत्वादित्यर्थः । एतदेव विवृणोति—कारणमेव हीति । अप्रविष्टे यथा मठादौ देवदत्तस्य प्रवेशो दृष्टस्तथा कार्योत्पत्तेरूर्ध्वं पृथक्प्रवेशो न संभवतीत्यर्थः । सिद्धान्त्येकदेशिनां मतमुद्भाव्य पूर्ववादी दूषयति—यथा घट इत्यादिना । स्रष्टुरन्यस्य वा प्रवेशो न संभवतीति चेत्कथं तर्हि प्रवेशो वाच्य इति सिद्धान्त्येकदेश्याह—कथमिति । नास्त्येवेति न वक्तव्यमित्याह—युक्तश्चेति । स एवाऽऽह गतिं—सावयवमेवेति । पूर्ववादी दूषयति—नाशून्यत्वादिति । कार्यात्मना परिणतस्य ब्रह्मणो नामरूपात्मकं कार्यमेव देशस्तद्व्यतिरेकेण न ह्यन्यः प्रदेशोऽस्ति । यत्कारणमेव कार्याकारेण परिणतं तत्प्रति कार्यविशेषो जीवात्मा प्रवेक्ष्यतीति न शङ्कनीयमित्याह—कारणमेव चेदिति । कार्यविशेषस्य प्रवेशमङ्गीकृत्य दूषणमुक्तं स न संभवति श्रुतिविरोधादित्याह—तदेवेति ।

कार्यान्तरमेव स्यादिति चेत् । तदेवानुप्राविशदिति जीवात्मरूपं कार्यं नामरूपपरिणतं कार्यान्तरमेवाऽऽपद्यत इति चेन्न । विरोधात् । न हि घटो घटान्तरमापद्यते । व्यतिरेकश्रुतिविरोधाच्च । जीवस्य नामरूपकार्यव्यतिरेकानुवादिन्यः श्रुतयो विरुध्येरन् । तदापत्तौ मोक्षासंभवाच्च । न हि यतो मुच्यमानस्तदेवाऽऽपद्यते । न हि शृङ्खलापत्तिर्बद्धस्य तस्करादेः ।

कारणपरामर्शकेन तच्छब्देन कार्यमुपलक्ष्य कार्यान्तरस्य तत्र प्रवेशो विधीयतेऽप्रदेशासंभवात् । अतो न श्रुतिविरोध इति सिद्धान्तैकदेशिमतमुद्भाव्य दूषयति—कार्यान्तरमेवेत्यादिना ।

बाह्यान्तर्भेदेन परिणतमिति चेत्तदेव कारणं ब्रह्म शरीराद्याधारत्वेन तदन्तर्जीवात्मनाऽऽधेयत्वेन च परिणतमिति चेन्न । बहिष्ठस्य प्रवेशोपपत्तेः । न हि यो यस्यान्तःस्थः स एव तत्प्रविष्ट उच्यते । बहिष्ठस्यानुप्रवेशः स्यात्प्रवेशशब्दार्थस्यैवं दृष्टत्वात् । यथा गृहं कृत्वा प्राविशदिति । जलसूर्यकादिप्रतिबिम्बवत्प्रवेशः स्यादिति चेन्न । अपरिच्छिन्नत्वादमूर्तत्वाच्च ।

---

१ ङ. ठ. °वात्मना प्र° ।

परिच्छिन्नस्य मूर्तस्यान्यस्यान्यत्र प्रसादस्वभावके जलादौ सूर्यकादिप्रतिबिम्बोदयः स्यात् । न त्वात्मनः, अमूर्तत्वादाकाशादिकारणस्याऽऽत्मनः, अव्यापकत्वात् । तद्विप्रकृष्टदेशप्रतिबिम्बाधारवस्त्वन्तराभावाच्च प्रतिबिम्बवत्प्रवेशो न युक्तः ।

कारणवाचकेन तच्छब्देन कार्यलक्षणायामविवक्षितलक्षणा चेत्प्रसज्येत तर्हि कारणपर एव तच्छब्दोऽस्त्वित्याहान्यः सिद्धान्तैकदेशी–बाह्येति । अस्मिन्पक्षे प्रवेशश्रुतेर्मुख्यार्थो न लभ्येतेत्याह—न बहिष्ठेति । अन्यस्य वेदान्तिनो मतमुद्भाव्य दूषयति— जल इत्यादिना ।

एवं तर्हि नैवास्ति प्रवेशो न च गत्यन्तरमुपलभामहे । "तदेवानुप्राविशत्" इति च श्रुतेः । श्रुतिश्च नोऽतीन्द्रियविषये विज्ञानोत्पत्तौ निमित्तम् । न चास्माद्वाक्याद्यत्नवतामपि विज्ञानमुत्पद्यते । हन्त तर्ह्यनर्थकत्वादपोह्यमेतद्वाक्यं "तत्सृष्ट्वा तदेवानुप्राविशत्" इति । न । अन्यार्थत्वात् । किमर्थमस्थाने चर्चा । प्रकृतो ह्यन्यो विवक्षितोऽस्य वाक्यस्यार्थोऽस्ति स स्मर्तव्यः । "ब्रह्मविदाप्नोति परम्" " सत्यं ज्ञानमनन्तं ब्रह्म " " यो वेद निहितं गुहायाम् " इति । तद्विज्ञानं च विवक्षितं प्रकृतं च तत् । ब्रह्मस्वरूपानुगमाय चाऽऽकाशाद्यन्नमयान्तं कार्यं प्रदर्शितं ब्रह्मानुगमश्चाऽऽरब्धः । तत्रान्नमयादात्मनोऽन्योऽन्तर आत्मा प्राणमयस्तदन्तर्मनोमयो विज्ञानमय इति । विज्ञानगुहायां प्रवेशितस्तत्र चाऽऽनन्दमयो विशिष्ट आत्मा प्रदर्शितः । अतः परमानन्दमयलिङ्गाधिगमद्वारेणाऽऽनन्दविवृद्ध्यवसान आत्मा । ब्रह्म पुच्छं प्रतिष्ठा सर्वविकल्पास्पदो निर्विकल्पोऽस्यामेव गुहायामधिगन्तव्य इति तत्प्रवेशः प्रकल्प्यते ।

एवं सिद्धान्तैकदेशीयं निरस्य पूर्ववाद्युपसंहरति—एवं तर्हीति । नैवास्ति प्रवेशो ब्रह्मणस्ततोऽन्यस्यापि प्रवेशो न संभवतीत्युक्तमित्याह— न चेति । इतरस्यापि प्रवेशः कल्पयितुं न शक्यत इत्याह— तदेवानुप्राविशदिति । सा च श्रुतिः स्रष्टुः प्रवेशमाह । सा चास्माकं मीमांसकानां प्रमाणं ततस्तद्विरोधेनान्यस्य प्रवेशकल्पनाऽयुक्तेति भावः । तर्हि श्रुतिशरणतयैव ब्रह्मण एव प्रवेश उच्यतामित्याशङ्क्याऽऽह —न चेति । तस्मादन्धो मणिमविन्ददितिवदर्थशून्यमेवेदं वाक्यमिति निगमयति–हन्तेति । शक्तिगोचरस्यार्थस्यासंभवादर्थशून्यत्वं तात्पर्यगोचरस्य वा । नाऽऽद्यः । आकाशादेरविप्रकृष्टदेशेऽपि

१ क. ट. ठ. °तोऽप्यन्यो ।

जलेऽमूर्तस्य प्रतिबिम्बाभाववदमूर्तस्यापि ब्रह्मणोऽनिर्वाच्यायाविद्यासु प्रतिबिम्बितस्य सृष्टयुत्तरकालमन्तःकरणादिषु प्रतिबिम्बभावसंभवादित्याह—नेति । न द्वितीय इत्याह—अन्यार्थत्वादिति । एतत्स्फुटयति—किमर्थमित्यादिना । अतः परमिति । बुद्धिगुहाप्रवेशादनन्तरमानन्दमय एव विशिष्टोऽर्थो विशेष्यस्य चिद्धातोर्लिङ्गं[1] विशिष्टस्य विशेष्याऽव्यभिचारदर्शनात्तदधिगमद्वारेणाऽऽनन्दविवृद्ध्यवसान आत्मा ब्रह्मरूपोऽस्यामेव गुहायामधिगन्तव्य इत्यभिप्रेत्य जले सूर्यप्रवेशवदनिर्वाच्यः प्रवेशोऽभिधीयत इत्यर्थः ।

न ह्यन्यत्रोपलभ्यते ब्रह्म निर्विशेषत्वाद्विशेषसंबन्धो ह्युपलब्धिहेतुर्दृष्टः । यथा राहोश्चन्द्रार्कविशिष्टसंबन्धः । एवमन्तःकरणगुहात्मसंबन्धो ब्रह्मण उपलब्धिहेतुः । संनिकर्षादवभासात्मकत्वाच्चान्तःकरणस्य । यथा चाऽऽलोकविशिष्टा घटाद्युपलब्धिरेवं बुद्धिप्रत्ययालोकविशिष्टात्मोपलब्धिः स्यात्तस्मादुपलब्धिहेतौ गुहायां निहितमिति प्रकृतमेव । तद्वृत्तिस्थानीये त्विह पुनस्तत्सृष्ट्वा तदेवानुप्राविशदित्युच्यते ।

बुद्धिगुहायामेव ब्रह्मण उपलब्धिसंभवात्तत्रैव प्रवशोऽभिधित्सित इत्याह—न हीति । नन्वन्यत्रोपलब्ध्यनर्हं ब्रह्म बुद्धौ वा कथमुपलभ्यत इत्याशङ्क्योपाधेर्योग्यताविशेषासंभवादित्याह—विशेषेति । संनिकर्षादिति । अन्तःकरणसंसर्गादेव देहघटादिषु चैतन्याभिव्यक्तिर्न स्वतः । अन्तःकरणं चाव्यवधानेनैव चैतन्याभिव्यञ्जकमन्वयव्यतिरेकाभ्यामित्यर्थः । यथा चास्वच्छस्वभावके घटादौ मुखं न प्रतिबिम्बते जलादौ स्वच्छस्वभावके प्रतिबिम्बते तथा सत्त्वप्रधानस्यान्तःकरणस्य प्रसादस्वाभाव्याद्घटते तत्र ब्रह्मोपलब्धिरित्याह—अवभासात्मकत्वाच्चेति । किंच यथा जाड्यसाम्येऽपि तमोलक्षणावरणाभिभवसमर्थ आलोकोऽङ्गी क्रियते तथा जाड्यसाम्येऽप्यन्तःकरणस्यैव प्रत्ययाकारपरिणतस्याज्ञानलक्षणावरणाभिभवसामर्थ्यमङ्गीकर्तव्यमित्याह—यथा चेति ।

तदनु प्रविश्य । सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत् । यदिदं किंच ।

तदेवेदमाकाशादिकारणं कार्यं सृष्ट्वा तदनुप्रविष्टमिवान्तर्गुहायां बुद्धौ द्रष्टृ श्रोतृ मन्तृ विज्ञात्रित्येवं विशेषवदुपलभ्यते । स एव तस्य प्रवेशस्तस्मा-

---

१ ञ. ञ. ठ. 'लिङ्गवि' । २ ख. ग. 'शेष्यस्याव्य' ।

दस्ति तत्कारणं ब्रह्म । अतोऽस्तित्वादस्तीत्येवोपलब्धव्यं तत् । तत्कार्यमनुप्रविश्य, किं, सच्च मूर्तं त्यच्चामूर्तमभवत् । मूर्तामूर्ते ह्यव्याकृतनामरूपे आत्मस्थे अन्तर्गतेनाऽऽत्मना व्याक्रियेते व्याकृते च मूर्तामूर्तशब्दवाच्ये ते आत्मना त्वप्रविभक्तदेशकाले इति कृत्वाऽऽत्मा ते अभवदित्युच्यते । किंच निरुक्तं चानिरुक्तं च निरुक्तं नाम निष्कृष्य समानासमानजातीयेभ्यो देशकालविशिष्टतयेदं तदित्युक्तमनिरुक्तं तद्विपरीतं निरुक्तानिरुक्ते अपि मूर्तामूर्तयोरेव विशेषणे । यथा सच्च त्यच्च प्रत्यक्षपरोक्षे, तथा निलयनं चानिलयनं च । निलयनं नीडमाश्रयो मूर्तस्यैव धर्मः । अनिलयनं तद्विपरीतममूर्तस्यैव धर्मः । त्यदनिरुक्तानिलयनान्यमूर्तधर्मत्वेऽपि व्याकृतविषयाण्येव । सर्गोत्तरकालभावश्रवणात् । त्यदिति प्राणाद्यनिरुक्तं तदेवानिलयनं च । अतो विशेषणान्यमूर्तस्य व्याकृतविषयाण्येवैतानि । विज्ञानं चेतनमविज्ञानं तद्रहितमचेतनं पाषाणादि । सत्यं च व्यवहारविषयमधिकारान्न परमार्थसत्यमेकमेव हि परमार्थसत्यं ब्रह्म । इह पुनर्व्यवहारविषयमापेक्षिकं सत्यं मृगतृष्णिकाद्यनृतापेक्षयोदकादि सत्यमुच्यते । अनृतं च तद्विपरीतम् । किं पुनरेतत्सर्वमभवत्परमार्थसत्यं किं पुनस्तद्ब्रह्म । सत्यं ज्ञानमनन्तं ब्रह्मेति प्रकृतत्वात् ।

निलयनं गृहप्रासादादिमूर्तसंनिवेशविशेषोऽवयवसंस्थानविशेषराहित्यमनिलयम् । अनिरुक्तत्वाद्यमूर्तधर्मश्चेद्ब्रह्मण एव किं न स्यादित्यत आह—त्यदनिरुक्तानिलयनानीति ।

तत्सत्यमित्याचक्षते । तदप्येष श्लोको भवति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि द्वितीये ब्रह्मवल्ल्यध्याये षष्ठोऽनुवाकः ॥ ६ ॥

यस्मात्सत्यदादिकं मूर्तामूर्तधर्मजातं यत्किंचेदं सर्वमविशिष्टं विकारजातमेकमेव सच्छब्दवाच्यं ब्रह्माभवत्तद्व्यतिरेकेणाभावान्नामरूपविकारस्य, तस्मात्तद्ब्रह्म सत्यमित्याचक्षते । ब्रह्मविदोऽस्ति नास्तीत्यनुप्रश्नः प्रकृतस्तस्य प्रतिवचनविषय एतदुक्तमात्माऽकामयत बहु स्यामिति । स यथाकामं चाऽऽकाशादिकार्यं सत्यदादिलक्षणं सृष्ट्वा तदनु प्रविश्य पश्यञ्शृण्वन्मन्वानो विजानन्बह्वभवत्तस्मात्तदेवेदमाकाशादिकारणं कार्यस्थं परमे व्योमन्हृदयगुहायां निहितं

१ क. घ. छ. ञ. ट. ठ. °ते मू° । २ ख. ग. झ. ञ. °मूर्तं सं° ।

तत्प्रत्ययावभासविशेषेणोपलभ्यमानमस्तीत्येवं विजानीयादित्युक्तं भवति। तदेतस्मिन्नर्थे ब्राह्मणोक्त एष श्लोको मन्त्रो भवति। यथा पूर्वेष्वन्नमयाद्यात्मप्रकाशकाः पञ्चस्वप्येवं सर्वान्तरतमात्मास्तित्वप्रकाशकोऽपि मन्त्रः कार्यद्वारेण भवति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषदि द्वितीये ब्रह्मवल्ल्यध्याये षष्ठोऽनुवाकः ॥ ६ ॥

तत्सत्यमित्याचक्षत इत्यस्योपपत्तिमाह—यस्मादिति। पदानि व्याख्याय प्रकृतानुप्रश्ननिराकरणे प्रकरणस्य तात्पर्यं सोऽकामयतेत्यादेर्दर्शयति—अस्ति नास्तीत्यादिना। तस्या बुद्धिगुहायाः प्रत्यया अहं कर्ता भोक्तेत्यादयस्त एवावभासविशेषास्तैर्व्यज्यमानं विशिष्टस्य विषयत्वेऽपि स्वरूपस्याविषयत्वादित्यर्थः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां द्वितीये ब्रह्मवल्ल्यध्याये षष्ठोऽनुवाकः ॥ ६ ॥

अथ ब्रह्मवल्ल्यध्याये सप्तमोऽनुवाकः।

असद्वा इदमग्र आसीत्। ततो वै सदजायत। तदात्मानꣳ स्वयमकुरुत। तस्मात्तत्सुकृतमुच्यत इति।

असद्वा इदमग्र आसीत्। असदिति व्याकृतनामरूपविशेषविपरीतरूपमव्याकृतं ब्रह्मोच्यते। न पुनरत्यन्तमेवासत्। न ह्यसतः सज्जन्मास्ति। इदमिति नामरूपविशेषवद्व्याकृतं जगदग्रे पूर्वं प्रागुत्पत्तेर्ब्रह्मैवासच्छब्दवाच्यमासीत्। ततोऽसतो वै सत्प्रविभक्तनामरूपविशेषमजायतोत्पन्नम्। किं ततः प्रविभक्तं कार्यमिति पितुरिव पुत्रो नेत्याह। तदसच्छब्दवाच्यं स्वयमेवाऽऽत्मानमेवाकुरुत कृतवत्। यस्मादेवं तस्मात्तद्ब्रह्मैव सुकृतं स्वयं कर्तृच्यते। स्वयं कर्तृ ब्रह्मेति प्रसिद्धं लोके। सर्वकारणत्वात्। यस्माद्वा स्वयमकरोत्सर्वं सर्वात्मना तस्मात्पुण्यरूपेणापि तदेव ब्रह्म कारणं सुकृतमुच्यते। सर्वथाऽपि तु फलसंबन्धादिकारणं सुकृतशब्दवाच्यं प्रसिद्धं लोके। यदि वाऽन्यत्सा प्रसिद्धिर्नित्ये चेतनवत्कारणे सत्युपपद्यते। तस्मादस्ति तद्ब्रह्म सुकृतप्रसिद्धेः।

---

१ ज. झ. ठ. °ध्वमस्य°।

सुकृतमिति । क्तप्रत्ययः सुष्ठु क्रियत इति कर्माभिधायकोऽपि च्छान्दस्या प्रक्रियया सुष्ठु करोतीति कर्तरि व्याख्यातः ।

इतश्चास्ति । कुतः । रसत्वात् । कुतो रसत्वप्रसिद्धिर्ब्रह्मण इत्यत आह—

यद्वै तत्सुकृतम् । रसो वै सः । रसꣳ ह्येवायं
लब्ध्वाऽऽनन्दी भवति । को ह्येवान्यात्कः
प्राण्यात् । यदेष आकाश आनन्दो न
स्यात् । एष ह्येवाऽऽनन्दयाति ।

यद्वै तत्सुकृतम् । रसो वै सः । रसो नाम तृप्तिहेतुरानन्दकरो मधुराम्लादिः प्रसिद्धो लोके । रसमेवायं लब्ध्वा प्राप्याऽऽनन्दी सुखी भवति । नासत आनन्दहेतुत्वं दृष्टं लोके । बाह्यानन्दसाधनरहिता अप्यनीहा निरेषणा ब्राह्मणा बाह्यरसलाभादिव सानन्दा दृश्यन्ते विद्वांसो नूनं ब्रह्मैव रसस्तेषाम् । तस्मादस्ति तत्तेषामानन्दकारणं रसवद्ब्रह्म । इतश्चास्ति । कुतः । प्राणनादिक्रियादर्शनात् । अयमपि हि पिण्डो जीवतः प्राणेन प्राणित्यपानेनापानिति । एवं वायवीया ऐन्द्रियकाश्च चेष्टाः संहतैः कार्यकरणैर्निर्वर्त्यमाना दृश्यन्ते । तच्चैकार्थवृत्तित्वेन संहननं नान्तरेण चेतनमसंहतं संभवति । अन्यत्रादर्शनात् । तदाह—यद्यदि । एष आकाशे परमे व्योम्नि गुहायां निहित आनन्दो न स्यान्न भवेत्को ह्येव लोकेऽन्यादपानचेष्टां कुर्यादित्यर्थः । कः प्राण्यात्प्राणनं वा कुर्यात्तस्मादस्ति तद्ब्रह्म । यदर्थाः कार्यकरणप्राणनादिचेष्टास्तत्कृत एव चाऽऽनन्दो लोकस्य । कुतः । एष ह्येव पर आत्माऽऽनन्दयात्यानन्दयाति सुखयति लोकं धर्मानुरूपम् । स एवाऽऽत्माऽऽनन्दरूपोऽविद्यया परिच्छिन्नो विभाव्यते प्राणिभिरित्यर्थः । भयाभयहेतुत्वाद्विद्वदविदुषोरस्ति तद्ब्रह्म । सद्वस्त्वाश्रयणेन ह्यभयं भवति । नासद्वस्त्वाश्रयणेन भयनिवृत्तिरुपपद्यते ।

एकार्थवृत्तित्वेनेति । एकप्रयोजनसाधनत्वेन परस्परायत्ततेत्यर्थः । अन्यत्रेति । गृहप्रासादादिषु स्वतन्त्रं गृहाद्यनारम्भ्यं स्वामिनमन्तरेण संहननस्यादर्शनात्कार्यकरणसंघा-

१ ग. घ. ट. ठ. 'यकार' । २ ख. ग. ङ. ठ. 'यकार' । ३ ख. ग. घ. छ. ट. त्कार्यकार' ।

तेऽपि विलक्षणः स्वामी शरीरोपचयादिभिरुपचयादिरहितोऽवगम्यते । स च चेतनत्वेन भेदाभावाद्ब्रह्मैवेति तदस्तित्वसिद्धिरित्यर्थः ।

कथमभयहेतुत्वमित्युच्यते—

यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनि-
रुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते ।
अथ सोऽभयं गतो भवति । यदा
ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ
तस्य भयं भवति । तत्त्वेव भयं विदु-
षोऽमन्वानस्य । तदप्येष श्लोको भवति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि द्वितीये ब्रह्मवल्ल्यध्याये
सप्तमोऽनुवाकः ॥ ७ ॥

यदा ह्येव यस्मादेष साधक एतस्मिन्ब्रह्मणि किंविशिष्टेऽदृश्ये; दृश्यं नाम द्रष्टव्यं विकारो दर्शनार्थत्वाद्विकारस्य । न दृश्यमदृश्यमविकार इत्यर्थः । एतस्मिन्नदृश्येऽविकारेऽविषयभूतेऽनात्म्येऽशरीरे यस्माददृश्यं तस्मादनात्म्यं यस्मादनात्म्यं तस्मादनिरुक्तम् । विशेषो हि निरुच्यते । विशेषश्च विकारः । अविकारं च ब्रह्म । सर्वविकारहेतुत्वात्तस्मादनिरुक्तम् । यत एवं तस्मादनिलयनं निलयनं नीड आश्रयो न निलयनमनिलयनमनाधारं तस्मिन्नेतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने सर्वकार्यधर्मविलक्षणे ब्रह्मणीति वाक्यार्थः । अभयमिति क्रियाविशेषणम् । अभयामिति वा लिङ्गान्तरं परिणम्यते । प्रतिष्ठां स्थितिमात्मभावं विन्दते लभते । अथ तदा स तस्मिन्नानात्वस्य भयहेतोरविद्याकृतस्यादर्शनादभयं गतो भवति । स्वरूपप्रतिष्ठो ह्यसौ यदा भवति तदा नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति । अन्यस्य ह्यन्यतो भयं भवति नाऽऽत्मन एवाऽऽत्मनो भयं युक्तम् । तस्मादात्मैवाऽऽत्मनोऽभयकारणम् । सर्वतो हि निर्भया ब्राह्मणा दृश्यन्ते सत्सु भयहेतुषु तच्चायुक्तमसति भयत्राणे ब्रह्मणि ।

तस्मात्तेषामभयदर्शनादस्ति तदभयकारणं ब्रह्मेति । कदाऽसावभयं गतो भवति साधको यदा नान्यत्पश्यत्यात्मनि चान्तरं भेदं न कुरुते तदाऽभयं गतो भवतीत्यभिप्रायः । यदा पुनरविद्यावस्थायां हि यस्मादेषोऽविद्यावानविद्यया प्रत्युपस्थापितं वस्तु तैमिरिकद्वितीयचन्द्रवत्पश्यत्यात्मनि चैतस्मिन्ब्रह्मणि उदपि, अरमल्पमप्यन्तरं छिद्रं भेददर्शनं कुरुते । भेददर्शनमेव ह्यन्तरकरणमल्पमपि भेदं पश्यतीत्यर्थः । अथ तस्माद्भेददर्शनाद्धेतोरस्य भेददर्शिन आत्मनो भयं भवति । तस्मादात्मैवाऽऽत्मनो भयकारणमविदुषस्तदेतदाह । तद्ब्रह्म त्वेव भयं भेददर्शिनो विदुष ईश्वरोऽन्यो मत्तोऽहमन्यः संसारीत्येवं विदुषो भेददृष्टमीश्वराख्यं तदेव ब्रह्माल्पमप्यन्तरं कुर्वतो भयं भवत्येकत्वेनामन्वानस्य । तस्माद्विद्वानप्यविद्वानेवासौ योऽयमेकमभिन्नमात्मतत्त्वं न पश्यत्युच्छेदहेतुदर्शनाद्ध्युच्छेद्याभिमतस्य भयं भवति । अनुच्छेद्यो ह्युच्छेदहेतुस्तत्रासत्युच्छेदहेतावुच्छेद्ये न तद्दर्शनकार्यं भयं युक्तम् । सर्वं च जगद्भयवद्दृश्यते । तस्माज्जगतो भयदर्शनाद्गम्यते नूनं तदस्ति भयकारणमुच्छेदहेतुरनुच्छेद्यात्मकं यतो जगद्बिभेतीति । तदेतस्मिन्नप्यर्थ एष श्लोको भवति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषदि द्वितीये ब्रह्मवल्ल्यध्याये सप्तमोऽनुवाकः ॥ ७ ॥

दासोऽहं तस्य देवस्य ममाऽऽराध्यः परमेश्वर इति भेदं विद्वान्कथमज्ञ इत्युच्यते तत्राऽऽह—असौ योऽयमिति । यथा चन्द्रभेदं पश्यन्नप्यविद्वानुच्यतेऽतत्त्वदर्शित्वात्तथेत्यर्थः । कथं तर्हि तस्य भयसंभावनेत्यत आह—उच्छेदेति । संहर्ता हि परमेश्वरो मां संहरिष्यति नरके वा निक्षेप्स्यतीति पश्यतो भयं भवतीत्यर्थः । ब्रह्मैवोच्छेदहेतुः कुत इत्यत आह—अनुच्छेद्यो हीति । उच्छेदहेतोरप्युच्छेद्यत्वेऽनवस्थाप्रसङ्गान्नित्यत्वं वक्तव्यं तच्च ब्रह्मणो नान्यस्य[3] संभाव्यत इत्यर्थः ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां द्वितीये ब्रह्मवल्ल्यध्याये सप्तमोऽनुवाकः ॥ ७ ॥

---

१ क. ख. ग. °स्तत्रास° । २ क. ख. ग. घ. ङ. छ. ट. ठ. °तावनुच्छेद्ये त° । ३ ज. झ. ञ. ठ. °न्यत्संभा° ।

अथ ब्रह्मवल्ल्यध्यायेऽष्टमोऽनुवाकः ।

भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम इति ।

भीषा भयेनास्माद्वातः पवते । भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम इति । वातादयो हि महार्हाः स्वयमीश्वराः सन्तः पवनादिकार्येष्वायासबहुलेषु नियताः प्रवर्तन्ते । तद्युक्तं प्रशास्तरि सत्यन्यस्मिन्नियमेन तेषां प्रवर्तनम् । तस्मादस्ति भयकारणं तेषां प्रशास्तृ ब्रह्म । यतस्ते भृत्या इव राज्ञोऽस्माद्ब्रह्मणो भयेन प्रवर्तन्ते । तच्च भयकारणमानन्दं ब्रह्म ।

सैषाऽऽनन्दस्य मीमांसा भवति ।

तस्यास्य ब्रह्मण आनन्दस्यैषा मीमांसा विचारणा भवति । किमानन्दस्य मीमांस्यमित्युच्यते । किमानन्दो विषयविषयिसंबन्धजनितो लौकिकानन्दवदाहोस्वित्स्वाभाविक इत्येवमेषाऽऽनन्दस्य मीमांसा ।

तच्च भयकारणं ब्रह्माऽऽनन्दरूपमुक्तं यदेष आकाश आनन्दो न स्यादिति । तत्राऽऽनन्दश्च लोके जन्यः प्रसिद्धस्ततो विचारमारभते—तस्यास्येत्यादिना ।

तत्र लौकिक आनन्दो बाह्याध्यात्मिकसाधनसंपत्तिनिमित्त उत्कृष्टः । स य एष निर्दिश्यते ब्रह्मानन्दानुगमार्थम् । अनेन हि प्रसिद्धेनाऽऽनन्देन व्यावृत्तविषयबुद्धिगम्य आनन्दोऽनुगन्तुं शक्यते । लौकिकोऽप्यानन्दो ब्रह्मानन्दस्यैव मात्राऽविद्यया तिरस्क्रियमाणे विज्ञान उत्कृष्यमाणायां चाविद्यायां ब्रह्मादिभिः कर्मवशाद्यथाविज्ञानं विषयादिसाधनसंबन्धवशाच्च विभाव्यमानश्च लोकेऽनवस्थितो लौकिकः संपद्यते । स एवाविद्याकामकर्मापकर्षेण मनुष्यगन्धर्वाद्युत्तरोत्तरभूमिष्वकामहतविद्वच्छ्रोत्रियप्रत्यक्षो विभाव्यते शतगुणोत्तरोत्कर्षेण यावद्धिरण्यगर्भस्य ब्रह्मण आनन्द इति ।

ब्रह्मानन्दस्य चेन्मीमांसा प्रस्तुता किमर्थस्तर्हि सार्वभौमानन्दाद्युपन्यासस्तत्राऽऽह—तत्र लौकिक इत्यादिना । लौकिक आनन्दः क्वचित्काष्ठां प्राप्तः सातिशयत्वात्परिमाणवदिति ब्रह्मानन्दानुमानार्थो लौकिकोपन्यास इत्यर्थः । विषयेभ्यो व्यावृत्ता व्यावृ-

त्वविषया अविषयब्रह्मात्मैकत्वदर्शिनस्तद्बुद्धिगोचर इत्यर्थः । प्रकारान्तरेण ब्रह्मानन्दानुगममाह—लौकिकोऽपीत्यादिना ।

निरस्ते त्वविद्याकृते विषयविषयिविभागे विद्यया स्वाभाविकः परिपूर्ण एक आनन्दोऽद्वैतो भवतीत्येतमर्थं विभावयिष्यन्नाह—

युवा स्यात्साधुयुवाऽध्यायकः । आशिष्ठो
द्रढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा
वित्तस्य पूर्णा स्यात् । स एको मानुष
आनन्दः । ते ये शतं मानुषा आनन्दाः
(१) । स एको मनुष्यगन्धर्वाणामानन्दः ।
श्रोत्रियस्य चाकामहतस्य । ते ये शतं
मनुष्यगन्धर्वाणामानन्दाः । स एको देव-
गन्धर्वाणामानन्दः । श्रोत्रियस्य चाकाम-
हतस्य । ते ये शतं देवगन्धर्वाणामानन्दाः ।
स एकः पितॄणां चिरलोकलोकानामा-
नन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये
शतं पितॄणां चिरलोकलोकानामानन्दाः ।
स एक आजानजानां देवानामानन्दः
(२) । श्रोत्रियस्य चाकामहतस्य ।

युवा प्रथमवयाः । साधुयुवेति साधुश्चासौ युवा चेति यूनो विशेषणम् । युवाऽप्यसाधुर्भवति साधुरप्ययुवाऽतो विशेषणं युवा स्यात्साधुयुवेति । अध्यायकोऽधीतवेदः । आशिष्ठ आशास्तृतमः[1] । द्रढिष्ठो दृढतमः । बलिष्ठो बलवत्तमः । एवमाध्यात्मिकसाधनसंपन्नः । तस्येयं पृथिव्युर्वी सर्वा वित्तस्य वित्तेनोपभोग-

१ ङ. छ. आशुतमः । २ ख. तमः क्षिप्रकारिषु मध्ये स्वयमतिशयत्वादित्यर्थः । द° ।

साधनेन दृष्टार्थेनादृष्टार्थेन च कर्मसाधनेन संपन्ना पूर्णा राजा पृथिवीपतिरित्यर्थः। तस्य च य आनन्दः स एको मानुषो मनुष्याणां प्रकृष्ट एक आनन्दः। ते ये शतं मानुषा आनन्दाः। स एको मनुष्यगन्धर्वाणामानन्दः। मानुषानन्दाच्छतगुणेनोत्कृष्टो मनुष्यगन्धर्वाणामानन्दो भवति मनुष्याः सन्तः कर्मविद्याविशेषाद्गन्धर्वत्वं प्राप्ता मनुष्यगन्धर्वाः। ते ह्यन्तर्धानादिशक्तिसंपन्नाः सूक्ष्मकार्यकरणाः। तस्मात्प्रतिघाताल्पत्वं तेषां द्वंद्वप्रतिघातशक्तिसाधनसंपत्तिश्च। ततोऽप्रतिहन्यमानस्य प्रतीकारवतो मनुष्यगन्धर्वस्य स्याच्चित्तप्रसादः। तत्प्रसादविशेषात्सुखविशेषाभिव्यक्तिः। एवं पूर्वस्याः पूर्वस्या भूमेरुत्तरस्यामुत्तरस्यां भूमौ प्रसादविशेषतः शतगुणेनाऽऽनन्दोत्कर्ष उपपद्यते। प्रथमं त्वकामहताग्रहणं मनुष्यविषयभोगकामानभिहतस्य श्रोत्रियस्य मनुष्यानन्दाच्छतगुणेनाऽऽनन्दोत्कर्षो मनुष्यगन्धर्वेण तुल्यो वक्तव्य इत्येवमर्थम्। साधुयुवाऽध्यायक इति श्रोत्रियत्वावृजिनत्वे गृह्येते। ते ह्यविशिष्टे सर्वत्र। अकामहतत्वं तु विषयोत्कर्षापकर्षतः सुखोत्कर्षापकर्षाय विशेष्यते। अतोऽकामहतग्रहणम्। तद्विशेषतः शतगुणसुखोत्कर्षोपलब्धेरकामहतत्वस्य परमानन्दप्राप्तिसाधनत्वविधानार्थम्। व्याख्यातमन्यत्। देवगन्धर्वा जातित एव। चिरलोकलोकानामिति पितॄणां विशेषणम्। चिरकालस्थायी लोको येषां पितॄणां ते चिरलोकलोका इति। आजान इति देवलोकस्तस्मिन्नाजाने जाता आजानजा देवाः स्मार्तकर्मविशेषतो देवस्थानेषु जाताः।

मनुष्यगन्धर्वानन्दस्योत्कृष्टत्वे निमित्तमाह—ते ह्यन्तर्धानादीति। प्रथममकामहताग्रहणस्य तात्पर्यमाह—प्रथममिति। यदि प्रथमपर्याय एवाकामहतो गृह्येत तदा तस्यैव सार्वभौमानन्देन तुल्य आनन्दः स्यात्तदा च व्याघातो भवेत्। मानुषानन्दे निःस्पृहो मानुषानन्दभोगभोगी चेति। ततो मनुष्यगन्धर्वानन्देन तुल्यमानन्दं तस्य दर्शयितुं प्रथमपर्याये तदग्रहणमित्यर्थः। अवृजिनत्वमपापत्वं यथोक्तकारित्वं तत्साधुपदाल्लभ्यत इत्यर्थः।

ते ये शतमाजानजानां देवानामानन्दाः। स
एकः कर्मदेवानां देवानामानन्दः। ये कर्मणा
देवानपियन्ति। श्रोत्रियस्य चाकामहतस्य।
ते ये शतं कर्मदेवानां देवानामानन्दाः[1]। स

---

1 अ. °न्दविरोधाद्भोग°।

एको देवानामानन्दः । श्रोत्रियस्य चाकाम-
हतस्य । ते ये शतं देवानामानन्दाः । स एक
इन्द्रस्याऽऽनन्दः (३) । श्रोत्रियस्य चाकामह-
तस्य । ते ये शतमिन्द्रस्याऽऽनन्दाः । स एको
बृहस्पतेरानन्दः । श्रोत्रियस्य चाकामह-
तस्य । ते ये शतं बृहस्पतेरानन्दाः । स एकः
प्रजापतेरानन्दः । श्रोत्रियस्यचाकामहतस्य ।
ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण
आनन्दः । श्रोत्रियस्य चाकामहतस्य (४) ।

कर्मदेवा ये वैदिकेन कर्मणाऽग्निहोत्रादिना केवलेन देवानपियन्ति । देवा इति त्रयस्त्रिंशद्धविर्भुजः । इन्द्रस्तेषां स्वामी । तस्याऽऽचार्यो बृहस्पतिः । प्रजापतिर्विराट्त्रैलोक्यशरीरो ब्रह्मा समष्टिव्यष्टिरूपः संसारमण्डलव्यापी । यत्रैत आनन्दभेदा एकतां गच्छन्ति । धर्मश्च तन्निमित्तो ज्ञानं च तद्विषयमकामहतत्वं च निरतिशयं यत्र स एष हिरण्यगर्भो ब्रह्मा । तस्यैष आनन्दः श्रोत्रियेणावृजिनेनाकामहतेन च सर्वतः प्रत्यक्षमुपलभ्यते । तस्मादेतानि त्रीणि साधनानीत्यवगम्यते । तत्र श्रोत्रियत्वावृजिनत्वे नियते अकामहतत्वं तूत्कृष्यत इति प्रकृष्टसाधनताऽवगम्यते । तस्याकामहतत्वप्रकर्षतश्चोपलभ्यमानः श्रोत्रियप्रत्यक्षो ब्रह्मण आनन्दो यस्य परमानन्दस्य मात्रैकदेशः । "एतस्यैवाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुत्यन्तरात् । स एष आनन्दो यस्य मात्रा समुद्राम्भस इव विप्रुषः प्रविभक्ता यत्रैकतां गता स एष परमानन्दः स्वाभाविकोऽद्वैतत्वादानन्दानन्दिनोश्चाविभागोऽत्र ।

त्रयस्त्रिंशत्— अष्टौ वसव एकादश रुद्रा द्वादशाऽऽदित्या इन्द्रः प्रजापतिश्चेति ।

---

१ अ. °ष्टिरू° । २ क. °रूपसं° ।

यदर्थं मीमांसाऽऽरब्धा तस्य निरतिशयानन्दस्य सिद्धौ वाक्यतात्पर्यं दर्शयितुमाह—तस्याकामहतस्येति । तस्य ब्रह्मणो हिरण्यगर्भस्याऽऽनन्दस्तदुपासकप्रत्यक्षो यस्य मात्रा स एष परमानन्दः स्वाभाविक इति संबन्धः । हिरण्यगर्भानन्दस्य मात्रात्वे श्रुत्यन्तरं प्रमाणयति—एतस्यैवेति । न केवलं हिरण्यगर्भानन्द एव मात्रा यश्च प्रागुपन्यस्तः सार्वभौमाद्यानन्दः स एष यस्य मात्रा प्रविभक्ता नानात्वमापन्ना सती यत्र निरतिशयानन्देऽकामहतब्रह्मवित्प्रत्यक्षे कैवल्य एकतां गतेति योजना । अकामहतप्रत्यक्षत्वाभिधानाद्भेदप्राप्तिं निरस्यति—आनन्दानन्दिनोश्चेति । प्रत्यक्षत्वाभिधानमज्ञानसंशयादिव्यवधानाभावाभिप्रायं न तु विषयविषयिभावाभिप्रायम् । अदृश्येऽनात्म्य उदरमन्तरं कुरुत इत्यादिना निषेधादित्यर्थः ।

तदेतन्मीमांसाफलमुपसंह्रियते—

स यश्चायं पुरुषे । यश्चा-
सावादित्ये । स एकः ।

स यश्चायं पुरुष इति । यो गुहायां निहितः परमे व्योम्न्याकाशादिकार्यं सृष्ट्वाऽन्नमयान्तं तदेवानुप्रविष्टः स य इति निर्दिश्यते । कोऽसावयं पुरुषे । यश्चासावादित्ये यः परमानन्दः श्रोत्रियप्रत्यक्षो निर्दिष्टो यस्यैकदेशं ब्रह्मादीनि भूतानि सुखार्हाण्युपजीवन्ति स यश्चासावादित्य इति निर्दिश्यते । स एको भिन्नप्रदेशस्थघटाकाशाकाशैकत्ववत् । ननु तन्निर्देशे स यश्चायं पुरुष इत्यविशेषतोऽध्यात्मं न युक्तो निर्देशो यश्चायं दक्षिणेऽक्षन्निति तु युक्तः प्रसिद्धत्वात् । न पराधिकारात् । परो ह्यात्माऽत्राधिकृतोऽदृश्येऽनात्म्ये भीषास्माद्वातः पवते सैषाऽऽनन्दस्य मीमांसेति । न ह्यकस्मादप्रकृतो युक्तो निर्देष्टुं परमात्मविज्ञानं च विवक्षितम् । तस्मात्पर एव निर्दिश्यते स एक इति । नन्वानन्दस्य मीमांसा प्रकृता तस्या अपि फलमुपसंहर्तव्यम् । अभिन्नः स्वाभाविक आनन्दः परमात्मैव न विषयविषयिसंबन्धजनित इति । ननु तदनुरूप एवायं निर्देशः स यश्चायं पुरुषे यश्चासावादित्ये स एक इति भिन्नाधिकरणस्थविशेषोपमर्देन । नन्वेवमप्यादित्यविशेषग्रहणमनर्थकम् । उत्कर्षापकर्षापोहार्थत्वात् । द्वैतस्य हि मूर्तामूर्तलक्षणस्य पर उत्कर्षः सवित्रभ्यन्तर्गतः स चेत्पुरुषगतविशेषोपमर्देन परमानन्दमपेक्ष्य समो भवति न कश्चिदुत्कर्षोऽपकर्षो वा तां गतिं गतस्येत्यभयं प्रतिष्ठां विन्दत इत्युपपन्नम् ।

मीमांसया निरतिशयानन्दं ब्रह्मास्तीति निर्धारितम् । तस्याकामहतप्रत्यक्षत्वाभिधानादभेदसिद्धिः । न हि परानन्दः परस्य प्रत्यक्षो भवति । तस्मान्निरतिशयानन्दब्रह्मैकत्वं जीवस्य ब्रह्मविदाप्नोति परमित्युपक्रान्तं मीमांसया च सिद्धमुपसंहियत इत्यर्थः । आदित्यग्रहणस्याऽऽधिदैविकोपाधिलक्षणार्थस्याविवक्षितत्वं दर्शयितुं चोद्यमुद्भावयति—नन्विति । " य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः " इत्यादौ श्रुत्यन्तरे मण्डलस्थस्य दक्षिणाक्षिस्थेनैक्यस्य प्रसिद्धत्वादिहाप्यादित्यस्थेनैक्यनिर्देशे दक्षिणाक्षिग्रहणं युक्तमित्यर्थः । अध्यात्ममधिदैवतं च लिङ्गात्मोपासनविवक्षायां तथा स्यान्नेह तद्विवक्षितमित्याह—न परेति । य एव चिद्धातुर्निरतिशयानन्द उत्कृष्टोपाधौ प्रतिबिम्बितः स एव निकृष्टोपाधौ शिरःपाण्यादिमति पुरुषे प्रतिबिम्बित इति परमानन्दमपेक्ष्य समत्वं विशिष्टयोः स्वभावैक्यं विवक्षितमित्यर्थः ।

अस्ति नास्तीत्यनुप्रश्नो व्याख्यातः । कार्यरसलाभप्राणनाभयप्रतिष्ठाभयदर्शनोपपत्तिभ्योऽस्त्येव तदाकाशादिकारणं ब्रह्मेत्यपाकृतोऽनुप्रश्न एकः, द्वावन्यावनुप्रश्नौ विद्वदविदुषोर्ब्रह्मप्राप्त्यप्राप्तिविषयौ तत्र विद्वान्समश्नुते न समश्नुत इत्यनुप्रश्नोऽन्त्यस्तदपाकरणायोच्यते । मध्यमोऽनुप्रश्नोऽन्त्यापाकरणादेवापाकृत इति तदपाकरणाय न यत्यते ।

वृत्तानुवादपूर्वकमुत्तरग्रन्थमवतारयति—अस्ति नास्तीति । संदिग्धं सप्रयोजनं च विचारमर्हति ।

स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामति । एतं प्राणमयमात्मानमुपसंक्रामति । एतं मनोमयमात्मानमुपसंक्रामति । एतं विज्ञानमयमात्मानमुपसंक्रामति । एतमानन्दमयमात्मानमुपसंक्रामति ।

स यः कश्चिदेवं यथोक्तं ब्रह्मोत्सृज्योत्कर्षापकर्षमद्वैतं सत्यं ज्ञानमनन्तमस्मीत्येवं वेत्तीत्येवंवित् । एवंशब्दस्य प्रकृतपरामर्शार्थत्वात् । स किम्, अस्माल्लोकात्प्रेत्य दृष्टादृष्टेष्टविषयसमुदायो ह्ययं लोकस्तस्मादस्माल्लोकात्प्रेत्य प्रत्यावृत्य निरपेक्षो भूत्वैतं यथाव्याख्यातमन्नमयमात्मानमुपसंक्रामति विषयजातमन्नमयात्पिण्डात्मनो व्यतिरिक्तं न पश्यति सर्वं स्थूलभूतमन्नमयमात्मानं

---

१ ख. ग. ङ. 'ह्मास्मीति । २ ग. ङ. एवं विद्वानिर' । ३ ख. छ. ग. 'यद्वैतद' ।

पश्यतीत्यर्थः। ततोऽभ्यन्तरमेतं प्राणमयं सर्वान्नमयात्मस्थमविभक्तम्। अथैतं मनोमयं विज्ञानमयमानन्दमयमात्मानमुपसंक्रामति।

अथादृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। तत्रैतच्चिन्त्यम्। कोऽयमेवंवित्कथं वा संक्रामतीति। किं परस्मादात्मनोऽन्यः संक्रमणकर्ता प्रविभक्त उत स एवेति। किं ततः, यद्यन्यः स्याच्छ्रुतिविरोधः। "तत्सृष्ट्वा तदेवानुप्राविशत्" "अन्योऽसावन्योऽहमस्मीति। न स वेद" "एकमेवाद्वितीयम्" "तत्त्वमसि" इति। अथ स एवाऽऽनन्दमयमात्मानमुपसंक्रामतीति, कर्मकर्तृत्वानुपपत्तिः। परस्यैव च संसारित्वं पराभावो वा। यद्युभयथा प्राप्तो दोषो न परिहर्तुं शक्यत इति व्यर्था चिन्ता। अथान्यतरस्मिन्पक्षे दोषाप्राप्तिस्तृतीये वा पक्षेऽदुष्टे स एव शास्त्रार्थ इति व्यर्थैव चिन्ता न तन्निर्धारणार्थत्वात्सत्यं प्राप्तो दोषो न शक्यः परिहर्तुमन्यतरस्मिंस्तृतीये वा पक्षेऽदुष्टेऽवधृते व्यर्था चिन्ता स्यान्न तु सोऽवधृत इति तदवधारणार्थत्वादर्थवत्येवैषा चिन्ता। सत्यमर्थवती चिन्ता। शास्त्रार्थावधारणार्थत्वात्। चिन्तयसि च त्वं न तु निर्णेष्यसि, किं न निर्णेतव्यमिति वेदवचनं, न, कथं तर्हि बहुप्रतिपक्षत्वादेकत्ववादी त्वं, वेदार्थपरत्वाद्बहवो हि नानात्ववादिनो वेदबाह्यास्त्वत्प्रतिपक्षा अतो ममाऽऽशङ्का न निर्णेष्यसीत्येतदेव मे स्वस्त्ययनं यन्मामेकयोगिनमनेकयोगिबहुप्रतिपक्षमात्थ। अतो जेष्यामि सर्वानारभे च चिन्ताम्।

अत्र च कस्मिन्पक्षे को दोषः को वा लाभ इत्याह—किं तत इति। उभयत्रानुपपत्तिं संशयकारणमाह—यद्यन्यः स्यादिति। चोद्यमुखेन संशयव्यावृत्तिं प्रयोजनमाह—यद्युभयथेत्यादिना। एतदेव मम विचारारम्भकस्य स्वस्त्ययनं कल्याणं यन्मामेकत्ववादिनं त्वमात्थ ब्रूषेऽप्रतिपन्नवस्तुवादित्वादनेकत्ववादिनोऽप्येकस्य वस्तुनः संमतत्वादनेकवस्तुवादिनश्च बहवः प्रतिपक्षाः सन्ति ममेत्यर्थतोऽपि कल्याणमनेकत्वस्यान्योन्याश्रयादिदोषदुष्टत्वात्पूर्वपक्षनिराकरणेन सिद्धान्तोपपत्तेश्चेत्यर्थः।

स एव तु स्यात्तद्भावस्य विवक्षितत्वात्। तद्विज्ञानेन परमात्मभावो ह्यत्र विवक्षितो ब्रह्मविदाप्नोति परमिति। न ह्यन्यस्यान्यभावापत्तिरुपपद्यते। ननु तस्यापि तद्भावापत्तिरनुपपन्नैव। न। अविद्याकृततादात्म्यापोहार्थत्वात्। या हि ब्रह्मविद्यया स्वात्मप्राप्तिरुपदिश्यते साऽविद्याकृतस्यान्नादिविशेषात्मन आत्मत्वेनाध्यारोपितस्यानात्मनोऽपोहार्था। कथमेवमर्थताऽवगम्यते। विद्यामात्रोपदेशात्। विद्यायाश्च दृष्टं कार्यमविद्यानिवृत्तिस्तच्चेह विद्यामात्रमात्मप्राप्तौ साधन-

मुपदिश्यते । मार्गविज्ञानोपदेशवदिति चेत्तदात्मत्वे विद्यामात्रसाधनोपदेशोऽहेतुः । कस्मात् । देशान्तरप्राप्तौ मार्गविज्ञानोपदेशदर्शनात् । न हि ग्राम एव गन्तेति चेत् । न । वैधर्म्यात् । तत्र हि ग्रामविषयं विज्ञानं नोपदिश्यते तत्प्राप्तिमार्गविषयमेवोपदिश्यते विज्ञानं न तथेह ब्रह्मविज्ञानव्यतिरेकेण साधनान्तरविषयं विज्ञानमुपदिश्यते। उक्तकर्मादिसाधनापेक्षं ब्रह्मविज्ञानं परप्राप्तौ साधनमुपदिश्यत इति चेत् । न । नित्यत्वान्मोक्षस्येत्यादिना प्रत्युक्तत्वात् । श्रुतिश्च तत्सृष्ट्वा तदेवानुप्राविशदिति कार्यस्थस्य तदात्मत्वं दर्शयति । अभयप्रतिष्ठोपपत्तेश्च । यदि हि विद्यावान्स्वात्मनोऽन्यन्न पश्यति ततोऽभयं प्रतिष्ठां विन्दत इति स्याद्भयहेतोः परस्यान्यस्याभावात् ।

विचारारम्भमुपपाद्य सिद्धान्तमुपक्रमते—स एव तु स्यादिति । औपाधिकभेदभिन्नोऽप्येवंवित्स्वतः पर एव स्यादित्यर्थः । अविद्याध्यारोपिताब्रह्मत्वव्यावृत्तिरेव ब्रह्मप्राप्तिर्विवक्षितेति फलवाक्यस्यैवमर्थता कथमवगम्यते न पुनरप्राप्तप्राप्तिरित्याह—कथमिति । परिहरति—विद्यामात्रेति । अन्यथाऽप्युपपत्तिं शङ्कते—मार्गेति । गन्तुः स्वतो ग्रामत्वाभावेऽपि यथा मार्गज्ञानोपदेशः सार्थकस्तथा जीवस्य स्वतो ब्रह्मत्वाभावेऽपि विद्योपदेशोऽभ्यासद्वारेण ब्रह्मप्राप्तिहेतुत्वादित्यर्थः । त्वं ग्रामोऽसीति न तत्रोपदेशः । अत्राभेदोपदेशः प्रतीयतेऽत उपदेशवैषम्यान्न दृष्टान्तो युक्त इत्याह—न वैधर्म्यादिति ।

अन्यस्य चाविद्याकृतत्वे विद्ययाऽवस्तुत्वदर्शनोपपत्तिस्तद्धि द्वितीयस्य चन्द्रस्य[1] सत्त्वं यद्[2]तैमिरिकेण चक्षुष्मता न गृह्यते नैवं न गृह्यत इति चेन्न । सुप्त[3]समाहितयोरग्रहणात् । सुषुप्तेऽग्रहणमन्यासक्तवदिति चेत् । न । सर्वाग्रहणात् । जाग्रत्स्वप्नयोरन्यस्य ग्रहणात्सत्त्वमेवेति चेत् । न । अविद्याकृतत्वाज्जाग्रत्स्वप्नयोर्यदन्यग्रहणं जाग्रत्स्वप्नयोस्तदविद्याकृतमविद्याभावेऽभावात् ।

यदि विदुषः सकाशादन्य ईश्वरो भयहेतुर्नास्ति का तर्हि गतिर्व्यतिरिक्तेश्वरदर्शनस्येत्याशङ्क्याऽऽह—अन्यस्य चेति । कल्पितभेदविशिष्टरूपेणेश्वरस्याविद्याकृतत्वे मिथ्यात्वे सति विद्यया तत्रावस्तुत्वदर्शनमुपपद्यते । ईश्वरो मम प्रशास्तेति मिथ्यैतद्यतस्तस्य मम चैकात्म्यमेव परमार्थमिति विद्वद्दृष्ट्या विशिष्टस्यासत्त्वमित्यर्थः । दृष्टान्तेन वैषम्यं शङ्कते—नैवमिति । यथा चन्द्रैकत्वद[4]र्शनाद्द्वितीयश्चन्द्रो न गृह्यते नैवं ब्रह्मविदा न गृह्यते व्यतिरिक्तेश्वरः । प्रतिनियतप्रपञ्चावभासस्य भोजनादिप्रवृत्त्यनुप-

---

१ क. अ. °न्द्रस्यास° । २ क. यदा त्वमिति तै° । अ. यदाऽतै° । ३ ख. ग. ङ. ठ. सुषुप्त° । ४ ख. . ङ. °दर्शिना द्विती° ।

पत्त्या जीवन्मुक्तस्याप्यभ्युपगमात्प्रपञ्चप्रतिनियमस्य चेश्वराधीनत्वाभ्युपगमादित्यर्थः। यद्यपि जागरे व्यतिरेकाभासदर्शनं विदुषस्तथाऽपि न तद्भयकारणं न हि मायावी स्वविरचितव्याघ्राभासाद्बिभेति। अविदुषोऽपि व्यतिरेकदर्शनं न सदातनमित्याह—न सुप्तेति। सुषुप्ते व्यतिरेकाग्रहणमसत्त्वसाधकं न भवतीत्याह—सुषुप्त इति। यथेषुकार इष्वासक्तमनस्तया तद्व्यतिरिक्तं विद्यमानमपि न पश्यति तथा सुषुप्तोऽपि निरायाससुखासक्ततया सदपि द्वितीयं न पश्यति न त्वभावादित्यर्थः। अन्यासक्तस्य तद्व्यतिरिक्तादर्शनेऽपि तद्दर्शनमेवास्ति सुषुप्ते तु न किंचिदज्ञासिषमिति प्रत्ययात्सुखस्याप्यात्मतादात्म्यादज्ञानस्य च व्यतिरिक्तत्वानिर्वचनादतस्तात्त्विकद्वितीयाभावादेवाग्रहणमित्याह—न सर्वाग्रहणादिति। सुषुप्ते चेदनुपलम्भादसत्त्वं तर्हि जाग्रत्स्वप्नयोरुपलम्भाद्द्वैतस्य सत्त्वं किं न स्यादित्याह—जाग्रदिति। अनात्मादावात्मत्वादिबुद्धिरविद्या तद्भाव एव द्वैतोपलम्भात्तोपलम्भमात्रं सत्त्वसाधकमन्यथा शुक्तिरूप्यादेरपि सत्त्वप्रसङ्गादित्याह—नाविद्येति।

सुषुप्तेऽग्रहणमप्यविद्याकृतमिति चेत्। न। स्वाभाविकत्वात्। द्रव्यस्य हि तत्त्वमविक्रिया परानपेक्षत्वात्। विक्रिया न तत्त्वम्। परापेक्षत्वात्। न हि कारकापेक्षं वस्तुनस्तत्त्वं सतो विशेषः कारकापेक्षो विशेषश्च विक्रिया। जाग्रत्स्वप्नयोश्च ग्रहणं विशेषः। यद्धि यस्य नान्यापेक्षं स्वरूपं तत्तस्य तत्त्वं यदन्यापेक्षं न तत्तत्त्वम्। अन्याभावेऽभावात्। तस्मात्स्वाभाविकत्वाज्जाग्रत्स्वप्नवन्न सुषुप्ते विशेषः।

पूर्ववाद्याह—सुषुप्त इति। सुषुप्ते द्वितीयस्याग्रहणमपि लयरूपाविद्याकृतं न तु भेदाभावनिबन्धनमतो यदुक्तं सुषुप्ते सर्वात्मकब्रह्मभूतो जीवः स्वव्यतिरिक्तमभावादेव न पश्यतीति तदसदित्यर्थः। सतोऽपि द्वितीयस्याविद्यावशादग्रहणमिति कोऽर्थः। किं ग्रहणप्रागभावो जायत उताप्रकाशारोपः किंवाऽग्रहणाकाराविकृतस्वरूपावस्थानम्। नाऽऽद्यः। प्रागभावस्यानादित्वाभ्युपगमात्। न द्वितीयः। परैर्द्वितीयस्यास्वप्रकाशतास्वाभाव्याभ्युपगमेनाप्रकाशारोपानभ्युपगमादप्रकाशारोपे च सर्वस्य स्वप्रकाशब्रह्मात्मताया अभ्युपगन्तव्यत्वेनास्मत्समीहितसिद्धिप्रसङ्गात्। न तृतीय इत्याह—न स्वाभाविकत्वादिति। अविकृतस्वरूपावस्थानं नाविद्याकार्यमनागन्तुकत्वादित्यर्थः। एतत्स्फुटयति—द्रव्यस्य हीत्यादिना। सन्मात्रं द्रव्यमुच्यते स्वातन्त्र्यसिद्ध्यभिप्रायेण न वैशेषिकाभिप्रायेण क्रियावद्गुणवत्समवायिकारणं द्रव्यं मानाभावादिति द्रष्टव्यम्। अविक्रियेति। विक्रियाभावोपलक्ष्यं स्वरूपमनपेक्ष्य सिद्धत्वादित्यर्थः। ग्रहणादिविक्रिया न

---

१ क. घ. छ. ञ. ट. °रणापे°।

स्वाभाविकी परापेक्षत्वात्स्फटिकलौहित्यवदित्यर्थः । यदुक्तमनपेक्ष्य सिद्धत्वादविक्रियत्वमिति तत्स्फुटयति— यद्धीति ।

येषां पुनरीश्वरोऽन्य आत्मनः कार्यं चान्यत्तेषां भयानिवृत्तिर्भयस्यान्यनिमित्तत्वात्सतश्चान्यस्याऽऽत्महानानुपपत्तिः । न चासत आत्मलाभः । सापेक्षस्यान्यस्य भयहेतुत्वमिति चेन्न । तस्यापि तुल्यत्वात् । यदधर्माद्यनुसहायीभूतं नित्यमनित्यं वा निमित्तमपेक्ष्यान्यद्भयकारणं स्यात्त(त्, न, त)स्यापि तथाभूतस्याऽऽत्महानाभावाद्भयानिवृत्तिरात्महाने वा सदसतोरितरेतरापत्तौ सर्वत्रानाश्वास एव ।

एवं स्वमते चित्सत्ताव्यतिरिक्तेश्वरस्य भयहेतोरभावादभयं विदुषः संभवतीत्युपपाद्य द्वैतीयकपक्षे तदसंभवमाह—येषामिति । सतोऽन्यस्य स्वरूपे स्थिते नष्टे वा मा भूद्ध्वंसी व्याघातादनवस्थानाच्च । तर्ह्यसत एव (?) भयस्योत्पादेऽभयप्राप्तिर्भविष्यतीत्याशङ्क्याऽऽह—न चासत इति । व्यतिरिक्तेश्वरस्य सत्तामात्रेण न भयहेतुत्वं किंतु प्राणिकृतधर्माधर्माद्यपेक्षस्य मुक्तस्य तु तदभावादभयं भविष्यतीत्याशङ्क्य नैतत्सांख्येन वाच्यम् । अधर्मादेरपि सतस्तेनात्यन्तासत्त्वानङ्गीकारान्नैयायिकादिमतेऽपि सति हेतौ कार्यात्यन्ताभावस्य दुरवधारणत्वात्तेनापि न वाच्यमित्याह—न तस्यापीति । किंच सच्चेदसत्त्वमापद्यतेऽधर्मादिकं तर्ह्यात्मन्यपि कः प्रश्वासस्तस्मात्स्वभाववैपरीत्यं सतोऽसत्त्वगमनं कस्यापि मते न घटत इत्याह—सदसतोरिति ।

एकत्वपक्षे पुनः सनिमित्तस्य संसारस्याविद्याकल्पितत्वाददोषः । तैमिरिकदृष्टस्य हि द्वितीयचन्द्रस्य नाऽऽत्मलाभो नाशो वाऽस्ति । विद्याविद्ययोस्तद्धर्मत्वमिति चेन्न । प्रत्यक्षत्वात् । विवेकाविवेकौ रूपादिवत्प्रत्यक्षावुपलभ्येते अन्तःकरणस्थौ । न हि रूपस्य प्रत्यक्षस्य सतो द्रष्टृधर्मत्वम् । अविद्या च स्वानुभवेन रूप्यते मूढोऽहमविविक्तं मम विज्ञानमिति । तथा विद्याविवेकोऽनुभूयते । उपदिशन्ति चान्येभ्य आत्मनो विद्यां बुधाः । तथा चान्येऽवधारयन्ति । तस्मान्नामरूपपक्षस्यैव विद्याविद्ये नामरूपे च नाऽऽत्मधर्मौ । "नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म" इति श्रुत्यन्तरात् । ते च पुनर्नामरूपे सवितर्यहोरात्रे इव कल्पिते न परमार्थतो विद्यमाने । अभेदे "एतमानन्दमयमात्मानमुपसंक्रामति" इति कर्मकर्तृत्वानुपपत्तिरिति चेन्न । विज्ञानमात्रत्वात्संक्रमणस्य । न जलूकादिवत्संक्रमणमिहोपदिश्यते किं तर्हि विज्ञानमात्रं संक्रमणश्रुतेरर्थः ।

१ ख. ग. °रात्मानात्मनोः स° । २ क. ख. एवाभ° । ३ क. ङ. ञ. °न निरू° । ४ घ. ङ. ञ. बुद्धाः । ५ घ. °र्मौ । आकाशो ह वै नाम ना° ।

स्वमतं निगमयति— एकत्वपक्ष इति । अविद्याकल्पितं भयं विद्यया निवर्तत इति वदता विद्याविद्ययोरात्मधर्मत्वमिष्टं ततो धर्मोत्पादविनाशयोर्विकारित्वमनित्यत्वं च प्रसज्येतेति शङ्कते— विद्याविद्ययोरिति । कल्पितयोर्विद्याविद्ययोरात्मनि भयाभयहेतुत्वसंभवान्नाऽऽत्मधर्मत्वे प्रमाणमस्ति प्रत्युत वेद्यत्वाद्रूपादिवदात्मधर्मत्वं नास्तीत्यनुमातुं शक्यत इत्याह— न प्रत्यक्षत्वादिति । चिन्मात्रतन्त्राऽनादिरनिर्वाच्याऽविद्याऽन्तःकरणरूपेण परिणमते तच्चान्तःकरणं तामससात्त्विकावस्थाभेदेन भ्रान्तिसम्यग्ज्ञानाकारेण परिणमते तस्मिन्प्रतिबिम्बितश्चिद्धातुः स्वोपाधिधर्मेणैव भ्रान्तः सम्यग्दर्शीति च व्यवह्रियते न तत्त्वतो विद्याविद्यावत्त्वमित्याह— ते च पुनरिति । उक्तन्यायेन ब्रह्मवित्तत्त्वतो ब्रह्मभिन्न इत्युक्तम् । तत्र परोक्तमुद्भाव्य निरस्यति— अभेदे, एतमित्यादिना । नाऽऽनन्दमयः परमात्मा न च तत्र प्रवेशः संक्रमणं किंत्वविषयब्रह्मात्मताज्ञानेनाऽऽनन्दमयस्याऽऽत्मतया भ्रान्तिगृहीतस्यातिक्रमणं बाधोऽत्र विवक्षित इत्यर्थः ।

ननु मुख्यमेव संक्रमणं श्रूयत उपसंक्रामती[ती]ति चेत् । न । अन्नमयेऽदर्शनात् । न ह्यन्नमयमुपसंक्रामतो बाह्यादस्माल्लोकाज्जलूकावत्संक्रमणं दृश्यतेऽन्यथा वा । मनोमयस्य बहिर्निर्गतस्य विज्ञानमयस्य वा पुनः प्रत्यावृत्त्याऽऽत्मसंक्रमणमिति चेत् । न । स्वात्मनि क्रियाविरोधादन्योऽन्नमयमन्यमुपसंक्रामतीति प्रकृत्य मनोमयो विज्ञानमयो वा स्वात्मानमेवोपसंक्रामतीति विरोधः स्यात् । तथा नाऽऽनन्दमयस्याऽऽत्मसंक्रमणमुपपद्यते । तस्मान्न प्राप्तिः संक्रमणं नाप्यन्नमयादीनामन्यतमकर्तृकं पारिशेष्यादन्नमयाद्यानन्दमयान्तात्मव्यतिरिक्तकर्तृकं ज्ञानमात्रं च संक्रमणमुपपद्यते । ज्ञानमात्रत्वे चाऽऽनन्दमयान्तःस्थस्यैव सर्वान्तरस्याऽऽकाशाद्यन्नमयान्तं कार्यं सृष्ट्वाऽनुप्रविष्टस्य हृदयगुहाभिसंबन्धादन्नमयादिष्वनात्मस्वात्मविभ्रमः संक्रमणेनाऽऽत्मविवेकविज्ञानोत्पत्त्या विनश्यति । तदेतस्मिन्नविद्याविभ्रमनाशे संक्रमणशब्द उपचर्यते न ह्यन्यथा सर्वगतस्याऽऽत्मनः संक्रमणमुपपद्यते । वस्त्वन्तराभावाच्च । न च स्वात्मन एव संक्रमणम् । न हि जलूकाऽऽत्मानमेव संक्रामति । तस्मात्सत्यं ज्ञानमनन्तं ब्रह्मेति यथोक्तलक्षणात्मप्रतिपत्त्यर्थमेव बहुभवनसर्गप्रवेशरसलाभाभयसंक्रमणादि परिकल्प्यते ब्रह्मणि सर्वव्यवहारविषये न तु परमार्थतो निर्विकल्पे ब्रह्मणि कश्चिदपि विकल्प उपपद्यते ।

---

१ क. °रसाभ° । ङ. °रसभयाभ° ।

अन्यथा वेति । नीडे पक्षिप्रवेशवद्वेत्यर्थः । यद्यप्यन्नमये मुख्यं संक्रमणं न संभवति तथाऽपि मनोबुद्ध्योर्बहिर्विषये प्रवृत्तयोस्ततो व्यावृत्त्य स्वरूपेऽवस्थानं संक्रमणं दृष्टं तथा दुःखित आनन्दमयस्य स्वरूपेऽवस्थानं संक्रमणं भविष्यतीत्याह—मनोमयस्येति । स्वरूपावस्थानस्यानागन्तुकत्वात्प्रक्रमविरोधाच्च न तन्मुख्यं संक्रमणमित्याह—नेति । ज्ञानमात्रत्वे वा संक्रमणस्य किं फलतीत्यत आह—ज्ञानमात्रत्वे चेति । मुख्यासंभवे गौणार्थग्रहणं न्याय्यमेवातोऽधिष्ठानयाथात्म्यप्रतिपत्त्या विशिष्टस्वाध्यस्तस्य बाधनमेव संक्रमणं फलतीति भावः । इतश्च न मुख्यं संक्रमणमन्वेषणीयमित्याह—वस्त्वन्तराभावाच्चेति । संक्रमणस्यौपचारिकत्वं व्याख्याय प्रकरणस्य महत्तात्पर्यमुपसंहारच्छलेनाऽऽह—तस्मादिति ।

तद॒प्येष॒ श्लोको॑ भवति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि द्वितीये ब्रह्मवल्ल्यध्यायेऽष्टमोऽनुवाकः ॥ ८ ॥

तमेतं निर्विकल्पमात्मानमेवं क्रमेणोपसंक्रम्य विदित्वा न बिभेति कुतश्चनाभयं प्रतिष्ठां विन्दत इत्येतस्मिन्नर्थेऽप्येष श्लोको भवति । सर्वस्यैवास्य प्रकरणस्याऽऽनन्दवल्ल्यर्थस्य संक्षेपतः प्रकाशनायैष मन्त्रो भवति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषदि द्वितीये ब्रह्मवल्ल्यध्यायेऽष्टमोऽनुवाकः ॥ ८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां द्वितीये ब्रह्मवल्ल्यध्यायेऽष्टमोऽनुवाकः ॥ ८ ॥

अथ ब्रह्मवल्ल्यध्याये नवमोऽनुवाकः ।

यतो॒ वाचो॒ निव॑र्तन्ते । अप्रा॑प्य॒

मन॑सा स॒ह । आन॑न्दं॒ ब्रह्म॑णो

वि॒द्वान् । न बि॑भेति कुत॑श्चने॒ति ।

---

१ ज. अ. ठ. वृत्तस्व° । २ क. ङ. °यस्व° ।

यतो यस्मान्निर्विकल्पाद्यथोक्तलक्षणादद्वयानन्दादात्मनो वाचोऽभिधानानि द्रव्यादिसविकल्पवस्तुविषयाणि वस्तुसामान्यान्निर्विकल्पेऽद्वयेऽपि ब्रह्मणि प्रयोक्तृभिः प्रकाशनाय प्रयुज्यमानान्यप्राप्याप्रकाश्यैव निवर्तन्ते स्वसामर्थ्याद्धीयन्ते। मन इति प्रत्ययो विज्ञानम्। तच्च यत्राभिधानं प्रवृत्तमतीन्द्रियेऽप्यर्थे तदर्थे च प्रवर्तते प्रकाशनाय। यत्र च विज्ञानं तत्र वाचः प्रवृत्तिः। तस्मात्सहैव वाङ्मनसयोरभिधानप्रत्यययोः प्रवृत्तिः सर्वत्र। तस्माद्ब्रह्मप्रकाशनाय सर्वथा प्रयोक्तृभिः प्रयुज्यमाना अपि वाचो यस्मादप्रत्ययाविषयादनभिधेयाददृश्यादिविशेषणात्सहैव मनसा विज्ञानेन सर्वप्रकाशनसमर्थेन निवर्तन्ते तं ब्रह्मण आनन्दं श्रोत्रियस्यावृजिनस्याकामहतस्य सर्वैषणाविनिर्मुक्तस्याऽऽत्मभूतं विषयविषयिसंबन्धविनिर्मुक्तं स्वाभाविकं नित्यमविभक्तं परमानन्दं ब्रह्मणो विद्वान्यथोक्तेन विधिना न बिभेति कुतश्चन। निमित्ताभावात्। न हि तस्माद्विदुषोऽन्यद्वस्त्वन्तरमस्ति भिन्नं यतो बिभेति। अविद्यया यदोदरमन्तरं कुरुते। अथ तस्य भयं भवतीति ह्युक्तम्। विदुषश्चाविद्याकार्यस्य तैमिरिकदृष्टद्वितीयचन्द्रवन्नाशाद्भयनिमित्तस्य न बिभेति कुतश्चनेति युज्यते। मनोमये चोदाहृतो मन्त्रो मनसो ब्रह्मविज्ञानसाधनत्वात्। तत्र ब्रह्मत्वमध्यारोप्य तत्स्तुत्यर्थं न बिभेति कदाचनेति भयमात्रं प्रतिषिद्धमिहाद्वैतविषये न बिभेति कुतश्चनेति भयनिमित्तमेव प्रतिषिध्यते।

नन्वस्ति भयनिमित्तं साध्वकरणं पापक्रिया च। नैवम्। कथमित्युच्यते-

एतꣳ ह वाव न तपति। किमहꣳ साधु
नाकरवम्। किमहं पापमकरवमिति।

एतं यथोक्तमेवंविदम्। ह वावेत्यवधारणार्थौ। न तपति। नोद्वेजयति न संतापयति। कथं पुनः साध्वकरणं पापक्रिया च न तपतीत्युच्यते। किं कस्मात्साधु शोभनं कर्म नाकरवं न कृतवानस्मीति पश्चात्संतापो भवत्यासन्ने मरणकाले। तथा किं कस्मात्पापं प्रतिषिद्धं कर्माकरवं कृतवानस्मीति च नरकपतना-

---

१ क. ख. ट. 'ति भस्मा...' ।

तापो भवति । ते एते साध्वकरणपापक्रिये एवमेनं न तपतो यथाऽविद्वांसं तपतः ।

कस्मात्पुनर्विद्वांसं न तपत इत्युच्यते—

स य एवं विद्वानेते आत्मानꣳ स्पृणुते ।
उभे ह्येवैष एते आत्मानꣳ स्पृणुते ।
य एवं वेद । इत्युपनिषत् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि द्वितीये ब्रह्मवल्ल्यध्याये नवमोऽनुवाकः ॥ ९ ॥

स य एवं विद्वानेते साध्वसाधुनी तापहेतू इत्यात्मानं स्पृणुते प्रीणयति बलयति वा । परमात्मभावेनोभे पश्यतीत्यर्थः । उभे पुण्यपापे हि यस्मादेवमेष विद्वानेते आत्मानमात्मरूपेणैव पुण्यपापे स्वेन विशेषरूपेण शून्ये कृत्वाऽऽत्मानं स्पृणुत एव । को य एवं वेद यथोक्तमद्वैतमानन्दं ब्रह्म वेद तस्याऽऽत्मभावेन दृष्टे पुण्यपापे निर्वीर्ये अतापके जन्मान्तरारम्भके न भवत इतीयमेवं यथोक्ताऽस्यां वल्ल्यां ब्रह्मविद्योपनिषत्सर्वाभ्यो विद्याभ्यः परमरहस्यं दर्शितमित्यर्थः । परं श्रेयोऽस्यां निषण्णमिति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्ये द्वितीये ब्रह्मवल्ल्यध्याये नवमोऽनुवाकः ॥ ९ ॥

साध्वसाधुनी स्वतः प्रकाशेते चेति सत्प्रकाशमात्रमात्मतत्त्वमेव तयोः स्वरूपं ततोऽतिरिक्तं यदर्थानर्थहेतुत्वं नामविशेषरूपं तन्न वस्तु सत्प्रकाशान्यत्वेनासत्त्वादप्रकाशमानत्वाच्चेत्यभिप्रेत्याऽऽह—स्वेन विशेषरूपेणेति । आत्मैवाविद्यया साध्वसाधुरूपेण प्रतिपन्न आसीत् । इदानीं ये साध्वसाधुनी ममार्थानर्थहेतू बभूवतुस्ते आत्मैवेति ज्ञानेन स्वात्मानं साध्वसाधुकरणेन प्रीणयत्येव लोकदृष्ट्या निष्पद्यमाने पुण्यपापे दृष्ट्वा हृष्यते(ति) च विद्वान्न बिभेतीत्याह—स्पृणुत एवेति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां द्वितीये ब्रह्मवल्ल्यध्याये नवमोऽनुवाकः ॥ ९ ॥

---

१ ज. झ. ब. ठ. दृश्यते ।

ब्रह्मविदिदमेकंविंशतिरन्नादन्नरसमयात्प्राणो व्यानोऽपान आकाशः पृथिवी पुच्छं षड्विंशतिः प्राणं यजुर्ऋक्सामादेशोऽथर्वाङ्गिरसः पुच्छं द्वाविंशतिर्यतः श्रद्धतं सत्यं योगो महोऽष्टादश विज्ञानं प्रियं मोदः प्रमोद आनन्दो ब्रह्म पुच्छं द्वाविंशतिरसन्नेवाष्टाविंशतिरसच्चोडश भीषाऽस्मादेकपञ्चाशद्यतः कुतश्चैकादश ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ।

ॐ शान्तिः शान्तिः शान्तिः ।

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि द्वितीयो ब्रह्मवल्ल्यध्यायः समाप्तः ॥ २ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य शंकरभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्ये द्वितीयो ब्रह्मवल्ल्यध्यायः समाप्तः ॥ २ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दभगवत्पूज्यपादशिष्यश्रीमद्भगवदानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां द्वितीयो ब्रह्मवल्ल्यध्यायः समाप्तः ॥ २ ॥

अथ तैत्तिरीयोपनिषदि तृतीयो भृगुवल्ल्यध्यायः ।

तत्र प्रथमोऽनुवाकः ।

हरिः ॐ ।

सह नाववतु । सह नौ भुनक्तु ।
सह वीर्यं करवावहै । तेजस्वि
नावधीतमस्तु मा विद्विषावहै ।
ॐ शान्तिः शान्तिः शान्तिः ।

इति शान्तिः ।

सत्यं ज्ञानमनन्तं ब्रह्माऽऽकाशादिकार्यमन्नमयान्तं सृष्ट्वा तदेवानुप्रविष्टं विशेषवदिवोपलभ्यमानं यस्मात्तस्मात्सर्वकार्यविलक्षणमदृश्यादिधर्मकमेवाऽऽनन्दं तदेवाहमिति विजानीयादनुप्रवेशस्य तदर्थत्वात्तस्यैवं विजानतः शुभाशुभे कर्मणी जन्मान्तरारम्भके न भवत इत्येवमानन्दवल्ल्यां विवक्षितोऽर्थः । परिसमाप्ता च ब्रह्मविद्या । अतः परं ब्रह्मविद्यासाधनं तपो वक्तव्यमन्नादिविषयाणि चोपासनान्यनुक्तानीत्यत इदमारभ्यते—

भृगुर्वै वारुणिः । वरुणं पितरमुपससार ।
अधीहि भगवो ब्रह्मेति । तस्मा एतत्प्रो-
वाच । अन्नं प्राणं चक्षुः श्रोत्रं मनो वाच-
मिति । तꣳ होवाच । यतो वा इमानि भूतानि
जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्य-
भिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति ।

१ ग. 'मन्नमयान्ता' ।

आख्यायिका विद्यास्तुतये, प्रियाय पुत्राय पित्रोक्तेति—भृगुर्वै वारुणिः। वैशब्दः प्रसिद्धानुस्मारको भृगुरित्येवंनामा प्रसिद्धोऽनुस्मर्यते। वारुणिर्वरुणस्यापत्यं वारुणिर्वरुणं पितरं ब्रह्म विजिज्ञासुरुपससारोपगतवान्। अधीहि भगवो ब्रह्मेत्यनेन मन्त्रेण। स च पिता विधिवदुपसन्नाय तस्मै पुत्रायैतद्वचनं प्रोवाच। अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति। अन्नं शरीरं तदभ्यन्तरं च प्राणमत्तारमुपलब्धिसाधनानि चक्षुः श्रोत्रं मनो वाचमित्येतानि ब्रह्मोपलब्धौ द्वाराण्युक्तवान्। उक्त्वा च द्वारभूतान्येतान्यन्नादीनि तं भृगुं होवाच ब्रह्मणो लक्षणम्। किं तत्। यतो यस्माद्वा इमानि ब्रह्मादीनि स्तम्बपर्यन्तानि भूतानि जायन्ते। येन जातानि जीवन्ति प्राणान्धारयन्ति वर्धन्ते। विनाशकाले च यत्प्रयन्ति यद्ब्रह्म प्रतिगच्छन्ति, अभिसंविशन्ति तादात्म्यमेव प्रतिपद्यन्ते। उत्पत्तिस्थितिलयकालेषु यदात्मतां न जहति भूतानि तदेतद्ब्रह्मणो लक्षणम्। तद्ब्रह्म विजिज्ञासस्व विशेषेण ज्ञातुमिच्छस्व। यदेवंलक्षणं ब्रह्म तदन्नादिद्वारेण प्रतिपद्यस्वेत्यर्थः। श्रुत्यन्तरं च—"प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुस्ते निचिक्युर्ब्रह्म पुराणमग्र्यम्"। इति ब्रह्मोपलब्धौ द्वाराण्येतानीति दर्शयति।

वृत्तानुवादपूर्वकमुत्तरवल्लीसंबन्धमाह—सत्यं ज्ञानमित्यादिना। तप इति। पदार्थविवरणं वाक्यार्थज्ञानसाधनमित्यर्थः। अधीहीति। अध्यापय स्मारय। 'इक् स्मरणे' इति धातुपाठादित्यर्थः। ब्रह्मोपलब्धाविति। लक्ष्यत्वमर्थविवेकाय द्वाराणि शरीरादिचेष्टान्यथानुपपत्त्या हि साक्षिभूतश्चिद्धातुर्विविच्यत इति भावः।

स तपोऽतप्यत। स तपस्तप्त्वा॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्याये प्रथमोऽनुवाकः॥ १॥

स भृगुर्ब्रह्मोपलब्धिद्वाराणि ब्रह्मलक्षणं च श्रुत्वा पितुस्तपो ब्रह्मोपलब्धिसाधनत्वेनातप्यत तप्तवान्। कुतः पुनरनुपदिष्टस्यैव तपसः साधनत्वप्रतिपत्तिर्भृगोः। सावशेषोक्तेरन्नादिब्रह्मणः प्रतिपत्तौ द्वारं लक्षणं च यतो वा इमानीत्याद्युक्तवान्। सावशेषं हि तत्साक्षाद्ब्रह्मणोऽनिर्देशात्। अन्यथा हि स्वरूपेणैव ब्रह्म निर्देष्टव्यं जिज्ञासवे पुत्रायेदमित्थंरूपं ब्रह्मेति। न चैवं निरदिशत्किं

---

१ क. ख. ठ. °नुस्मार्य°। २ क. ख. °ण। अधीह्यध्यापय कथयेत्यर्थः। स। ठ. °ण। अधीह्यध्यापय कथय। स।

तर्हि सावशेषमेवोक्तवान् । अतोऽवगम्यते नूनं साधनान्तरमप्यपेक्षते पिता ब्रह्मविज्ञानं प्रतीति । तपोविशेषप्रतिपत्तिस्तु सर्वसाधकतमत्वात् । सर्वेषां हि नियतसाध्यविषयाणां साधनानां तप एव साधकतमं साधनमिति हि प्रसिद्धं लोके । तस्मात्पित्राऽनुपदिष्टमपि ब्रह्मविज्ञानसाधनत्वेन तपः प्रतिपेदे भृगुः । तच्च तपो बाह्यान्तःकरणसमाधानम् । तद्द्वारकत्वाद्ब्रह्मप्रतिपत्तेः ।

'मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः ।
तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते' ॥ इति स्मृतेः ।

स च तपस्तप्त्वा ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषदि तृतीयभृगुवल्ल्यध्यायभाष्ये प्रथमोऽनुवाकः ॥ १ ॥

न केवलं त्वमर्थज्ञानं वाक्यार्थज्ञानसाधनं किंतु तत्पदार्थज्ञानमपीत्यभिप्रेत्य तदर्थस्य ब्रह्मणो लक्षणमुक्तवानित्यर्थः[1] । सावशेषोक्तेरिति । पदार्थोपलक्षणस्यैवाभिधानादखण्डवाक्यार्थस्याप्रतिपादनात्पदार्थभेदज्ञानाच्च पुरुषार्थासंभवादुदरमन्तरं कुरुत इति निन्दितत्वादतो वाक्यार्थावगतिपर्यन्तं तात्पर्येण लक्ष्यपदार्थविचारणमावृत्त्याऽनुष्ठितवानित्यर्थः ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां भृगुवल्ल्यध्याये प्रथमोऽनुवाकः ॥ १ ॥

अथ भृगुवल्ल्यध्याये द्वितीयोऽनुवाकः ।

अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच ।

---

१ क. ग. घ. च. °लं लक्ष्यत्व° ।

तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति ।
स तपोऽतप्यत । स तपस्तप्त्वा ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्याये
द्वितीयोऽनुवाकः ॥ २ ॥

अन्नं ब्रह्मेति व्यजानाद्विज्ञातवान् । तद्धि यथोक्तलक्षणोपेतम् । कथम् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति । तस्माद्युक्तमन्नस्य ब्रह्मत्वमित्यभिप्रायः । स एवं तपस्तप्त्वाऽन्नं ब्रह्मेति विज्ञाय लक्षणेनोपपत्त्या च पुनरेव संशयमापन्नो वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । कः पुनः संशयहेतुरस्येत्युच्यते । अन्नस्योत्पत्तिदर्शनात् । तपसः पुनः पुनरुपदेशः साधनातिशयत्वावधारणार्थः । यावद्ब्रह्मणो लक्षणं निरतिशयं न भवति यावच्च जिज्ञासा न निवर्तते तावत्तप एव ते साधनम् । तपसैव ब्रह्म विजिज्ञासस्वेत्यर्थः । ऋज्वन्यत् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषदि तृतीयभृगुवल्ल्यध्यायभाष्ये
द्वितीयोऽनुवाकः ॥ २ ॥

स च तपस्तप्त्वेति । कुत्रेदं पित्रोक्तं लक्षणं क्वेदं लक्षणं वर्तते परिपूर्णं भवतीत्येकाग्रेण चेतसा पर्यालोच्यान्नं ब्रह्मेति व्यजनात् । अद्यते भुज्यत उपलभ्यते सर्वैरिति सर्वप्रतिपत्तृसाधारणं स्थूलदेहकारणं भूतपञ्चकं विराट्संज्ञकमन्नशब्देनोच्यते । तस्य स्थूलभौतिककारणत्वात् । यतो वा इमानि भूतानीति लक्षणस्य तत्र योजयितुं शक्यत्वात्तद्ब्रह्मेति प्रतिपन्नवानित्यर्थः ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां तृतीये भृगुवल्ल्यध्याये द्वितीयोऽनुवाकः ॥ २ ॥

अथ भृगुवल्ल्यध्याये तृतीयोऽनुवाकः ।

प्राणो ब्रह्मेति व्यजानात् । प्राणाद्ध्येव खल्वि-
मानि भूतानि जायन्ते । प्राणेन जातानि

---

१ घ. ङ. च. 'वल्लिये' ।

जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति ।
तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार ।
अधीहि भगवो ब्रह्मेति । त होवाच ।
तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति ।
स तपोऽतप्यत । स तपस्तप्त्वा ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्याये तृतीयोऽनुवाकः ॥ ३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्ये तृतीयभृगुवल्ल्यध्याये तृतीयोऽनुवाकः ॥ ३ ॥

विराज उत्पत्तिदर्शनाच्छ्रुतिस्मृतिषु लक्षणं तत्र संपूर्णं न भवतीति पुनस्तपोऽतप्यत । विचार्य च तत्कारणं क्रियाशक्तिविशिष्टतया प्राणशब्दलक्ष्यं हिरण्यगर्भं संकल्पाध्यवसायशक्तिविशिष्टतया च मनोविज्ञानशब्दलक्ष्यं ब्रह्मेति व्यजानात् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां द्वितीये भृगुवल्ल्यध्याये तृतीयोऽनुवाकः ॥ ३ ॥

अथ भृगुवल्ल्यध्याये चतुर्थोऽनुवाकः ।

मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते । मनसा जातानि
जीवन्ति । मनः प्रयन्त्यभिसंविशन्तीति ।
तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार ।
अधीहि भगवो ब्रह्मेति । त होवाच ।

---

१ क. ग. ट. विषयत' । २ ख. ग. च. 'शक्तिक' ।

तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति ।
स तपोऽतप्यत । स तपस्तप्त्वा ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्याये चतुर्थोऽनुवाकः ॥ ४ ॥

अथ ब्रह्मवल्ल्यध्याये पञ्चमोऽनुवाकः ।

विज्ञानं ब्रह्मेति व्यजानात् । विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते । विज्ञानेन जातानि जीवन्ति । विज्ञानं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्याये पञ्चमोऽनुवाकः ॥ ५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्ये तृतीये भृगुवल्ल्यध्याये चतुर्थपञ्चमावनुवाकौ समाप्तौ ॥ ४ ॥ ५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां तृतीये भृगुवल्ल्यध्याये चतुर्थपञ्चमावनुवाकौ ॥ ४ ॥ ५ ॥

आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जाय-

न्ते । आनन्देन जातानि जीवन्ति ।
आनन्दं प्रयन्त्यभिसंविशन्तीति ।

एवं तपसा विशुद्धात्मा प्राणादिषु साकल्येन ब्रह्मलक्षणमपश्यञ्शनैः नशैरन्तरनुप्रविश्यान्तरतममानन्दं ब्रह्म विज्ञातवांस्तपसैव साधनेन भृगुस्तस्माद्ब्रह्म विजिज्ञासुना बाह्यान्तःकरणसमाधानलक्षणं परमं तपःसाधनमनुष्ठेयमिति प्रकरणार्थः ।

तस्यापि कार्यत्वाल्लक्षणं परिपूर्णं न भवतीति विचार्य तत्कारणं स्वातन्त्र्येण निश्चित्य सर्वैः प्रार्थ्यमानतयाऽऽनन्दशब्दवाच्यं मायाविशिष्टं ब्रह्मेति विज्ञाय विशिष्टस्य विशिष्टान्तरात्मत्वानुपपत्तेः कारणत्वोपलक्षितं विशुद्धानन्दं ब्रह्मेति विज्ञातवानित्यर्थः ।

अधुनाऽऽख्यायिकातोऽपसृत्य श्रुतिः स्वेन वचनेनाऽऽख्यायिकानिर्वृत्तमर्थमाचष्टे—

सैषा भार्गवी वारुणी विद्या ।
परमे व्योमन्प्रतिष्ठिता । स
य एवं वेद प्रतितिष्ठति ।

सैषा भार्गवी भृगुणा विदिता वरुणेन प्रोक्ता वारुणी विद्या परमे व्योमन्हृदयाकाशगुहायां परम आनन्देऽद्वैते प्रतिष्ठिता परिसमाप्ताऽन्नमयादात्मनोऽधिप्रवृत्ता । य एवमन्योऽपि तपसैव साधनेनानेनैव क्रमेणानुप्रविश्याऽऽनन्दं ब्रह्म वेद स एवं विद्याप्रतिष्ठानात्प्रतितिष्ठत्यानन्दे परमे ब्रह्मणि । ब्रह्मैव भवतीत्यर्थः ।

दृष्टं च फलं तस्योच्यते—

अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्याये षष्ठोऽनुवाकः ॥ ६ ॥

---

१ ख. ग. घ. °तन्त्र्ये सति स° । २ ख. ग. च. झ. ट. °ष्टस्यापि° । ३ ख. ग. घ. °यिकां चोपसंहृत्य ।

अन्नवान्प्रभूतमन्नमस्य विद्यत इत्यन्नवान् । सत्तामात्रेण तु सर्वो ह्यन्नवानिति विद्याया विशेषो न स्यात् । एवमन्नमत्तीत्यन्नादो दीप्ताग्निर्भवतीत्यर्थः । महान्भवति । केन महत्त्वमित्यत आह—प्रजया पुत्रादिना पशुभिर्गवाश्वादिभिर्ब्रह्मवर्चसेन शमदमज्ञानादिनिमित्तेन तेजसा । महान्भवति कीर्त्या ख्यात्या शुभप्रचारनिमित्तया ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्यायभाष्ये षष्ठोऽनुवाकः ॥ ६ ॥

प्रभूतत्वविशेषणमश्रुतं कथं निक्षिप्यत इत्याशङ्क्याऽऽह—सत्तामात्रेणेति । अत्र सत्तामात्रे विवक्षिते श्वसूकरादिरपि शरीरस्थित्याक्षिप्तान्नेनान्नवानिति विद्यायाः फलविशेषो नोक्तः स्यादतस्तद्बलात्प्रभूतत्वविशेषणं निक्षिप्तमित्यर्थः । एतच्च दृष्टफलं ब्रह्मविदो जीवन्मुक्तस्याप्यविद्यालेशवशाद्द्वैताभासं पश्यतो नानुपपन्नम् । यस्येश्वरस्यानुग्रहाद्विदुषामप्यन्नादिसमृद्धिर्दृश्यते किमुत तदात्मतत्त्वं साक्षादनुभवतामिति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां तृतीये भृगुवल्ल्यध्याये षष्ठोऽनुवाकः ॥ ६ ॥

अथ भृगुवल्ल्यध्याये सप्तमोऽनुवाकः ।

अन्नं न निन्द्यात् । तद्व्रतम् । प्राणो वा अन्नम् । शरीरमन्नादम् । प्राणे शरीरं प्रतिष्ठितम् । शरीरे प्राणः प्रतिष्ठितः । तदेतदन्नमन्ने प्रतिष्ठितम् ।

किंचान्नेन द्वारभूतेन ब्रह्म विज्ञातं यस्मात्तस्माद्गुरुमिवान्नं न निन्द्यात्तदस्यैवं ब्रह्मविदो व्रतमुपदिश्यते । व्रतोपदेशोऽन्नस्तुतये, स्तुतिभाक्त्वं चान्नस्य ब्रह्मोपलब्ध्युपायत्वात् । प्राणो वा अन्नम् । शरीरान्तर्भावात्प्राणस्य । यद्यस्यान्तः प्रतिष्ठितं भवति तत्तस्यान्नं भवतीति । शरीरे च प्राणः प्रतिष्ठितस्तस्मात्प्राणोऽन्नं. शरीरमन्नादम् । तथा शरीरमप्यन्नं प्राणोऽन्नादः । कस्मात्प्राणे शरीरं प्रतिष्ठितम् । तन्निमित्तत्वाच्छरीरस्थितेः ।

---

१ ख. ग. च. अन्नस° ।

तस्मात्तदेतदुभयं शरीरं प्राणश्चान्नमन्नादश्च । येनान्योन्यस्मिन्प्रतिष्ठितं तेनान्नम् । येनान्योन्यस्य प्रतिष्ठा तेनान्नादः । तस्मात्प्राणः शरीरं चोभयमन्नमन्नादं च ।

अन्नमपकृष्टं प्राप्तं न निन्द्यात् । "यदृच्छया चोपपन्नमद्याच्छ्रेष्ठमुतावरम्" इत्युक्तत्वात् । ब्रह्मविदो नियमाभिधानं साधकस्यानुष्ठानार्थम् । एवं वाक्यार्थज्ञाने लक्ष्यपदार्थानुसंधानं मुख्यं साधनं तत्फलं चोपसंहृत्याधुना विचारासमर्थस्य मन्दाधिकारिणोऽन्नादरूपेण प्राणाद्युपासनं गौणं साधनं विधत्ते—प्राणो वा अन्नमित्यादिना ।

स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्याये सप्तमोऽनुवाकः ॥ ७ ॥

स य एवमेतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठत्यन्नान्नादात्मनैव । किंचान्नवानन्नादो भवतीत्यादि पूर्ववत् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्यायभाष्ये सप्तमोऽनुवाकः ॥ ७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यामन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां तृतीये भृगुवल्ल्यध्याये सप्तमोऽनुवाकः ॥ ७ ॥

अथ भृगुवल्ल्यध्यायेऽष्टमोऽनुवाकः ।

अन्नं न परिचक्षीत । तद्व्रतम् । आपो वा अन्नम् । ज्योतिरन्नादम् । अप्सु ज्योतिः प्रतिष्ठितम् । ज्योतिष्यापः प्रतिष्ठिताः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्न-

मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्यायेऽष्टमोऽनुवाकः ॥ ८ ॥

अन्नं न परिचक्षीत न च परिहरेत् । तद्व्रतं पूर्ववत्स्तुत्यर्थम् । तदेवं शुभाशुभकल्पनयाऽपरिगृह्यमाणं स्तुतं महीकृतमन्नं स्यादेवं यथोक्तमुत्तरेष्वप्यापो वा अन्नमित्यादिषु योजयेत् । अप्सु ज्योतिरित्यब्ज्योतिषोरन्नान्नादगुणत्वेनोपासकस्यान्नस्य बहुकरणं व्रतम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्ये तृतीये भृगुवल्ल्यध्यायभाष्येऽष्टमोऽनुवाकः ॥ ८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां तृतीये भृगुवल्ल्यध्यायेऽष्टमोऽनुवाकः ॥ ८ ॥

अथ भृगुवल्ल्यध्याये नवमोऽनुवाकः ।

अन्नं बहु कुर्वीत । तद्व्रतम् । पृथिवी वा अन्नम् । आकाशोऽन्नादः । पृथिव्यामाकाशः प्रतिष्ठितः । आकाशे पृथिवी प्रतिष्ठिता । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशु-

भिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्याये नवमोऽनुवाकः ॥ ९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्यायभाष्ये नवमोऽनुवाकः ॥ ९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां तृतीये भृगुवल्ल्यध्याये नवमोऽनुवाकः ॥ ९ ॥

अथ भृगुवल्ल्यध्याये दशमोऽनुवाकः ।

न कंचन वसतौ प्रत्याचक्षीत । तद्व्रतम् । तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात् । अराध्यस्मा अन्नमित्याचक्षते ।

तथा पृथिव्याकाशोपासकस्य वसतौ वसतिनिमित्तं कंचन कंचिदपि न प्रत्याचक्षीत वसत्यर्थमागतं न निवारयेदित्यर्थः । वासे च दत्तेऽवश्यं ह्यशनं दातव्यम् । तस्माद्यया कया च विधया येन केन च प्रकारेण बह्वन्नं प्राप्नुयाद्बह्वन्नसंग्रहं कुर्यादित्यर्थः । यस्मादन्नवन्तो विद्वांसोऽभ्यागतायान्नार्थिनेऽराधि संसिद्धमस्मा अन्नमित्याचक्षते न नास्तीति प्रत्याख्यानं कुर्वन्ति तस्माच्च हेतोर्बह्वन्नं प्राप्नुयादिति पूर्वेण संबन्धः । अपि चान्नदानस्य माहात्म्यमुच्यते । यथा यत्कालं प्रयच्छत्यन्नं तथा तत्कालमेव प्रत्युपनमते ।

कथमिति तदेतदाह—

एतद्वै मुखतोऽन्नꣳ राद्धम् । मुखतोऽस्मा अन्नꣳ राध्यते । एतद्वै मध्यतोऽन्नꣳ राद्धम् । मध्यतोऽस्मा अन्नꣳ राध्यते । एतद्वा अन्ततोऽन्नꣳ राद्धम । अन्ततोऽस्मा अन्नꣳ

राध्यते (१)। य एवं वेद ।

एतद्वा अन्नं मुखतो मुख्ये प्रथमे वयसि मुख्यया वा वृत्त्या पूजापुरःसरमभ्यागतायान्नार्थिने राद्धं संसिद्धं प्रयच्छतीति वाक्यशेषः। तस्य किं फलं स्यादित्युच्यते—मुखतः पूर्वे वयसि मुख्यया वा वृत्त्याऽस्मा अन्नदायान्नं राध्यते यथादत्तमुपतिष्ठत इत्यर्थः। एवं मध्यतो मध्यमे वयसि मध्यमेन चोपचारेण। तथाऽन्ततोऽन्ते वयसि जघन्येन चोपचारेण परिभवेन तथैवास्मै राध्यते संसिध्यत्यन्नम्। य एवं वेद य एवमन्नस्य यथोक्तं माहात्म्यं वेद तद्दानस्य यथोक्तं फलमुपनमेत्।

इदानीं ब्रह्मण उपासनप्रकार उच्यते—

क्षेम इति वाचि। योगक्षेम इति
प्राणापानयोः। कर्मेति हस्तयोः।
गतिरिति पादयोः। विमुक्तिरिति
पायौ। इति मानुषीः समाज्ञाः।

क्षेम इति वाचि। क्षेमो नामोपात्तपरिरक्षणम्। ब्रह्म वाचि क्षेमरूपेण प्रतिष्ठितमित्युपास्यम्। योगक्षेम इति। योगोऽनुपात्तस्योपादानम्। तौ हि योगक्षेमौ प्राणापानयोः सतोर्भवतो यद्यपि तथाऽपि न प्राणापाननिमित्तावेव किं तर्हि ब्रह्मनिमित्तौ। तस्माद्ब्रह्म योगक्षेमात्मना प्राणापानयोः प्रतिष्ठितमित्युपास्यम्। एवमुत्तरेष्वन्येषु तेन तेनाऽऽत्मना ब्रह्मैवोपास्यम्। कर्मणो ब्रह्मनिर्वर्त्यत्वाद्धस्तयोः कर्मात्मना ब्रह्म प्रतिष्ठितमित्युपास्यम्। गतिरिति पादयोः। विमुक्तिरिति पायौ। इत्येता मानुषीर्मनुष्येषु भवा मानुष्यः समाज्ञाः, आध्यात्मिक्यः समाज्ञा ज्ञानानि विज्ञानान्युपासनानीत्यर्थः।

अथ दैवीः। तृप्तिरिति वृष्टौ। बलमिति
विद्युति (२)। यश इति पशुषु।
ज्योतिरिति नक्षत्रेषु। प्रजातिरमृतमा-
नन्द इत्युपस्थे। सर्वमित्याकाशे।

तत्प्रतिष्ठेत्युपासीत । प्रतिष्ठावान्भवति

अथानन्तरं दैवीर्दैव्यो देवेषु भवाः समाज्ञा उच्यन्ते । तृप्तिरात वृष्टौ । वृष्टेरन्नादिद्वारेण तृप्तिहेतुत्वाद्ब्रह्मैव तृप्त्यात्मना वृष्टौ व्यवस्थितमित्युपास्यम् । तथाऽन्येषु तेन तेनाऽऽत्मना ब्रह्मैवोपास्यम् । तथा बलरूपेण विद्युति । यशोरूपेण पशुषु । ज्योतीरूपेण नक्षत्रेषु । प्रजातिरमृतममृतत्वप्राप्तिः पुत्रेण ऋणविमोक्षद्वारेणाऽऽनन्दः सुखमित्येतत्सर्वमुपस्थनिमित्तं ब्रह्मैवानेनाऽऽत्मनोपस्थे प्रतिष्ठितमित्युपास्यम् । सर्वं ह्याकाशे प्रतिष्ठितमतो यत्सर्वमाकाशे तद्ब्रह्मैवेत्युपास्यम् । तच्चाऽऽकाशं ब्रह्मैव । तस्मात्तत्सर्वस्य प्रतिष्ठेत्युपासीत । प्रतिष्ठागुणोपासनात्प्रतिष्ठावान्भवति । एवं पूर्वेष्वपि यद्यत्तदधीनं फलं तद्ब्रह्मैव तदुपासनात्तद्वान्भवतीति द्रष्टव्यम् । श्रुत्यन्तराच्च—"तं यथा यथोपासते तदेव भवति" इति ।

उपासनमपि फलानभिसंधिनाऽनुष्ठितं बुद्धिशुद्धिद्वारेण ब्रह्मज्ञानायोपकरोतीत्युक्तम् । मुख्याधिकारिणस्त्वपवादायोपकरिष्यति । यत्र वागादौ यत्फलं कार्यं क्षेमादीत्यर्थः ।

तन्मह इत्युपासीत । महान्भवति । तन्मन इत्युपासीत । मानवान्भवति (३) । तन्नम इत्युपासीत । नम्यन्तेऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान्भवति । तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते द्विषन्तः सपत्नाः । परि येऽप्रिया भ्रातृव्याः ।

तन्मह इत्युपासीत । महो महत्त्वगुणवत्तदुपासीत । महान्भवति । तन्मन इत्युपासीत । मननं मनः । मानवान्भवति मननसमर्थो भवति । तन्नम इत्युपासीत । नमनं नमो नमनगुणवत्तदुपासीत । नम्यन्ते प्रह्वी भवन्त्यस्मा उपासित्रे कामाः । काम्यन्त इति भोग्या विषया इत्यर्थः । तद्ब्रह्मेत्युपासीत । ब्रह्म परिवृढतममित्युपासीत । ब्रह्मवांस्तद्गुणो भवति । तद्ब्रह्मणः परिमर इत्युपासीत । ब्रह्मणः परिमरः परिम्रियन्तेऽस्मिन्पञ्च देवता विद्युद्वृष्टिश्चन्द्रमा आदि-

१ क. ङ. छ. भोग्यवि° ।

स्योऽग्निरित्येतत् । अतो वायुः परिमरः । श्रुत्यन्तरप्रसिद्धेः । स एष एवायं वायुराकाशेनानन्य इत्याकाशो ब्रह्मणः परिमरस्तमाकाशं वाय्वात्मानं ब्रह्मणः परिमर इत्युपासीत । पर्येनमेवंविदं प्रतिस्पर्धिनो द्विषन्तोऽद्विषन्तोऽपि सपत्ना म्रतो भवन्त्यतो विशेष्यन्ते द्विषन्तः सपत्ना इति । य एनं द्विषन्तः सपत्नास्ते परिम्रियन्ते प्राणाञ्जहति । किंच ये चाप्रिया अस्य भ्रातृव्या अद्विषन्तोऽपि ते च परिम्रियन्ते ।

महानिति । प्रजादिभिः । अन्नवानिति । स्थूलभोगसाधनवान्विराडिवेत्यर्थः । श्रुत्यन्तरप्रसिद्धेरिति । य एवमेताः पञ्च देवता वायुर्वाव संवर्ग इत्यादिश्रुत्यन्तराद्ब्रह्मणः संहर्तृत्वं वायुद्वारकमिति वायुर्ब्रह्मणः परिमरः । संहारसाधनमित्यर्थः । तत्कथं परिमरगुणतयाऽऽकाशोपासनं सिध्यतीत्यत आह—स एष इति ।

प्राणो वा अन्नं शरीरमन्नादमित्यारभ्याऽऽकाशान्तस्य कार्यस्यैवान्नान्नादत्वमुक्तम् । उक्तं नाम किं तेन, तेनैतत्सिद्धं भवति—कार्यविषय एव भोज्यभोक्तृत्वलक्षणः संसारो न त्वात्मनीति । आत्मनि तु भ्रान्त्योपचर्यते ।

एवं मन्दाधिकारिगोचरमुपासनजातमध्यारोपावस्थायामुपादिश्यापवाददृष्टिमभिप्रेत्याऽऽह—प्राणो वा अन्नमित्यादिना ।

नन्वात्माऽपि परमात्मनः कार्यं ततो युक्तस्तस्य संसार इति । न । असंसारिण एव प्रवेशश्रुतेः । "तत्सृष्ट्वा तदेवानुप्राविशत्" इत्याकाशादिकारणस्य ह्यसंसारिण एव परमात्मनः कार्येऽनुप्रवेशः श्रूयते । तस्मात्कार्यानुप्रविष्टो जीव आत्मा पर एवासंसारी । सृष्ट्वाऽनुप्राविशदिति समानकर्तृ[क]त्वोपपत्तेश्च । सर्गप्रवेशक्रिययोश्चैकश्चेत्कर्ता ततः क्त्वाप्रत्ययो युक्तः । प्रविष्टस्य तु भावान्तरापत्तिरिति चेत् । न । प्रवेशस्यान्यार्थत्वेन प्रत्याख्यातत्वात् । अनेन जीवेनेति विशेषश्रुतेर्धर्मान्तरेणानुप्रवेश इति चेत् । न । तत्त्वमसीति पुनस्तद्भावोक्तेः । भावान्तरापन्नस्यैव तदपोहार्था संपदिति चेत् । न । तत्सत्यं स आत्मा तत्त्वमसीति सामानाधिकरण्यात् । दृष्टं जीवस्य संसारित्वमिति चेत् । न । उपलब्धुरनुपलभ्यत्वात् । संसारधर्मविशिष्ट आत्मोपलभ्यत इति चेत् । न । धर्माणां धर्मिणोऽव्यतिरेकात्कर्मत्वानुपपत्तेः । उष्णप्रकाशयोर्दाह्यप्रकाश्यत्वानुपपत्तिवत्त्रासादिदर्शनाद्दुःखित्वाद्यनुमीयत इति चेत् । न । त्रासादेर्दुःखस्य चोपलभ्यमान-

१ क. 'त्वात्म' ।

त्वान्नोपलब्धृधर्मत्वम् । कापिलकाणादादितर्कशास्त्रविरोध इति चेत् । न । तेषां मूलाभावे वेदविरोधे च भ्रान्तत्वोपपत्तेः । श्रुत्युपपत्तिभ्यां च सिद्धमात्मनोऽसंसारित्वमेकत्वाच्च ।

भोक्तृत्वादिलक्षणः संसारः कार्यगोचर इति वदतैव जीवस्यानौपाधिकं संसारित्वमिष्टं तस्यापि कार्यत्वादिति भागवतानां मतमुद्भाव्य दूषयति—नन्वात्माऽपीत्यादिना । छान्दोग्यश्रुत्यनुसारेण विकारात्मना प्रवेशमाशङ्क्य वाक्यशेषविरोधमाह—अनेन जीवेनेत्यादिना । भ्रान्त्या देहादिभावमापन्नस्य जीवस्य ब्रह्मव्यतिरिक्तस्यैव ब्रह्मदृष्टिरुपदिश्यते संसारित्वापोहार्था । मातृबुद्धिरिव परयोषिति रागापोहार्था । अतस्तत्त्वमसीत्युपदेशस्यान्यार्थत्वान्न जीवस्य पारमार्थिकमसंसारिब्रह्मात्मत्वमित्याशङ्क्य तद्दूषयति—भावान्तरापन्नस्येत्यादिना । अबाधिततत्पदमुख्यसामानाधिकरण्यविरोधाद्ब्रह्माणि जीवे ब्रह्मत्वसंपादनार्थत्वं कल्पयितुं न शक्यत इत्यर्थः । संसारित्वग्राहकप्रत्यक्षविरोधादबाधितत्वमसिद्धमित्याह—दृष्टमिति । सर्वप्रमाणानामनुग्राहकस्तर्क इष्यते । आत्मनश्च संसारधर्मवत्त्वस्य तर्कापरिशुद्धत्वात्तत्प्रत्यक्षस्य भ्रान्तत्वान्न शास्त्रज्ञानबाधकत्वं संभवतीत्याह—नेति । सुखादेरुपलभ्यत्वान्नोपलब्धृधर्मत्वं संभवति रूपादिवदित्यर्थः । संसारित्वग्राहकं यद्यपि प्रत्यक्षप्रमाणं न भवति तथाऽपि संसारधर्मविशिष्ट आत्मा स्वचैतन्येनोपलभ्यत इति स्वानुभवविरोधान्न शाब्दमसंसारित्वज्ञानं प्रमाणमिति चेन्नैतदपि युक्तम् । कर्मत्वकर्तृत्वविरोधादित्यर्थः । प्रत्यक्षविरोधाभावेऽप्यनुमानविरोधो भविष्यतीत्याह—प्रासादीति । प्रासादि साश्रयं कार्यत्वाद्घटवदन्यस्याऽऽश्रयस्यासंभवादात्मैव तदाश्रयोऽनुमीयत इति न वाच्यमुपलभ्यो नोपलब्धुर्धर्मो रूपादिवदिति व्याप्त्यन्तरविरोधादध्यासादपि कार्यदर्शनसंभवादित्यर्थः । जीवस्य ब्रह्मात्मत्वप्रतिपादयतः शास्त्रस्य तर्कशास्त्रविरोधादप्रामाण्यमाशङ्क्य दूषयति—कपिलेत्यादिना । तर्कशास्त्रस्य श्रुतेश्च विरुद्धाव्यभिचारित्वेन प्रामाण्यसंशयोऽपि नाऽऽशङ्कनीय इत्याह—श्रुत्युपपत्तिभ्यां चेति । किंच तार्किकेणापीश्वराधीनं जीवस्य सुखित्वं दुःखित्वं च निरूपणीयं न तन्निरूपयितुं शक्यते । स्वात्मनीश्वरस्य सुखदुःखहेतुत्वासंभवादित्यभिप्रेत्याऽऽह— एकत्वाच्चेति ।

---

१ क ग. 'दतस्तव । २ ख. ग घ ञ. ट 'लभ्यं नो' ।

कथमेकत्वमित्युच्यते—

स यश्चा॑यं पु॒रुषे । यश्चासा॑वादि॒त्ये । स एकः॑ (४) । स य॑ एवं॑वित् । अस्माल्लो॑कात्प्रे॒त्य । एतमन्नमयमात्मानमु॑पसंक्र॒म्य । एतं प्राणमयमात्मानमु॑पसंक्र॒म्य । एतं मनोमयमात्मानमु॑पसंक्र॒म्य । एतं विज्ञानमयमात्मानमु॑पसंक्र॒म्य । एतमानन्दमयमात्मानमु॑पसं॒क्र॒म्य । इमाँल्लोकान्कामान्नी कामरू॒प्य॑नु॒संचरन् । एतत्साम गा॑यन्ना॒स्ते ।

स यश्चायं पुरुषे । यश्चासावादित्ये । स एक इत्येवमादि पूर्ववत्सर्वम् । अन्नमयादिक्रमेणाऽऽनन्दमयमात्मानमुपसंक्रम्यैतत्साम गायन्नास्ते । सत्यं ज्ञानमित्यस्या ऋचोऽर्थो व्याख्यातो विस्तरेण तद्विवरणभूतयाऽऽनन्दवल्ल्या सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति । तस्य फलवचनस्यार्थविस्तारो नोक्तः । के ते किंविषया वा सर्वे कामाः कथं वा ब्रह्मणा सह समश्नुत इत्येतद्वक्तव्यमितीदमिदानीमारभ्यते । तत्र पितापुत्राख्यायिकायां पूर्वविद्याशेषभूतायां तपो ब्रह्मविद्यासाधनमुक्तम् । प्राणादेराकाशान्तस्य च कार्यस्यान्नान्नादत्वेन विनियोगश्चोक्तः । ब्रह्मविषयोपासनानि च । ये च सर्वे कामाः प्रतिनियतानेकसाधनसाध्या आकाशादिकार्यभेदविषया एते दर्शिताः । एकत्वे पुनः कामकामित्वानुपपत्तिः । भेदजातस्य सर्वस्याऽऽत्मभूतत्वात् । तत्र कथं युगपद्ब्रह्मस्वरूपेण सर्वान्कामानेवंवित्समश्नुत इत्युच्यते । सर्वात्मत्वोपपत्तेः । कथं सर्वात्मत्वोपपत्तिरित्याह—पुरुषादित्यस्थात्मैकत्वविज्ञानेनापोह्योत्कर्षापकर्षावन्नमयाद्यात्मनोऽविद्याकल्पितान्क्रमेण संक्रम्याऽऽनन्दमयान्तान्सत्यं ज्ञानमनन्तं ब्रह्माद्दश्यादिधर्मकं स्वाभाविकमानन्दमजममृतमभयमद्वैतं फलभूतमापन्न इमाँल्लोकान्भूरादीननुसंचरन्निति व्यवहितेन संबन्धः । कथमनुसंचरन् । कामान्नी कामतोऽन्नमस्येति कामान्नी । तथा कामतो रूपाण्यस्येति कामरूपी । अनुसंचरन्सर्वात्मनेमाँल्लोकानात्मत्वेनानुभवन् । किम्, एतत्साम गायन्नास्ते । समत्वाद्ब्रह्मैव साम सर्वानन्यरूपं गायञ्शब्दयन्नात्मैकत्वं प्रख्यापयँल्लोकानुग्रहार्थं तद्विज्ञानफलं चातीव कृतार्थत्वं गायन्नास्ते तिष्ठति ।

१ ख. ठ. °त्मत्वोपप° । २ ख. ठ. °त्मत्वोपप° ।

स य इत्यादिपदव्याख्यानमुपेक्ष्योपसंक्रमणसामगानयोरेककर्तृ[क]त्वमन्वयप्र-
[द]र्शनेन दर्शितमिदानीं वल्लीसमाप्तिपर्यन्तस्य ग्रन्थस्य तात्पर्यं वृत्तकीर्तनेनाऽऽह—सत्यं [ज्ञ]ानमित्यादिना। अविद्यालेशवशेन द्वैतावभासमनुभवन्विद्वान्सर्वस्याऽऽत्माऽहमिति [म]न्यमानोऽणिमाद्यैश्वर्यभुजां योगिनां यत्कामान्नत्वं कामरूपत्वं च ममैवेति पश्यन्युग-[प]त्सर्वान्विषयानन्दानश्नुत इत्युपचर्यत इत्याह—सर्वात्मत्वापत्तेरिति।

कथम्—

हा३वु हा३वु हा३वु (५)। अहमन्नमह
मन्नमहमन्नम्। अहमन्नादो३ऽहमन्नादो३ऽह-
मन्नादः। अह२ श्लोककृदह२ श्लोककृदह२
श्लोककृत्। अहमस्मि प्रथमजा ऋता३ स्य।
पूर्वं देवेभ्यो अमृतस्य ना३भायि।

हा३वु हा३वु हा३वु। अहो इत्येतस्मिन्नर्थेऽत्यन्तविस्मयख्यापना-[र्थ]म्। कः पुनरसौ विस्मय इत्युच्यते— अद्वैत आत्मा निरञ्जनोऽपि सन्नह-[म]ेवान्नमन्नादश्च। किंचाहमेव श्लोककृत्। श्लोको नामान्नान्नादयोः संघात-[स्]तस्य कर्ता चेतनावान्। अन्नस्यैव वा परार्थस्यान्नादार्थस्य सतोऽनेकात्म-[क]स्य पारार्थ्येन हेतुना संघातकृत्। त्रिरुक्तिर्विस्मयत्वख्यापनार्था। अह-[म]स्मि भवामि। प्रथमजाः प्रथमजः प्रथमोत्पन्नः। ऋतस्य सत्यस्य मूर्तामूर्त-[स्]यास्य जगतो देवेभ्यश्च पूर्वममृतस्य नाभिरमृतत्वस्य नाभिर्मध्यं मत्संस्थ-[म]मृतत्वं प्राणिनामित्यर्थः।

प्रथमजो हिरण्यगर्भोऽप्यहम्। प्लुतिस्तावेद्धानार्था। देवेभ्यः स्वव्यष्टिरूपेभ्यः पूर्वं वैराड्रूपमेवेत्यर्थः।

यो मा ददाति स इदेवमा३ऽऽ-
वाः। अहमन्नमन्नमदन्तमा ३ द्मि।
अहं विश्वं भुवनमभ्यभवा३म्।

यः कश्चिन्मा मामन्नमन्नार्थिभ्यो ददाति प्रयच्छत्यन्नात्मना ब्रवीति स इदि-

---

१ ज. ठ. °वदादरार्था। अ. °वदनादरार्था।

त्थमेवमविनष्टं यथाभूतमावा अवतीत्यर्थः । यः पुनरन्यो मामदत्त्वाऽर्थिभ्यः काले प्राप्तेऽन्नमत्ति तमन्नमदन्तं भक्षयन्तं पुरुषमहमन्नमेव संप्रत्यद्मि भक्षयामि। अत्राऽऽहैवं तर्हि बिभेमि सर्वात्मत्वप्राप्तेर्मोक्षादस्तु संसार एव यतो मुक्तोऽप्यहमन्नभूत आद्यः स्यामन्नस्यैवं मा भैषीः संव्यवहारविषयत्वात्सर्वकामाशनस्यातीत्यायं संव्यवहारविषयमन्नान्नादादिलक्षणमविद्याकृतं विद्यया ब्रह्मत्वमापन्नो विद्वांस्तस्य नैव द्वितीयं वस्त्वन्तरमस्ति यतो बिभेत्यतो न भेतव्यं मोक्षात्। एवं तर्हि किमिदमाह—अहमन्नमहमन्नाद इत्युच्यते। योऽयमन्नान्नादादिलक्षणः संव्यवहारः कार्यभूतः स संव्यवहारमात्रमेव न परमार्थवस्तु। स एवंभूतोऽपि ब्रह्मनिमित्तो ब्रह्मव्यतिरेकेणासन्निति कृत्वा ब्रह्मविद्याकार्यस्य ब्रह्मभावस्य स्तुत्यर्थमुच्यते। अहमन्नमहमन्नमहमन्नम्। अहमन्नादोऽहमन्नादोऽहमन्नाद इत्यादि। अतो भयादिदोषगन्धोऽप्यविद्यानिमित्तोऽविद्योच्छेदाद्ब्रह्मभूतस्य नास्तीत्यहं विश्वं समस्तं भुवनं भूतैः संभजनीयं ब्रह्मादिभिर्भवन्तीति वाऽस्मिन्भूतानीति भुवनमभ्यभवामभिभवामि परेणेश्वरेण स्वरूपेण।

आवा इति। लोण्मध्यमपुरुषैकवचनम्। पौनःपुन्येनेत्येवं[1] मत्वाऽऽख्यातेषु निपात्यत इत्यवतीति व्याख्यातम्। अभिभवामि, उपसंहारमीत्यर्थः। ईश्वरात्मताज्ञानेनाहंबाधेऽद्वैतं ततो नास्ति भयकारणमित्यर्थः।

सुवर्न ज्योतीः। य एवं
वेद। इत्युपनिषत् (६)॥

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्याये
दशमोऽनुवाकः॥ १०॥

सुवर्न ज्योतीः सुवरादित्यो नकार उपमार्थे। आदित्य इव सकृद्विभातमस्मदीयं ज्योतिर्ज्योतिः प्रकाश इत्यर्थः। इति वल्लीद्वयविहितोपनिषत्परमात्मज्ञानं तामेतां यथोक्तामुपनिषदं शान्तो दान्त उपरतस्तितिक्षुः

---

१ क. ख. ग. च. °वं सर्वाख्या° । ज. वं सत्त्वाख्या° ।

समाहितो भूत्वा भृगुवत्तपो महदास्थाय य एवं वेद तस्येदं फलं यथोक्तमोमिति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ तैत्तिरीयोपनिषदि तृतीये भृगुवल्ल्यध्यायभाष्ये दशमोऽनुवाकः ॥ १० ॥

नकार इवार्थे ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां तृतीये भृगुवल्ल्यध्याये दशमोऽनुवाकः ॥ १० ॥

[* भृगुस्तस्मै यतो विशन्ति तद्विजिज्ञासस्व त्रयोदशान्नं प्राणो मनो विज्ञानं द्वादश द्वादशाऽऽनन्दो दशान्नं न निन्द्यादन्नं न परिचक्षीतान्नं बहु कुर्वीतैकादशैकादश] न कंचनैकषष्टिर्दश ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ।

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयोपनिषदि तृतीयो भृगुवल्ल्यध्यायः समाप्तः ॥ ३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यस्य शंकरभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्ये तृतीयो भृगुवल्ल्यध्यायः ॥ ३ ॥

---

* एतच्चिह्नान्तर्गतग्रन्थस्थाने क्वचित्पुस्तकेऽन्यथा पाठः। स यथा—"भृगुस्तस्मै यतो वै विशन्ति तद्विजिज्ञासस्व तत्त्रयोदशान्नं प्राणो मनो विज्ञानं तद्विज्ञाय तं तपसा द्वादश द्वादशाऽऽनन्द इति सैषा दशान्नं न निन्द्यात्प्राणः शरीरमन्नं न परिचक्षीताऽऽपो ज्योतिरन्नं बहु कुर्वीत पृथिव्यामाकाश एकादशैकादश" इति ।

तैत्तिरीयकभाष्यस्य शांकरस्य दृढीयसः
स्फुटार्थबोधकामेभ्यो निरमायि सटिप्पणम् ॥ १ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दभगवत्पूज्यपादशिष्यश्रीमद्भगवदानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छांकरभाष्यटीकायां तृतीयो भृगुवल्ल्यध्यायः समाप्तः ॥ ३ ॥

समाप्तेयं कृष्णयजुर्वेदीया तैत्तिरीयोपनिषत् ।

ॐ तत्सद्ब्रह्मणे नमः ।

अथ शंकरानन्दकृता तैत्तिरीयोपनिषद्दीपिका ।

वक्ष्येऽधुना शंकरविश्वरूपवाचा विनिर्णीतसमस्तवाक्यम् ।
कृष्णं[1] यजुस्तित्तिरिनामचिह्नं पदार्थशुद्ध्यर्थमतीव सार्थम् ॥ १ ॥

कर्माणि विचित्राणि नित्यादिलक्षणानि पूर्वमुक्तानि । तैर्निःश्रेयसमपश्यन्ब्रह्मज्ञानायो-पनिषदमारभमाणो वेदो ब्रह्मज्ञाने च महतामपि देवैः क्रियमाणान्विघ्नानवलोक्य तत्प्र-शान्तये ब्रह्मविद्यार्थिनेदं पठनीयमित्यभिप्रायेण प्रथमं पठति—शं सुखं नोऽस्मभ्यं मित्रः प्राणवृत्तेरह्नश्चाभिमानिनी देवता । शं सुखं वरुणोऽपानवृत्ते रात्रेश्चाभिमानिनी देवता । न इत्यनुषङ्गः । शं नो व्याख्यातम् । भवतु भूयात् । इदं पदं शंपदेन सर्वत्र संबध्यते । अर्यमा चक्षुष आदित्यमण्डलस्य चाभिमानिनी देवता । शं नो व्याख्यातम् । इन्द्रो बाह्वोर्बलस्य चाभिमानिनी देवता । बृहस्पतिर्वाचि बुद्धौ चाभिमानिनी देवता । शं न इत्यनुषङ्गः । शं नो व्याख्यातम् । विष्णुः पादाभिमानिनी देवता । तद्विशेषणमुरुक्रमः । उरु प्रचुरं क्रमणं यस्य स उरुक्रमः । सर्वव्यापीत्यर्थः । अथवा स्वतन्त्रमिदं पदमुरुक्रमो विराट्सर्वाङ्गाभिमानिनी देवता । शं न इत्यनुषङ्गः ।

एवं स्थूलसूक्ष्माभिमानिनीर्देवताः प्रार्थ्येदानीमव्याकृतज्ञानक्रियाशक्त्यभिमानिनीं देवतां नमस्करोति—नमो नमस्कारः । ब्रह्मणेऽव्याकृताभिमानिने । तस्यानुत्पादित-कार्यस्याकिंचित्करत्वात्कार्याभिमानिनं तदभिन्नं पुनर्नमस्करोति—नमो नमस्कारः । ते तुभ्यं वायो हे क्रियाशक्तिप्रधानज्ञानक्रियाशक्ते ;

ननु प्रतिपाद्यस्यैव नमस्कारः करणीयो न चाहं प्रतिपाद्य इत्यत आह—त्वमेव ज्ञानक्रियाशक्त्यभिमान्येव न त्वन्यत् । प्रत्यक्षं शास्त्रस्य प्रत्यक्षं स्वयंप्रकाशमानत्वेन बुद्ध्यादेः साक्षित्वेन वा । ब्रह्माव्याकृताभिमानि देशकालवस्तुपरिच्छेदशून्यस्वरूपम् । असि भवति ।

ननु यद्यहं ब्रह्म किं तवेत्यत आह—त्वामेव प्रत्यक्षं ब्रह्म कार्याभिमानिनमेव भवन्तं स्वयंप्रकाशं कारणाभिमानिस्वरूपं वदिष्यामि त्वं ब्रह्मासीति गुरुणोक्ते[2] कार्य-करणाभिमानिचैतन्ययोरैक्यमवगत्याहं ब्रह्मास्मीति वदिष्यामि कथयिष्यामि ।

नन्विदमुपचरितं मां प्रति भवतोच्यत इत्यत आह—ऋतमनुपचरितं वदिष्यामि कथयिष्यामि ।

---

१ ख. ग. कृष्णं । २ ख. °णोक्ते का° ।

ननु भवताऽनुच्चारितेऽप्युच्यमाने नैतादृशं वस्तु वृत्तमित्यत आह—सत्यम्। "इदं सर्वं यदयदात्मा" "एकमेवाद्वितीयम्" "नेह नानाऽस्ति किंचन" "तत्त्वमसि" "अहं ब्रह्मास्मि" इत्यादिशास्त्रेभ्य ऐक्यम(क्येना)वगम्यमानमबाधितं वस्तुस्वरूपमुलूकनिशावन्न ममैवेदमृतं किंतु सर्वप्रमाणसिद्धमबाधितस्वरूपमित्यर्थः। वदिष्यामि कथयिष्यामि यस्मात्तत्तस्मान्मां भवन्तं ब्रह्मरूपेण प्रतिपादयन्तमवतु कार्यकारणोपाधिभेवान्पालयतु।

ननु भवतः शिष्यस्य वाक्कायमनसां प्रसन्नानामध्यात्मादिदुःखैरनुपघातोऽस्तु गुरोश्च विपर्ययो मङ्गलाचरणे तात्पर्यहीनत्वादित्याशङ्क्य गुरुविषयेऽपि स्वयं प्रार्थयते। यस्माद्गुरुमन्तरेण न विद्या लभ्या शिष्येण तत्तस्माद्वक्तारं वा विद्यायाः कथयितारं गुरुमित्यर्थः। अवतु पालयतु। यस्मादनन्तरं तस्मादिति पठित्वा श्रौतं तच्छब्दद्वयमपि ब्रह्मपरं वा व्याख्येयम्। तच्छब्दरहितं वाक्यद्वयं गुर्वात्मनो रक्षायामादरार्थमुपक्रमविपर्ययेणाध्येति—अवतु मामवतु वक्तारं व्याख्यातम्। यद्यपि गुरुर्ब्रह्मावबोधेन ब्रह्मैव शिष्यश्च साधनचतुष्टयसंपन्नः स्वयमप्रमत्तस्तथाऽपि दैवकृतानामतिसूक्ष्माणामपराधानां भूयसां सत्त्वेनाऽऽध्यात्मिकाधिभौतिकाधिदैविकदुःखागमनाद्ब्रह्मविद्योत्पादस्य विघातः स्याच्छिष्यस्य। ततो दुःखत्रयविघातार्थं त्रिः शान्तिपदं पठति—ॐ शान्तिः शान्तिः शान्तिः। वाक्कायमनसामन्येन्द्रियाणां [च] त्रिविधमपि दुःखमुपरतिं गच्छतु ब्रह्मविद्याधिकारिणो ममेत्यर्थः।

यद्यपीतः परम् "ब्रह्मविदाप्नोति परम्" इत्येवोपक्रमणीयं तथाऽप्यत्यन्तबहिर्मुखस्य नाऽऽत्मावगतिरित्यन्तर्मुखत्वं संपादयितुं फलेन प्रलोभ्य कानिचिदुपासनानि प्रथमत उच्यन्ते। नन्वेवं चेदथातः संहिताया इत्याद्यारम्भणीयं न पुनः शीक्षामित्यादिकम्। सत्यम्। तथाऽप्युपनिषदामर्थज्ञानप्राधान्याद्यथाकथंचित्पाठेनार्थज्ञानं करणीयमितिशङ्कानिवारणार्थं शीक्षामित्यादिकं प्रथमं पठ्यते। न पुनरन्यः कश्चनोपयोगः। शीक्षां यथाऽस्मिन्नेव पदे शिक्षामित्येवं शिकार एकमात्रमु(त्र उ)च्चार्यमाणेऽर्थाधिगतिर्न पुनर्वैदिकी पाठशुद्धिः। न च वेदे तत्तद्वर्णस्वरादिहीनस्य पदस्य वाक्यस्य वोपादेयार्थो भवति। प्रत्युत इष्टार्थविनाशस्तत्तदुपनिषदामपि वेदत्वात्तत्तच्छाखापाठकप्रसिद्धवर्णस्वरादियुक्तपदाद्युच्चारणेनार्थज्ञानं करणीयमित्येतदर्थं छान्दस्या प्रक्रियया शीक्षामिति पाठः। शिक्ष्यन्तेऽनया वर्णादयः शिक्ष्यन्त इति वर्णादय एव वा शिक्षा तां शिक्षां व्याख्यास्यामो विविधमा समन्ताद्वक्ष्यं कथयिष्यामः। वर्णोऽकारादिः। स्वर उदात्तादिः। मात्रा ह्रस्वादिः। बलं प्राणस्थानप्रयत्नैः। साम समता द्रुतविलम्बितात्यधिकातिन्यू-

१ ख. °दमस्य। २ ग. °ध्यादिवि।

नादिवर्जनेनैकरूपतयोच्चारणं *व्याघ्रीपुत्रहरणवदपीडनमित्यर्थः । संतानः संततिः संहिताया नियतक्रमं पदं वाक्यं वेत्यर्थः । इतिः समाप्तौ शिक्षायाः । उक्तः कथितः शीक्षाध्यायः । शिक्षाऽधीयतेऽवगम्यतेऽनेनेति शीक्षाध्यायः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां शीक्षाध्याये प्रथमोऽनुवाक ॥ १ ॥

अथ शीक्षाध्याये द्वितीयोऽनुवाकः ।

इदानीं × देहलीप्रदीपन्यायेनोक्तवक्ष्यमाणयोः साधारणं मङ्गलाचरणं करोति शिष्यरूपो वेदः शिष्यशिक्षार्थम् । सह समं नावावयोर्गुरुशिष्ययोः । यशः, अस्यायं शिष्योऽस्यायं गुरुरित्यध्यापनाध्ययनजन्या कीर्तिरस्त्विति शेषो वक्ष्यमाणे च । सह नौ व्याख्यातम् । ब्रह्मवर्चसं ब्रह्म ब्राह्मणत्वजातिः । तदीयं तेजो ब्रह्मवर्चसम्, स्वाश्रमानुष्ठानपरौ दीर्घायुष्मन्तावावां भूयास्वेत्यर्थः । अथ शीक्षाध्यायकथनानन्तरम् । अतः कृतमङ्गलानामपि नान्तर्मुखत्वमन्तरेण ब्रह्मज्ञानोत्पत्तिरस्मात्कारणात् । संहिताया नियतक्रमपदवाक्यरूपायाः । उपनिषदं सामीप्येन नितरामिष्टार्थगमकत्वादनिष्टस्य शिथिलीकृत्य विनाशकारित्वाच्च तद्विषया बुद्धिरुपनिषत्ताम् । व्याख्यास्यामो व्याख्यातम् । पञ्चसु पञ्चसंख्याक्रान्तेषु । अधिकरणेष्वाधारेषु । अधिकरणान्याह—अधिलोकं लोकमधिकृत्य । अधिज्यौतिषं ज्योतिरधिकृत्याधिज्योतिरधिज्योतिरेवाधिज्यौतिषम् । आधिविद्यं विद्यामधिकृत्य । अधिप्रजं प्रजां पुत्रादिसंततिमधिकृत्य । अध्यात्ममात्मानं शरीरमधिकृत्य । ता अधिलोकाद्याः । महासंहिताः पदवाक्यसंहितासु चिन्त्यमाना महत्यः संहिता महासंहिताः । इति, अनेन प्रकारेण आचक्षत आ समताद्वचक्तं कथयन्ति संहिताविदः ।

अथ तासां महासंहितात्वकथनानन्तरम् । अधिलोकं व्याख्यातम् । संहिताया उपनिषदं व्याख्यास्याम इतीदमत्र वक्ष्यमाणेष्वपि चतुर्षु पर्यायेष्वनुवर्तते । पृथिवी प्रसिद्धा भूः । पूर्वरूपं पूर्वस्य पूर्ववर्णस्य रूपं स्वरूपम् । पूर्ववर्णे पृथिवीदृष्टिः करणीयेत्यर्थः । द्यौः स्वर्गलोक उत्तररूपमुत्तरवर्णस्य, स्वरूपमुत्तरवर्णे स्वर्गलोकदृष्टिः करणीयेत्यर्थः । आकाशोऽन्तरिक्षलोकः संधिर्भूस्वर्गलोकौ संधीयेते अस्मिन्निति संधिर्मध्यम् । पूर्वोत्तरवर्णयोरन्त-

* वर्णानामिति शेषः । यथा व्याघ्री स्वापत्यानि मुखे धृत्वा दशनाभिघातमप्यकृत्वैव स्थलात्स्थलान्तरं नयति तथा स्थानादिषु पीडनमकृत्वैव वर्णोच्चारणं सामशब्देन गृह्यत इति भावः ।

× देहली गृहद्वाराग्रप्रदेशः । तत्र निहितो दीपो द्वारान्तः प्रदेशं तद्बाहिर्भूतं चत्वरं च प्रका-

त्ताले‌ऽन्तरिक्षदृष्टिः करणीयेत्यर्थः। वायुर्जगत्प्राणस्त्रिलोक्युदरवर्ती संधानं संधीयेते पूर्वोत्तरे रूपे अनेनेति संधानं संबन्ध इत्यर्थः। पूर्वोत्तरवर्णयोः संबन्धे वायुदृष्टिः करणीयेत्यर्थः। यथा—इषे त्वेत्यत्र षकारस्योपरि योऽयमेकारः सोऽयं पृथिवीरूपो यश्चोपरितनस्तकारोऽसौ द्युलोकात्मकस्तयोर्वर्णयोर्मध्यदेश आकाशात्मकस्तस्मिन्देशे संहितानिमित्तो द्विर्भावेनाऽऽपादितो योऽन्यस्तकारः स वाय्वात्मक इति ध्यायेत्। एवमुत्तरेष्वप्युपास्यावयवेषु चतुर्षु योज्यम्। इतिः समाप्त्यर्थः प्रकृतोपनिषदः। प्रकृतामुपनिषदमाह—अधिलोकं व्याख्यातम्।

अथ चतुष्टयमपि स्वापेक्षया पूर्वोपासनानन्तर्यमाह। अग्निर्भौमः। आदित्यश्चन्द्र(त्यः सूर्य१)मण्डलम्। आपो नीराणि। विद्युत एव वैद्युतोऽचिरप्रभवः(भः)। आचार्यो गुरुः। अन्तेवासी शिष्यः। विद्याऽऽचार्येणोच्यमाना। प्रवचनं गुरुशिष्ययोः प्रकर्षेणोच्चारणं विद्यायाः। माता जननी। पिता जनकः। प्रजा पुत्रादिः। प्रजननमुत्पत्तिः प्रजायाः। अधरा हनुरधरोष्ठमारभ्य चिबुकफलकाक्रान्ता। उत्तरा हनुरुत्तरोष्ठमारभ्याऽऽनासामूलम्। वाग्वर्णोच्चारणशक्तं ताल्वादिस्थमिन्द्रियम्। जिह्वा प्रसिद्धा। अन्यत्पर्यायचतुष्टयेऽप्यन्त्यं पदं मुक्त्वा समानपाठं पूर्ववद्व्याख्येयम्। इतिर्महासंहितापरिसमाप्त्यर्थः। इमा अधिलोकाद्या महासंहिता व्याख्याताः।

इदानीं पञ्चानामपि फलमाह—योऽधिकारी। एवं पूर्वोत्तररूपेणैता अधिलोकाद्या महासंहिता व्याख्याता विविधमा समन्ताद्व्यक्तं कथिता वेद जानात्युपासीतेत्यर्थः। संधीयते संबध्यते। प्रजया पुत्रादिलक्षणया। पशुभिर्गवादिभिः। ब्रह्मवर्चसेन ब्राह्मणजात्युचितेन तेजसा। अन्नाद्येन, अन्नं च तदाद्यं चान्नाद्यं तेन व्रीहियवादिनेत्यर्थः। सुवर्ग्येण स्वर्गेण लोकेन कर्मफलेन। प्रजादिभिः संपन्नो भवतीत्यर्थः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां शीक्षाध्याये द्वितीयोऽनुवाकः॥ २॥

अथ शीक्षाध्याये तृतीयोऽनुवाकः।

अथ यः कश्चन दुर्मेधा नासौ मेधोत्पादनमन्तरेण ब्रह्म बोद्धुं शक्त इति मेधाकामस्य मेधाकराञ्जपमन्त्रानाह—यः प्रसिद्ध ओंकारश्छन्दसां गायत्र्यादिच्छन्दस्विनामृगादिभेदानामृषभः श्रेष्ठः। विश्वरूपः सर्वरूपः पर्णेष्विव शङ्कुः सर्वस्मिञ्जगति व्यवस्थित इत्यर्थः। छन्दोभ्य उक्तेभ्य ऋगादिभ्यः। अधि, अधिकः। सर्वव्यापकत्वात्। अमृतात्स्वयं(प्र)काशमानात्मनः। संबभूवोत्पत्तिमकरोत्। छन्दोभ्योऽमृता-

१ क. ग. 'फलका'।

दिभिः सामानाधिकरण्याकारेणाधिकः सम्प्रवर्तत इति व्याख्येयम् । सोऽमृतज-न्छन्दःसारभूतः । मा माम् । इन्द्र इन्द्रस्य परमात्मनो वाचकत्वादिन्द्रः । मेधया श्रुतधारणशक्त्या । स्पृणोतु प्रीणयतु । मेधासंपन्नं करोत्वित्यर्थः ।

मेधासंपत्तेः फलभूतामाशिषमाह—अमृतस्य तज्जनकस्य ब्रह्मणोऽहं तदस्मीति तादात्म्येन । देव हे देव । स्वयंप्रकाशस्याऽऽत्मनः प्रकाशकत्वेन धारणो धारयिता भूयासं भवानि । मेधाप्राप्तेरपि शरीरारोग्यादिकमन्तरेणाभावादत(वोऽत)स्तदपि प्रार्थयते—शरीरं स्थूलो विनाशी देहः । मे ममाधिकारिणः । विचर्षणं विचक्षणं नीरोगमित्यर्थः । भूयादिति पुरुष[वि]परिणामेनात्र वक्ष्यमाणे चानुषङ्गः । जिह्वा वागिन्द्रियाधारभूता मे ममाधिकारिणः । मधुमत्तमा जिह्वाया मधुत्वं प्रियहितसत्यभाषित्वं वेदायतनं तद्यस्या अस्ति सा मधुमती । अतिशयेन मधुमती मधुमत्तमा । कर्णाभ्यां श्रोत्राभ्याम् । भूरि बहु । विश्रुवं व्यशृणवमात्मसाक्षात्कारार्थं न श्रवणमस्तीत्यर्थः ।

इदानीमोंकारस्यात्यन्तं ब्रह्मसामीप्यमाह—ब्रह्मणः सत्यज्ञानादिलक्षणस्य कोशः खड्गस्येव व्याप्य व्यवस्थित आवरणविशेषः । यथा कोशः खड्गेन संभृत एवं ब्रह्मणा संभृतः प्रणवः । असि भवसि । एवंभूतोऽप्यविद्यादृष्टिभिर्नावगन्तुं शक्यत इत्याह—मेधया लौकिकश्रुतधारणया बुद्ध्या । पिहित आवृतः । यस्मादेवंगुणकस्ततस्त्वं श्रुतम् “ इदं सर्वं यदयमात्मा ” “ अहं ब्रह्मास्मि ” इत्यादिश्रवणपथमागतम् । मे ममाधिकारिणः । गोपाय रक्षां कुरु । आत्मसाक्षात्कारफलावसानं कुर्वित्यर्थः ।

मेधाविषयेऽर्थानुसंधानपुरःसरं मन्त्रजपमुक्त्वा मेधावतोऽपि बहिर्मुखस्य निःश्रीकस्य न प्रत्यक्प्रवणता । ततः श्रीकामस्य श्रीकरान्मन्त्रान्प्रणवप्रतिपादकान्सहोमलिङ्गानाह—आवहन्ती । समन्तात्प्रापयन्ती । वितन्वाना विविधं विस्तारयन्ती । कुर्वाणा कुर्वती । चीरमनेककालम् । अचीरमिति पदच्छेदे क्षिप्रमिति व्याख्येयम् । आत्मनः स्वस्याः श्रियोऽवस्थानमिति शेषः । वासांसि वस्त्राणि । ममास्यार्थिनः । गावश्च प्रसिद्धाः । चकारोऽश्वादीनामनुक्तानां समुच्चयार्थः । अन्नपाने च, अद्यत इत्यन्नं पीयत इति पानमन्नं च पानं चान्नपाने । चकार उक्तवासोगवान्नपानसमुच्चयार्थः । सर्वदाऽधार-स्याऽऽत्मसाक्षात्कारम् । आत्मनश्चिरं कुर्वाणा वासआदिकं सर्वदा वहन्ती वितन्वाना च मम गृहेऽवस्थानं करोत्विति शेषं पूरयित्वा व्याख्येयम् ।

नन्वहं मेधया दाता कथं श्रियो दातेत्यत आह—तत इति । यतो मेधाया दाता तस्मात् । अयं भावः—श्रीः प्राकृतैरपि राजादिभिर्दातुं शक्या । मेधा तु भगवन्तमन्तरेण ब्रह्मणः कोशं[विना] न केनचिद्दातुं शक्या । ततोऽतिदुर्लभस्य मेधादेर्दातुर्ब्रह्मणः कोशस्योंकारस्य कियाञ्श्रीदानार्थमुद्यमः । मे मम श्रीकामस्य । श्रियं मद्गृहे यामात्मनश्चिरमवस्थानं कुर्वाणामन्नपानवस्त्रादीन्प्रापयन्तीं तामेव विस्तारयन्तीमावह प्रापय । लोमशामजादिलोम-

मिर्लोमवतीं चेतनमण्डलबहुलामित्यर्थः । पशुभिर्गवाश्वादिभिः सह समम् । स्वाहा मदीया वाक्स्वशब्दवाच्यां श्रियमावहे ति यामाह तां स्वाहैव स्वाहा । स्वाहेति दर्शनाद्धोमार्थताऽस्य मन्त्रस्य वक्ष्यमाणानां चावगम्यते । होमद्रव्याणि च स्वस्वगृह्येष्ववगन्तव्यानि । मन्त्रेण स्वस्थानि (?) क्षीरज्यबिल्वादीनि वा । प्रणवात्मा च देवताऽन्यादिकं तु यथायोगमवगन्तव्यम् ।

आ मा मां श्रीकामं यन्त्वायन्त्वत्राऽऽगच्छन्तु । ब्रह्मचारिणोऽध्ययनार्थिनो माणवकाः सर्वासु दिक्ष्ववस्थिताः । स्वाहा व्याख्यातम् । ब्रह्मचारिणामागमने प्रयोजनमाह-यशः । अत्र धर्मशब्देन धर्मो लक्षितो भवति । यशस्वी । जने लोके । असानि भवानि । स्वाहा व्याख्यातम् । अत्रापि प्रयोजनमाह-श्रेयानतिशयेन प्रशस्यः । वस्यसो वस्युमन्त(सुमत्त)रात्सकाशात् । वसु चात्र दैवं मानुषं [वा] वित्तम् । असानि भवानि । स्वाहा व्याख्यातम् । तत्रापि प्रयोजनमाह—तं ब्रह्मणः कोशभूतम् । त्वा त्वामोंकारम् । भग समग्रधर्मज्ञानवैराग्यैश्वर्ययशःश्रीणां निवासभूत ओंकारो ब्रह्मकोशो भगस्तत्संबोधनं हे भग प्रविशानि प्रवेशं करवाणि । स्वाहा व्याख्यातम् ।

ननु यदि मत्प्रविष्टस्त्वं तर्हि मत्तो भिन्नः समुद्रं प्रविष्टः समुद्रादिव भिन्नो मत्स्यस्तथा च तद्वदेव भवतो न कोऽपि पुरुषार्थ इत्यत आह—स मया प्रवेष्टव्यो ब्रह्मणः कोशभूतो भवानोंकारः । मा मां तादात्म्येन त्वदुपासकम् । भग प्रविश स्वाहा प्रवेशं कुरु । आवयोरनुपचरितं तादात्म्यमस्त्वित्यर्थः । व्याख्यातमन्यत् ।

ननु—त्वं कर्ता भोक्तेत्यादिसंसारधर्मवान्मयेश्वरेण कथमभिन्नः स्या इत्यत आह—तस्मिन्मदभिन्न ओंकार ईश्वरे । सहस्रशाखे सहस्रमनन्ताः शब्दार्थात्मनो वृक्षस्य भवतः शब्दार्थविवर्तरूपाः शाखा यस्य स सहस्रशाखस्तस्मिन् । नि भग हे भग । नेर्मृजिना संबन्धः । अहं वस्तुतस्त्वदभिन्न इदानीमविद्यापटलपिनद्धाक्ष उपासकः । त्वयि शब्दार्थरहित ओंकारे ब्रह्मणि "अहं ब्रह्मास्मि" इति बोधेन मृजे निमार्ज्मि कर्तृत्वादिकमविद्याकृतं न वस्तुत इति ज्ञानेनाऽऽत्मानं परिशोधयामीत्यर्थः । स्वाहा व्याख्यातम् ।

तथा च ब्रह्मचारिणामागमनं परम्परया मोक्षहेतुरित्युक्त्वेदानीं तदेव दृष्टान्ताभ्यां मन्त्रान्तरेण विशिनष्टि—यथा येन प्रकारेण । आपो नीरधाराः । प्रवता उच्चादेशात्पतन्त्यो निम्नदेशगामिन इत्यर्थः । प्रवतेति तृतीयापक्षे प्रवणवता मार्गेणेति व्याख्येयम् । यन्ति निम्नदेशं गच्छन्ति । अपां सेत्वादिना प्रतिबन्धो

---

१ ग, 'धोम्यम' ।

दृष्टस्ततो दृष्टान्तान्तरमाह—यथा दृष्टान्ते । मासाः पक्षद्वयात्मकाश्चैत्रादयः । अह. र्जरमहानि जरयति स्वकुक्षिनिक्षेपेण यः संवत्सरस्तम् । यन्तीत्यनुवर्तते । एवं दार्ष्टा. न्तिके मां श्रीकामम् । ब्रह्मचारिणश्छात्राः । धातः, हे धातः सर्वस्रष्टृत्वात्प्रणवस्य धातृत्वम् । आयन्त्वागच्छन्तु । सर्वतः सर्वाभ्यो दिग्भ्यः । स्वाहा व्याख्यातम् ।

नन्विदं सर्वं मत्तादात्म्यार्थं मम तव कः संबन्ध इत्यत आह—प्रतिवेशः स्वगृह. समीपस्थं गृहं प्रतिवेशः । तद्वच्चैतन्यरूपेण जीवोपाधेरतिसंनिहितत्वात्प्रणवश्चैतन्यात्मा प्रतिवेशः । असि भवसि । यतस्ततः प्र मा मां त्वदुपासकम् । भाहि प्रभाहि प्रकाशयाऽऽत्मानम् । प्र मा पद्यस्व प्रपद्यस्व । अहं ब्रह्मास्मीति साक्षात्कारबोधेन मद्रूपमागच्छेत्यर्थः । अत्र स्वाहान्ता अष्टौ मन्त्राः । एतैः सर्वैर्मन्त्रैरेकादशसंख्याकैरष्टभिः पाठ एव । स्वाहान्तैस्त्रिभिश्च होमार्थं स्वाहान्तत्वेन पठित्वा होमः करणीयः । जपस्तु यथापाठपठितैरित्यवगन्तव्यम ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां शिक्षाध्याये तृतीयोऽनुवाकः ॥ ३ ॥

अथ शीक्षाध्याये चतुर्थोऽनुवाकः ।

पूर्वमोंकारस्य सहस्रशाखत्वमुक्तं तदेतत्प्रधानशाखासु सिद्धासु प्राधान्यं च भूरादिव्या. हृतीनामस्मिन्प्रपञ्चे । ततो व्याहृतयो हृदिस्थाः । तासूपासनं स्वाराज्यफलमाह- भूर्भूर्लोकः, तत्स्थः प्रपञ्चो भूरितिशब्दाभिधेयः । भुवोऽन्तरिक्षलोकः । तत्स्थः प्रपञ्चो भुव इत्यु. च्यते । सुवः स्वर्गः, तत्स्थः प्रपञ्चः सुवरित्युच्यते । इत्यनेन प्रकारेण । वै स्मर्य. माणाः । एता इदानीमुक्ताः । तिस्रस्त्रिसंख्याका वेदत्रयात्मिकाः । व्याहृतयः, अधि. कारिष्टं विविधमा समन्ताद्धरन्ति प्रयच्छन्त्यधिकार्यनिष्टं वा विविधमा समन्ताद्धरन्ति विनाशयन्तीति व्याहृतयः । तासां भूर्भुवः सुवरिति तिसृणाम् । उ अपि ह किल । स्म प्रवेदयत इत्यनेन संबध्यते । एतां वक्ष्यमाणां चतुर्थीं चतुःसंख्यापूरणीम् । माहा- चमस्यो महांश्चासौ चमसोपलक्षितानेकयागसंपन्नश्च महाचमसस्तस्यापत्यं माहाचमस्यः । प्रवेदयते प्रकर्षेण निवेदितवाञ्ज्ञात्वोक्तवानित्यर्थः । ऋषेरनुस्मरणमुपासनार्थमिति संप्र' दायविदः । तामाह—महस्तेजः स्वयंप्रकाशम् । इत्यनेन प्रकारेण । आवेदने कः प्रकर्ष इत्यत आह—तन्महः । ब्रह्म देशकालवस्तुपरिच्छेदशून्यम् । तस्मिन्नियं दृष्टिः कर' णीयेत्यर्थः । यद्ब्रह्मेत्युक्तं स प्रसिद्धो वक्ष्यमाण आत्माऽस्मत्प्रत्ययालम्बनः । प्रधानभूत

---

१ ग. सर्वमेतत्ता° । २ ग. ऋषेः स्म° ।

इत्यर्थः । अङ्गान्युपासनेनभूतानि । अन्या भूराद्या देवता व्याहृत्यविष्ठान्यः । अहं महो ब्रह्मरूपमस्मि । मम भूराद्या व्याहृतिदेवता अङ्गानीत्युपासनं करणीयमित्यर्थः ।

ननु भूरादिषु शब्देषु का देवता इत्याशङ्क्य व्याहृतीनामर्थमाह—भूः प्रथमा व्याहृतिः । इतिरनुकरणार्थः । वै स्मरणार्थम् । अयं प्रत्यक्षो लोको भूर्लोकः । भुव इत्यन्तरिक्षम् । सुवरित्यसौ लोकः । अन्तरिक्षं द्यावाभूम्योरन्तरालस्थो लोकः । असौ परोक्षो लोकः स्वर्गलोकः । भुवः स्व(सुव)रिति व्याहृतिपर्यायद्वयेऽपीतिशब्दावनुकरणार्थौ । महश्चतुर्थी व्याहृतिः । इतिरनुकरणार्थः । आदित्यश्चन्द्र (त्यः सूर्य?) मण्डलाभिमानी जगत्प्राणः । आदित्यस्य महाव्याहृत्यात्मनोपास्यमानस्य महत्त्वमुपपादयति । आदित्येन वावाऽऽदित्येनैव सर्वे निखिला लोका भूरादयोः महीयन्ते पूज्यन्ते । सर्वव्यवहारक्षमा भवन्तीत्यर्थः ।

इदानीं व्याहृतीनां ज्योतिर्वायुरूपतामाह—भूरिति वा अग्निः । भुव इति वायुः । सुवरित्यादित्यः । मह इति चन्द्रमाः । चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते । अग्निवाय्वादित्यचन्द्रमसः प्रसिद्धाः । एतेभ्यो व्यतिरिक्तानि सर्वाणि ज्योतींषि नक्षत्रादीनि । अग्न्यादीनां सर्वब्रह्मान्तःपातित्वेनैषां देवरूपत्वेन चन्द्रमस उपभोगेन तेन महीयमानत्वमविरुद्धम् । वायोश्च तेजःसाक्षात्कारणत्वाज्ज्योतिस्त्रयसाहित्येन पाठो न विरुद्धः । अन्यत्पर्यायचतुष्टयेऽपि पूर्ववद्व्याख्येयम् ।

इदानीं व्याहृतीनां शब्दप्रपञ्चात्मकत्वमाह—भूरिति वा ऋचः । भुव इति सामानि । सुवरिति यजूंषि । मह इति ब्रह्म । ब्रह्मणा वाव सर्वे वेदा महीयन्ते । अर्थानुसारेण पादबद्धाक्षरा ऋचः । सामानि ऋच एव गीतिमत्यः । यजूंष्यविवक्षितच्छन्दोरूपाणि गद्यानि । अत्र साम्नो द्वितीयत्वे यजुषस्तृतीयत्वे च वाचनिकं कारणमास्थेयम् । अथवाऽन्तरिक्षे गन्धर्वाणां निवासत्वेन गीतिप्राधान्यात्तत्साम्येन साम्नो द्वितीयत्वम् । यजुःस्थितकर्मसाध्यत्वात्स्वर्गस्य तत्कर्मसंबन्धाद्यजुषस्तृतीयत्वं चेति । ब्रह्मोंकारो ब्रह्मकोशत्वात्तेनैव सर्वे ऋगादयः पूज्यमाना दृष्टाः । शेषं पर्यायचतुष्टयेऽपि पूर्ववद्व्याख्येयम् ।

इदानीं व्याहृतीनां क्रियात्मकत्वमाह—भूरिति वै प्राणः । भुव इत्यपानः । सुवारिति व्यानः । मह इत्यन्नम् । अन्नेन वाव सर्वे प्राणा महीयन्ते । प्राण उच्छ्वासकर्मा । अपानो निःश्वासकर्मा । व्यानः प्राणापानसंधिस्थो वीर्यवत्कर्महेतुः । अन्नमदनीयम् । अनेन प्राणा उक्ताश्चक्षुरादयश्च । शेषं पर्यायचतुष्टयेऽपि पूर्ववद्व्याख्येयम् । अयं लोक इत्यादिकमुक्तं व्याहृतिचतुष्टयपर्यायचतुष्टयेऽपि । पाठस्य वैषम्याभावात् । तत्राऽऽद्येन पर्यायेण रूपनामकर्मात्मकं जगत्त्रेधा विभज्य रूपनामकर्मणाम-

१ ख. शब्दात्म' । २ ग. 'तेन च स' ।

विभक्तानामादित्यः कारणमित्युक्तम्। नामक्रियारहितस्य रूपस्य त्रेधा विभक्तस्य चन्द्रः कारणमिति द्वितीयेनोक्तम् । रूपक्रियारहितस्य नाम्नस्त्रेधा विभक्तस्य प्रणवः कारणमिति तृतीयेनोक्तम् । रूपनामरहितस्य कर्मणस्त्रेधा विभक्तस्यान्नं कारणमिति चतुर्थेनोक्तम् । तेन व्याहृतीनां सर्वात्मकत्वं सिद्धम् ।

तदिदानीं संक्षेपेणाऽऽह—ताः प्रसिद्धाः । वै स्मर्यमाणाः । एताः पूर्वोक्ता व्याहृतयः । चतस्रो भूर्भुवः सुवर्मह इति चतुःसंख्याकाः । चतुर्धाऽयं लोकोऽग्निर्ऋचः प्राण इति चतुष्प्रकारा भूर्व्याहृतिः । अन्तरिक्षं वायुः सामान्यपान इति चतुष्प्रकारा भुवो व्याहृतिः । असौ लोक आदित्यो यजूंषि व्यान इति चतुष्प्रकारा सुवर्व्याहृतिः । आदित्यश्चन्द्रमा ब्रह्मान्नमिति चतुष्प्रकारा महोव्याहृतिरिति चतस्रश्चतुष्प्रकाराः । तदेतदाह—चतस्रश्चतस्रो भूराद्याश्चतस्रश्चतुःसंख्याकाः । पुनरप्ययं लोक इत्यादिनैकैकाऽप्यवान्तरभेदाच्चतुःसंख्याकाः । व्याहृतयो व्याख्याताः । ता एकैकाश्चतुष्प्रकारा इत्युक्ता भूराद्या नियतप्रकारा य उपासको वेद जानात्युपासीतेत्यर्थः । स प्रत्येकं नियमेन चतुर्विध्येन चतसृणामात्माङ्गभावेनोपासको वेद जानात्युपास्त इत्यर्थः । ब्रह्म देशकालवस्तुपरिच्छेदशून्यं महाव्याहृत्यात्मत्वेनोक्तम् । ब्रह्मणि ज्ञाते को लाभ इत्यत आह—सर्वे निखिला अस्मै महो ब्रह्माहमादित्यश्चन्द्रमा ब्रह्मान्नमङ्गीभूतो महीयान्यङ्गानि भूराद्यास्तिस्रो व्याहृतय इत्युपासकाय देवास्तदङ्गभूता अग्न्यादयो वागादयश्च विश इव राज्ञे प्रधानाय बलिं तदभीष्टरूपरसादिकम् । आवहन्त्यानीय प्रापयन्ति ।

[इति श्रीमत्परमहंस० तैत्तिरीयोपनिषद्दीपिकायां चतुर्थोऽनुवाकः ॥ ४ ॥
अथ शीक्षाध्याये पञ्चमोऽनुवाकः ।]

ननु महो ब्रह्मात्मा कुत्र कथमुपास्यते उपासनातः केन द्वारेण निर्गच्छति निर्गतो वा केन रूपेण कुत्र स्थित्वा देवदत्तं बलिं गृह्णातीत्याशङ्क्य तदेतत्सर्वं दर्शयति—स परोक्षः । यः प्रसिद्धः । एष प्रत्यक्षः । अन्तर्हृदये हृदयस्य पद्माकारस्य मांसखण्डस्याधोमुखस्योर्ध्वनालस्य पञ्चच्छिद्रस्य कदम्बकुसुमकेसरैरिव सर्वतो नाडीभिः परिवृतस्य मध्य आकाशोऽवकाशः । तस्मिन्नाकाशेऽयं प्रत्यक्षः स्वयंप्रकाशमानो महाव्याहृत्यात्मकः पुरुषः पुरिशयोऽपि परिपूर्णब्रह्मरूपो मनोमयो मनःप्रधानः । अमृतो मरणशून्यः । हिरण्मयो भास्करः सर्वज्ञ इत्यर्थः ।

कुत्र कथमुपास्य इत्यनयोरुत्तरं जातम् । अथ केन द्वारेण निर्गच्छतीत्यस्योत्तरमाह—अन्तरेण तालुके तालुकयोर्मध्ये । मुखबिलस्यान्तर्जिह्वामूलस्योपरि स्थितौ वामदक्षिणभागौ तालुके इत्युच्येते । यः प्रसिद्धो योगशास्त्रे । एष प्रलम्बिकाकरणप्रवीणजिह्वाग्रस्पर्शनप्रत्यक्षः परमुखे चक्षुष्प्रत्यक्षो वा । स्तन इव वत्सतरीपयोधरो यथा । अवलम्बतेऽ-

१ ग. °स्यमानः के° ।

वलम्बनं कुरुते लम्बमानस्तिष्ठतीत्यर्थः । सा तालुकयोरन्तस्थस्तनमध्यवर्तिनी । इन्द्रयो- निरिन्द्रस्याऽऽनन्दात्मनो योनिरुपलब्धिस्थानम् । कार्यब्रह्मप्राप्तौ निर्गमनकारणं चेन्द्र- योनिः । यत्र यस्मिन्प्रदेशे । असौ प्रसिद्धः । केशान्तो मूर्धानमारभ्योपरिष्टाद्दशाङ्गुल- परिमितो देशः । केशान्तः, कश्चाश्चेशश्च केशा ब्रह्मविष्णुमहेश्वरास्तेषामन्तो विनाश- [१]कारणमित्यर्थः । केशान्तः पौरुषो बोध इत्यर्थः । विवर्तते बोधरूपापरित्यागेनासत्यस्य नानाकारस्य शरीरत्रयस्य साधिदैवादेस्तदभिमानादेश्चाऽऽकारेण परिणमते । अथवा केशानां प्रसिद्धानामन्तो न भावो(?) मूलमित्यर्थः । यस्मिन्देशे विशेषेणं वर्तते व्यपोह्य भित्त्वा । शीर्षकपाले शीर्ष्णो मूर्ध्नः कपाले शकले । विनिर्गता या नाडीति शेषः । य एष स्तन इवावलम्बते तन्मध्यवर्तिनी यत्रासौ केशान्तो विवर्तते तत्र प्रतिष्ठितास्तीति शेषः । तत्रोपपत्तिर्व्यपोह्य शीर्षकपाले विनिर्गता या सेन्द्रयोनिरित्यन्वयः । अनया कार्यं ब्रह्म गच्छन्गच्छतीत्यर्थः । अनेन गमने मार्ग उक्तः ।

इदानीं तत्तद्व्याहृत्यात्मकस्तेषु तेषु व्याहृतिप्रकारेषु स्थित्वा देवदत्तं गृह्णन्नध्यात्मप- रिच्छेदशून्यः स्वाराज्यं करोतीत्याह—भूरिति, उक्तोऽर्थो व्याहृतेः । इतिशब्दश्च व्याह- त्यनुकरणार्थः । अग्नौ प्रथमव्याहृत्यात्मके । प्रतितिष्ठति प्रतिष्ठां प्राप्नोति । इदं पदं वक्ष्यमाणेष्वपि त्रिषु पर्यायेषु योजनीयम् । भुव इति व्याख्यातम् । वायौ द्वितीय- व्याहृतिरूपे । सुवरिति । व्याख्यातम् । आदित्ये तृतीयव्याहृतिरूपे । मह इति व्या- ख्यातम् । ब्रह्मणि कार्ये ब्रह्मण्यन्तःकरणशुद्धौ ब्रह्मज्ञानोत्पादात्परे ब्रह्मणि वा । अत्र यद्यपि मह इति चन्द्रमसीति वक्तव्यं प्रायःपाठात्तथाऽप्युपास्याङ्गाङ्गिजातं सर्वं व्याप्नो- तीत्येतद्दर्शयितुमनास्थावादेन चन्द्रमसं परित्यज्य मह इति ब्रह्म तद्ब्रह्मेति वोररीकृत्य मह इति ब्राह्मणीत्याह ।

व्याहृत्युपासनामात्रान्निर्गुणब्रह्मप्राप्तिरितिशङ्कानिवारणार्थमाह—आप्नोति प्राप्नोति । स्वाराज्यं स्वयमेव राजते दीप्यत इति स्वराट् तस्य भावः स्वाराज्यम् । ननु केवलब्र- ह्मप्राप्तिरप्येतादृश्येवेत्यत आह—आप्नोति प्राप्नोति । मनसस्पतिं मनःशब्दोपलक्षि- तस्य ज्ञानक्रियाशक्तेरन्तःकरणस्य पतिं पालयितारम् । स्वोपाधिकत्वाभिमानेन हिरण्य- गर्भमित्यर्थः । तं प्राप्य क्रियाज्ञानकरणानां तद्वत्प्रभुर्भवतीत्याह—वाक्पतिर्वागिति कर्मेन्द्रियमात्रस्योपलक्षणम् । वाचः पतिर्वाक्पतिः । चक्षुष्पतिः श्रोत्रपतिः स्पष्टम् । चक्षुःश्रोत्रयोर्ग्रहणं त्वग्घ्राणरसनानामुपलक्षणार्थम् । विज्ञानपतिर्विज्ञानं बुद्धिस्तस्य पतिर्विज्ञानपतिः । विज्ञानशब्दोऽव्याकृतव्यतिरिक्तस्य सर्वस्योपलक्षणार्थः ।

---

१ ख. °र्थः । केशान्तं वि° । २ ग. °ण प्रव° । ३ ग. °षः । यः स्त° । ४ ख. °त्याद- मप° । ५ ग. °ति चोर° ।

अपेक्षितं सर्वमप्युक्त्वेदानीं 'महो ब्रह्म तस्मिन्नयं पुरुषः' इत्यादिनोपास्यत्वेनोक्तं यदुत्पन्नब्रह्मज्ञानैः प्राप्यमङ्गीभूतं वक्तुमारमते संक्षेपेण प्राचीनयोग्यस्य पितृरूपा श्रुतिः स्वपुत्रस्योपासनार्थम् । एतद्देतस्मिन्व्याहृत्युपासने प्रधानभूतम् । ततो भवति तस्मात्कारणाद्भवति । उक्तमिति शेषः । आकाशशरीरमाकाशोऽव्याकृतं शरीरमिव स्वं यस्य तदाकाशशरीरम् । ब्रह्म तद्ब्रह्मोति, महाव्याहृत्यभिन्नं यदुक्तं देशकालवस्तुपरिच्छेदशून्यम् । सत्यात्म सत्यो बाधरहित आत्मा चिदानन्दस्वभावो यस्य तत्सत्यात्म । प्राणारामं प्राणेष्वारमत इति प्राणारामं सर्वप्राणिस्थितमित्यर्थः । तटस्थत्वशङ्कां वारयति—मनआनन्दं मनस आनन्दो यस्य तन्मनआनन्दम् । तर्हि दुःखीत्याशङ्क्याऽऽह—शान्तिसमृद्धं शान्तिर्दुःखोपरतिस्तया समृद्धं संपन्नं सर्वदुःखशून्यमित्यर्थः ।

नन्वस्तु सर्वतोत्कृष्टं तथाऽपि सर्वभेदान्मरणमप्यस्त्येवेत्यत आह—अमृतं मरणशून्यम् । यद्भेदादन्यस्यापि मरणमपगच्छति कुतोऽस्य कालकालस्य मरणमित्यर्थः । इत्यनेन प्रकारेण तदहमस्मीत्यवगन्तुमशक्तश्चेत्प्राचीनयोग्य प्राचीनेषु पुरातनेषु काश्यपादिषु योग्योऽधिकः प्राचीनयोग्यः सर्वेभ्य उत्कृष्ट इत्यर्थः । तस्य संबोधनं प्राचीनयोग्य । उपास्स्व "महोव्याहृतिरूपमिदमहमस्मि ममाङ्गानीतरा यथोक्ता व्याहृतयः" इति शाखान्तरप्रसिद्धं वा "मनोमयः प्राणशरीरः" इत्यादिरूपं व्याहृत्युपासनाव्यतिरिक्तमुपास्स्व विजातीयप्रत्ययशून्येन सजातीयप्रत्ययप्रवाहेण यथोक्तधर्मं साक्षात्कुर्वित्यर्थः । अथवा को हिरण्यगर्भप्राप्तौ पुरुषार्थ इत्याशङ्क्य व्याख्येयम् । ततो हिरण्यगर्भप्राप्तेरनन्तरमुत्पन्नब्रह्मज्ञान एतद्वक्ष्यमाणं ब्रह्म भवति । अस्मिन्पक्ष इत्यारभ्य प्राचीनयोग्यपितुर्वाक्यं द्रष्टव्यम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां शीक्षाध्याये पञ्चमोऽनुवाकः ॥ ५ ॥

अथ शीक्षाध्याये षष्ठोऽनुवाकः ।

चतसृणां व्याहृतीनामुपासन उक्ते तदनन्तरभाविनीं पञ्चसंख्यामुररीकृत्य पञ्चभूतात्मकविराट्प्राप्तिफलं पाङ्क्तमुपासनमाह—पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरादिशः, स्पष्टाः पृथिव्यादयः पञ्च पदार्थाः । त्रिलोकी प्राच्यादयश्चतस्र आग्नेय्यादयश्चेति पञ्चकं लोकपाङ्क्तम् । अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि, स्पष्टा अग्न्यादयः पञ्च पदार्थाः । इदं देवतापाङ्क्तम् । आपो नीराणि । ओषधयो व्रीह्याद्याः । वनस्पतयोऽपुष्पाः

---

१ ग. 'ब य' । २ ख. 'बाधार । ३ क. 'कालस्य । ४ ग. 'तिपदमि' ।

फलवन्तोऽश्वत्थादयः । आकाशो भूताकाशः । आत्मा भौतिको देहोऽपि दैवादिः । इतिः समाप्तौ । अधिभूतं भूतानि पृथिव्यादीन्यधिकृत्योच्यमानमधिभूतम् । लोके देवानामपि भूतविकारत्वेन भूततत्त्वमङ्गीकृत्याधिभूतमित्युपसंहारः ।

अथाधिभूतपाङ्क्तकथनानन्तरम् । अध्यात्ममात्मानमिमं स्थूलदेहमधिकृत्य पाङ्क्तमुच्यत इति शेषः । प्राण उच्छ्वासकर्मा क्षुत्तृडधिकारी । व्यानः प्राणापानयोः संधिस्थो वीर्यवत्कर्महेतुः । अपानो निःश्वासकर्मा मलमूत्रादिविसर्गहेतुः । उदानः सर्वसंधिषु कीलवदवस्थितः । तच्चलने हिक्कादिः प्राणापानादीनामप्यनवस्थितिः सर्वप्राणबन्धनमूर्ध्वगामी मरणहेतुः । समानोऽशितस्य पीतस्य चाऽऽपादमस्तकं समं यथायोगं नयनं करोतीति समानः । इदं प्राणादिपञ्चकं वायुपाङ्क्तम् । चक्षू रूपग्राहकमिन्द्रियम् । श्रोत्रं शब्दग्राहकमिन्द्रियम् । मनः साधारणज्ञानकारणम् । वाग्वागिन्द्रियमभिवदनकारणम् । त्वक्स्पर्शोपलब्धिकारणमिन्द्रियम् । इदं चक्षुरादिपञ्चकमिन्द्रियपाङ्क्तम् । चर्म त्वगिन्द्रियाधिष्ठानमापादमस्तकं व्याप्य व्यवस्थितम् । मांसमन्नस्य मध्यमः परिणामो मृदुलो घनीभूतः । स्नावा धमनिः, जातावेकवचनत्वान्नाड्य इत्यर्थः । अस्थि प्रसिद्धं श्वेतं शरीरशालावंशस्तम्भादिरूपम् । मज्जा रुधिरमांसयोरन्तरावस्थोष्णकालनिशीतलप्रदेशस्थघृताकाराऽस्थ्नोऽन्तर्गता । इदं चर्मादिपञ्चकं धातुपाङ्क्तम् । एतदुक्तं पृथिव्यादिकं मज्जान्तम् । अधिविधायाधिकृत्य पञ्चकमुपलभ्येत्यर्थः । ऋषिर्वेदो वेदार्थद्रष्टा वा । अवोचदुक्तवान् । पाङ्क्तं पञ्चाक्षरं(र)पङ्क्तिच्छन्दोरूपम् । वै प्रसिद्धं पञ्चसंख्यात्वेन । इदं पृथिव्यादिकम् । सर्वं निखिलम् । पाङ्क्तेनैव पञ्चसंख्याक्रान्तेनैव पाङ्क्तं पञ्चसंख्याक्रान्तम् । स्पृणोति प्रीणयति । पोष्यपोषणादिकं सर्वं पाङ्क्तमित्यर्थः । पाङ्क्तं वा इदं सर्वं यतस्ततः पाङ्क्तेनैव पाङ्क्तं स्पृणोतीति योजनीयम् । इत्यनेन प्रकारेण । स्वयं पञ्चात्मको विश्वं चेदं पञ्चात्मकं सर्वेणाभिन्नं पञ्चात्मकं स्वात्मानं जानतस्ताद्दग्विराट्प्राप्तिफलमर्थासिद्धमिति श्रुतिर्नोक्तवती ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां शीक्षाध्याये षष्ठोऽनुवाकः ॥ ६ ॥

अथ शीक्षाध्याये सप्तमोऽनुवाकः ।

पञ्चसंख्यासामान्यात्पाङ्क्तमिदं सर्वमित्युक्तं तेन सर्वात्मकं ब्रह्म हृदिस्थं ब्रह्मणश्च कोशभूत ओंकारः पूर्वमुक्तः । इदानीं तत्कोशत्वोपपादनार्थं पुनरोंकारस्योपासन-

१ क. ग. 'रणं का' । २ क. ग. भ्याप्याव' । ३ ग. 'त्वोपासना' ।

माह—ॐ ब्रह्मवाचकः । इतिरोंकारानुकरणार्थः । ब्रह्म वाच्यम् । अभिधानाभिधे-यथोस्तादात्म्याद्वाचके वाच्यस्य दृष्टिः करणीया । शालग्राम इव विष्णोरित्यर्थः । ननु सति साम्य ओंकारब्रह्मणोरोंकारे तद्दृष्टिः क्रियमाणोचिता स्यादन्यथाऽन्धगोलाङ्गूलन्याय-मात्रमित्यत आह—ओमिति व्याख्यातम् । इदꣳ सर्वं विविधप्रत्ययगम्यं कार्यकारणादि निखिलम् । अयमर्थः—शब्दप्रपञ्चः सर्वोऽप्योंकारेण व्याप्त इति नात्रोपपादनीयं किंचि-दस्ति । शब्दार्थयोस्तादात्म्ये विप्रतिपत्तावपि वाचकत्वलक्षणेऽविनाभावे न विवादः । यद्येनाविनाभूतं तत्तस्य कार्यम् । यथा धूमाग्न्योः । कार्यकारणयोः साम्यं यथा मृद्घटयोः । तत ओंकारस्याऽऽत्मनश्च सर्वाभिन्नत्वादस्ति साम्यमित्योंकारोपासनार्थमोंकारो लौकिक-वैदिकव्यवहारकारणत्वेन स्तूयते ।

ओमिति व्याख्यातम् । एतदोंकाराभिधानम् । अनुकृतिं गच्छ पिब पठेत्यादिवचन-मनु भृत्यादेरङ्गीकारवचनमोमिति करणमनुकृतिराह । ह किल । स्म प्रसिद्धम् । वै स्मर्यमाणम् । अपिरप्युच्चये । न केवलं लौकिकव्यवहारकारणमोंकारः, किंतु वैदिकस्यापि । ' ओ ' ओमित्यर्थः । श्रावय हविषः परित्यागार्थं मन्त्रं देवाञ्श्रावय । इति, अनेन प्रकारेण । उक्ते वैदिके कर्मण्यृत्विज आश्रावयन्ति समन्ताद्देवान्मन्त्रश्रवणं कारयन्ति । ओमिति व्याख्यातम् । सामानि गीतिसहिता ऋचः । गायन्ति यज्ञकर्मण्यन्यत्र चं पठन्ति । ओं व्याख्यातम् । शों शं सुखं तदेवोꣳशोमित्यनुकरणार्थः । शस्त्राणि शस्त्रशब्दाभिधेयानृग्विशेषान् । शꣳसन्ति पठन्ति यज्ञकर्मण्यन्यत्र चं । ओमिति व्याख्यातम् । अध्वर्युर्याजुष ऋत्विक् । प्रतिगरं गरणम् । वाङ्मनःकायानां विहितं व्यापारमात्रं गरः, तेन संबद्धं प्रतिगरः कर्म, तं प्रति कर्मणि कर्मणीत्यर्थः । गृणाति शब्दं करोति । प्रतिगरं यजुर्विशेषं वा प्रतिगृणाति पठति । आस्मिन्पक्ष ओमित्यु-च्चार्येति शेषः । ओमिति व्याख्यामृत । ब्रह्मा, ऋत्विग्विशेषः । प्रसौत्यनुजानाति । ओमिति व्याख्यातम् । अग्निहोत्रं जुहोतीत्युक्ते होमादिना समीपस्थोऽग्निहोत्रं नित्यं काम्यं वा कर्मानुजानाति जुहुधीत्यनुज्ञां प्रयच्छति । ओमिति व्याख्यातम् । ब्राह्म-णोऽध्येष्यमाणः । प्रवक्ष्यन्पाठार्थं प्रकर्षेण वचनं करिष्यन् । आह ब्रूते ।

ओंकारवदने कारणमाह— ब्रह्म वेदम् । उपाप्नवानि । स्वाधीनत्वलक्षणेन सामी-

---

* यथा कस्यचिदन्धस्य स्वेप्सितस्थलं गन्तुमशक्नुवानस्य हस्ते केनचिद्दुष्टेन बलीवर्दस्य लाङ्गूलं दत्त्वैव त्वामीप्सितस्थलं प्रापयिष्यतीत्युक्त्वा प्रस्थापितोऽन्धो मोक्षभयाद्गोपुच्छं दृढं गृह्णन् लाङ्गूलग्रहणमसहमानेन शर्कराकण्टकोपलादिषु जवात्प्रधावमानेन गवा व्यापाद्यते स एष गोला-ङ्गूलन्यायः ।

---

१ क. ग. °स्याण्वोमोमि° । २ ग. वा । ३ ग. वा । ४ ख. °म् । ब्रह्मणः । प्र° । ५ घ. °णे सामान्येन सा° ।

प्येन प्राप्नवानि । इति, अनेनाभिप्रायेण । ननु किमभिप्रायमात्रमित्याशङ्क्य नेत्याह- ब्रह्म वेदमेव । उपाप्नोति । स्वाधीनत्वसामीप्येन प्राप्नोत्येव न त्वभिप्रायमात्रम् । अत्र फलं च ब्रह्मज्ञानोत्पादद्वारेण सर्वात्मत्वप्राप्तिरनुक्ताऽपि द्रष्टव्या । अथवा 'ओमिति ब्राह्मणः' इत्यादिकं फलवचनम् । अस्मिन्पक्षे ब्राह्मणः साधनचतुष्टयसंपन्नः संन्यासी प्रवक्ष्यन्प्रकर्षेण 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्यादिवचनजातं वक्ष्यन्ब्रह्म सत्यज्ञा-नादिलक्षणम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां शीक्षाध्याये सप्तमोऽनुवाकः ॥ ७ ॥

अथ शीक्षाध्यायेऽष्टमोऽनुवाकः ।

ननु—एवमप्युपासनैर्यस्यान्तर्मुखता न स्यादस्ति च मुमुक्षा किं तेन करणी-यमित्याशङ्क्य कर्मैव तेन करणीयमित्याह-ऋतं च यथाशास्त्रकर्मविषयं ज्ञानम् । चकारः स्वाध्यायप्रवचनाभ्यां समुच्चयार्थः । स्वाध्यायप्रवचने च स्वाध्यायोऽध्ययनं प्रवचनं ब्रह्मयज्ञोऽध्यापनं वा । चकारोऽनयोरुक्तेन समुच्चयार्थः । सत्यं मनःकायाभ्या-मनुष्ठीयमानं कर्म सत्यवचनं वा । तपः कृच्छ्रचान्द्रायणादिरूपं स्वधर्मवृत्तित्वं वा । दमो बाह्येन्द्रियनिग्रहः । शमोऽन्तःकरणोपशमः । अग्नयस्त्रयः पञ्च वा । अग्निहोत्रं नित्यं श्रौतं कर्म सायंप्रातर्होमोपलक्षितम् । अतिथयोऽज्ञातकुलगोत्रा ब्राह्मणादयोऽश-नाद्यर्थं दर्शादितिथिमन्तरेणापि गृहान्समागताः । अतिथिशब्दितसोमोपलक्षितयागा वा । मानुषं पुत्रादिविवाहादौ बन्ध्वादीनां यथोचितं पूजनम् । प्रजा पुत्रादिका । प्रजनः प्रजननमृतौ भार्यागमनामित्यर्थः । प्रजातिः पौत्राद्युत्पत्तिः पुत्रायानुरूपा प्रिया च भार्या तादृशश्च वरः कन्यायै । एवं पौत्रपौत्र्यादेरपि संपादनीयमित्यर्थः । अत्रोमि-त्यादौ संपादनीयमिति द्वादशस्वपि पर्यायेष्वेकवचनाद्विवचनबहुवचनानुसारेणाध्याह-रणीयम् । सर्वत्र च स्वाध्यायप्रवचनयोः पाठस्तत्रात्यन्तमादरदर्शनार्थः । शेषमेकाद-शस्वपि पर्यायेषु समानपाठभूतामिति पर्यायवद्व्याख्येयम् ।

इदानीमृषीणां मतान्यत्रोपन्यस्यति—सत्यमुक्तम् । इति, एव । सत्यवचाः सत्य-वादी, नामधेयं वा । राथीतरो रथीतरगोत्रः । अनुष्ठेयं मनुत इति । अत्र वक्ष्यमाणेऽपि यथायोगमध्याहरणीयम् । तप इति तप एव । तपोनित्यस्तपसि नित्यं वर्तत इति तपोनित्यो नामधेयं वा । पौरुशिष्टिः पुरु बहुवेलं मातृपित्राचार्यैः शिष्टः पुरुशिष्टस्तस्या-पत्यं पौरुशिष्टिः ।

१ ग. च । २ ग. च । ३ ग. °तयोगो वा । ४ ग. °योग्यम् ।

पूर्वपक्षमुक्त्वा सिद्धान्तमाह—स्वाध्यायप्रवचने व्याख्यातम्। एव न त्वन्य-त्सत्यं तपो वा। इतीत्थम्। नाको नामतः। मौद्गल्यो मुदं शास्त्रार्थनिर्णयरूपां गच्छति स्रवतीति मुद्गलः, तस्यापत्यं मौद्गल्यः। अस्य पक्षस्य सिद्धान्तत्वमुपपादयति—तत्स्वाध्यायप्रवचनानुष्ठानम्। हि यस्मात्। तप उक्तमुपलक्षणमिदं सत्यस्यापि। तस्मादिदमेवाधिकमिति शेषः। अस्य पक्षस्याऽऽदरार्थं द्विर्वचनम्। तद्धि तपो व्याख्यातम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां वेदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां शिक्षाध्यायेऽष्टमोऽनुवाकः॥ ८॥

अथ शीक्षाध्याये नवमोऽनुवाकः।

ननु—अध्ययनस्य ब्राह्मण्यजातिप्रयुक्तत्वेन कर्तव्यतया सिद्धत्वाद्व्रतस्य करणीय-ताऽध्यापनस्य वा (?)। नित्यत्वान्न तस्यापि नित्यः स्वाध्यायः स्वाध्यायप्रवचनश-ब्दाभ्यां प्रतिपाद्योऽतः शिष्यते। न चासावपि कुतः शक्योऽनेककार्यव्यग्रत्वात्। न चाशक्यं विदधाति विधिः। ततः स्वाध्यायप्रवचने एवेति यत्किंचिदेतदित्याशङ्क्यैत-त्मन्त्रमात्रं नित्यं जपनीयम्। अन्यत्तु यथाशक्ति। तावताऽशक्यत्वाभावादित्यभिप्रा-यवानाह—अहं नित्यस्वाध्यायस्य कर्ता। वृक्षस्योर्ध्वमूलस्यावाक्शाखस्य वनस्पतेरधि-दैवादिभिन्नस्य स्थूलसूक्ष्मशरीरस्येत्यर्थः। रेरिवा प्रेरयिता। कीर्तिः स्ववर्णाश्रमोचि-तानुष्ठानकारित्वेन विद्यया चेहामुत्र पुण्यं यशः। पृष्ठमत्युच्छ्रितं शृङ्गं लोकद्वयदर्शनस्य विषयः। गिरेरिव पर्वतस्य मेरोर्यथा तथा। मम स्यादिति शेषः। ऊर्ध्वपवित्र ऊर्ध्वं कारणं पवित्रं ब्रह्म यस्य मम देहादिसंघातस्य सोऽहमूर्ध्वपवित्रो वृक्षोऽप्यहमेवेत्यर्थः। वाजिनीव वाजोऽन्नं देवानां रोहितादिरूपं प्रसिद्धमस्मदादीनां चास्यास्तीति वाजी सविता तस्मिन्यथा स्वमृतं सुष्ठ्वमृतं रोहितादिरूपमानन्दात्मस्वरूपं वाऽस्मि। द्रविणं धनं हिरण्यादिरि(कं) वाऽऽनन्दात्मस्वरूपम्। सवर्चसं वर्चस्तेजो ब्रह्मसाक्षात्कार-स्तेन सह वर्तत इति सवर्चाः, सवर्च एव सवर्चसम्। सुमेधाः सुष्ठु मेधा 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्यादिश्रुतधारणरूपा यस्य स सुमेधाः। अमृतोक्षितः, अमृतेन गुरुकटाक्षेणोक्षितः सेचितः, अमृतो मरणशून्योऽक्षितो विकारान्तरहीनो वा। तथा मम स्यादिति। अध्याहाराभावे[1] सात्म्यज्ञानं कीर्तिरप्यहमस्मीति व्याख्येयम्। श्रुतिराह—इति अनेन प्रकारेण। स्वधर्मनिष्ठस्याऽऽर्षदर्शनसंपन्नस्य त्रिशङ्कोराध्यात्मिकाधिभौतिकाधि-दैविका दुःखस्वरूपाः शङ्कवो यस्य स त्रिशङ्कुः। तस्य भृशं संसारतापैः संतप्तस्य

---

1 ग. 'वे सर्वात्मता'।

परमवैराग्यं प्राप्तस्येत्यर्थः । त्रिशङ्कुनाम्नो वा । वेदानुवचनमहं संसारस्य प्रेरयिता [प्रा]यशः संसारोऽविद्यया, वस्तुतस्त्वानन्दात्मस्वरूपो ब्रह्मसाक्षात्कारवान्गुरुकटाक्षपातेनेति वेदनं वेदः । तमनु पश्चाद्वचनम् ‘ अहं वृक्षस्य ’ इत्यारभ्य ‘ अमृतोक्षितः ।' इत्यन्तं वेदानुवचनम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां शीक्षाध्याये नवमोऽनुवाकः ॥ ९ ॥

=====

अथ शीक्षाध्याये दशमोऽनुवाकः ।

सत्यादीन्यनुष्ठेयान्यन्तर्मुखेन(ण) मुमुक्षुणा । तानि किं सति मुमुक्षुत्व एवानुष्ठेयानि नेतरथेत्याशङ्क्य मुमुक्षुत्वेऽमुमुक्षुत्वे चोपनयनमारभ्याऽऽब्रह्मसाक्षात्कारमाश्मशानं वा स्ववर्णाश्रमोचितानि कर्माणि करणीयानीत्येतदर्थं गुरुकुलात्प्रवसतो ब्रह्मचारिण इदमुपदेश्यमाचार्येणेत्यभिप्रायेणाऽऽह—वेदमृगाद्यन्यतमं स्वशाखामात्रं वा । आदरो नैकवचने द्वौ त्रींश्चतुरो वा साङ्गविद्योपविद्या(वेदोपवेदा)न् । अनूच्य तदुपनयनेमनूक्त्वा । आचार्यः शिष्यमुपनीय कल्परहस्यादिसहितस्य वेदस्य वक्ता । अन्तेवासिनं छायावदपरित्यागिनमाह्वानेनाध्ययनस्य कर्तारमित्यादिशिष्यलक्षणसंपन्नं शिष्यमनुशास्ति वेदवचनमनुशासनं करोति । अनुशासनं कुर्यादित्यर्थः । सत्यं यथाप्रमाणदृष्टं हितं प्रियं च वचनम्, वदोच्चारय । धर्मं स्ववर्णाश्रमविहितं कर्म चर, आचर । स्वाध्यायान्नित्यस्वाध्यायात्, मा प्रमदः प्रमादं मा कार्षीः । आचार्याय मह्यं, प्रियमिष्टं धनं गोधनादि, आहृत्य समस्तविद्यानिष्क्रयार्थं, सदृशान्दारान्स्वीकृत्य प्रजातन्तुं पुत्रपौत्रादिसंततिं, मा व्यवच्छेत्सीर्व्यवच्छेदं मा कार्षीः । पुत्रपौत्राद्यर्थं दृष्टार्थोऽदृष्टार्थश्चोद्यमः करणीय इत्यर्थः ।

सत्यादीनां कर्तव्यतोक्ता, तेषामन्येषां च करणीयता, तेषामेव कदाचिद्धारणीयतेति बुद्धिं वारयितुमाह—सत्यादुक्तान्न प्रमदितव्यं प्रमादो न करणीयः । निरन्तरं तदेवानुष्ठेयमित्यर्थः । धर्मादुक्तान्न प्रमदितव्यं व्याख्यातम् । कुशलात्क्षेमकरात्कर्मणोऽदृष्टार्थान्न प्रमदितव्यं व्याख्यातम् । भूत्यै भूतेरैश्वर्यात् । न प्रमदितव्यं व्याख्यातम् । स्वाध्यायप्रवचनाभ्यां नित्यस्वाध्यायाचीताविस्मृतौ दृष्टार्थाध्यापनार्थाभ्याम् । न प्रमदितव्यं व्याख्यातम् । यद्यपि ‘ स्वाध्यायान्मा प्रमदः ’ इत्यनेनैव स्वाध्याये प्रमादराहित्यं प्राप्तं तथाऽपि सर्वेभ्यः कर्तव्येभ्यः स्वाध्याये महाप्रयत्नः करणीय इत्येतदर्थं पुनः स्वाध्यायेत्याह । देवपितृकार्याभ्यां देवकार्यं दर्शपौर्णमासादि पितृकार्यं पिण्डपितृयज्ञादि, अथवा देवकार्यं वृद्धिश्राद्धादि पितृकार्यं

१ घ. °नमुक्त्वा । २ ख. ग. °यात् । मा । ३ ग. °णो दृष्टार्थान । ४ ख. °स्मृतिदृ° ।

मृतश्राद्धादि ताभ्याम्। न प्रमदितव्यं व्याख्यातम्। मातृदेवो माता देवो यस्य स मातृदेवो भव भूयाः। पितृदेवः पिता देवो यस्य स पितृदेवो भव भूयाः। आचार्यदेव आचार्यो देवो यस्य स आचार्यदेवो भव भूयाः। अतिथिदेवोऽतिथिर्देवो यस्य सोऽतिथिदेवो भव भूयाः। जननीजनकाचार्यातिथीनामभीष्टदेवतावत्परिचर्यां कुर्वंस्तदुक्तकारी कर्मणा मनसा वाचा तदिष्टामेव चेष्टां कुरु, मा प्रमादेनापि तदनिष्टचेष्टामित्यर्थः।

ननु यद्यत्पूर्वैः कृतं तत्करणीयम्। तथा च जामदग्न्यः स्वजननीं जघान, शुनःशेपः स्वजनकं तत्याज, याज्ञवल्क्यस्त्वाचार्यं, गौतम इन्द्रमतिथिं, ब्रह्मा स्वसुतां जगाम, इन्द्रस्त्रिशीर्षं ब्राह्मणं जघान, क्षत्रियो बलदेवः सुरां पपौ, सोमो गुरोर्भार्यां जहार, इत्यादिमहतामाचारानुसारादहमप्यनुष्ठास्यामीत्यत आह—यानि प्रसिद्धानि। अनवद्यानि, अदुष्टानि महतामप्याचरितानि शास्त्रे लोके वा निन्दारहितानीत्यर्थः। कर्माणि लौकिकानि वैदिकानि वा कर्तव्यानि। तान्युक्तान्यनिन्दितानि महतामपि। यथा जामदग्न्यः पितृवचनं चकार, शुनःशेपो विश्वामित्रस्योपकारं न विसस्मार, याज्ञवल्क्यस्तपसाऽऽदित्यमवाप्य शुक्लानि यजूंषि प्रतिपेदे, गौतमः स्वभार्याजारायापीन्द्राय प्राणपर्यन्तं कोपं न चकार, ब्रह्मा पुत्रोत्पत्त्यर्थं महान्तमुद्यमं चकार, इन्द्रश्च त्रिलोकीस्वास्थ्याय निन्दितां हत्यामपि स्वीचकार, बलदेवश्च शेषोऽपि देवब्राह्मणकार्यार्थं शुक्रशोणितशरीरमपि स्वी चकार, सोमो गुरोर्गरीयसीं कीर्तिं चकार, इत्यादीनि त्वया सेवितव्यानि, अनुष्ठेयानि।

ननु—पितुर्वे(तृव)चनकरणादीन्यनुष्ठास्यामि महद्भिः कृतत्वान्मातुर्वे(तृव)धादीनि चेत्यत आह–नो निषेधार्थः। इतराणि मातुर्वे(तृव)धादीनि [न] सेवितव्यानीत्यनुषङ्गः।

: ननु तर्ह्यन्यैः कृतान्यवद्यानि कर्माणि नानुष्ठास्यामि किंतु भद्गुरुभिर्भवद्भिः सेवितानि सर्वाण्यपि वेदैर्वोक्तानि "अग्निहोत्रं जुहोति" "न कांचन परिहरेत्" इत्यादीन्यनुष्ठास्यामीत्यत आह–यानि प्रसिद्धानि, अस्माकमाचार्याणां वेदानां वा सुचरितानि विहितानि कर्माण्यस्माभिरनुष्ठीयमानानि "अग्निहोत्रं जुहुयात्" इत्यादीनि वेदैरुक्तानि वा शोभनानि लोकद्वयश्रेयस्करत्वेन। तानि, उक्तानि सुचरितानि। त्वया शिष्येणोपास्यानि निरन्तरमनुष्ठेयानि।

निन्दितानामाचार्यैः कृतानां वेदैरुक्तानां वाऽननुष्ठेयत्वमाह—नो इतराणि। न परदारगमनादीन्युपास्यानीत्यनुषङ्गः। ये के च संबन्धिनोऽसंबन्धिनो वा तव। ये के चास्मदस्मत्तस्त्वदाचार्येभ्यः। श्रेयांसोऽतिशयेन प्रशस्याः केचन। तर्हि किं क्षत्रियादय इत्यत्र आह—ब्राह्मणा ब्राह्मणत्वजात्याऽऽक्रान्ताः। तेषामुक्तानां ब्राह्म-

---

१ ग. महद्भु॰। २ क. ख. ॰न क्ष॰।

णानाम् । त्वयाऽस्मच्छ्रिष्येण । आसनेनाऽऽसनोपलक्षितसत्कारकरणेन । प्रश्व-सितव्यमासनदानादिना स्वगृहमागतानां प्रश्वासः श्रमापनयः करणीयः । अथवा तेषामासन उपवेशने सभायामित्यर्थः । न प्रश्वसितव्यं प्रश्वासोऽपि न करणीयः किमुत वार्तादिकम् । केवलं तदुक्तग्राहितया स्थेयमित्यर्थः । श्रद्धयाऽऽस्तिक्यबुद्ध्या । देशकालपात्रसंपत्तौ सत्यां विभवानुसारेण गोभूहिरण्याशनपानादिकं यथोचितं देयं दातव्यम् । न विपर्यय इत्याह—अश्रद्धया नास्तिक्यबुद्ध्या । अदेयं न देयम् । श्रिया विभूत्या । देयं दातव्यम् । ह्रिया लज्जया । देयं दातव्यम् । भिया भीत्या । देयं दातव्यम् । संविदा मैत्र्यादिकरणेन । देयं दातव्यम् । श्रियादिनिमित्तेषु दानेष्वास्तिक्यबुद्धिपुरःसरमेव देयं न तु नास्तिक्यबुद्ध्येति तात्पर्यार्थः ।

अथ महदुपदेशानन्तरम् । यदि पक्षान्तरे । कथंचित्ते तव शिष्यस्य मदुक्तं कर्मजातमनुतिष्ठतः । कर्मविचिकित्सा वा कर्मस्वग्निहोत्रादिषु संध्यावन्दनादिषु वा श्रौतेषु स्मार्तेषु "उदिते जुहोति" "अनुदिते जुहोति" "सावित्रीं स्त्रीदेवतां पुरुषदेवतां वा" इत्यादिवाक्येभ्यो विचिकित्सा संशयः । वाशब्दो विपर्ययार्थो विपर्ययो वा । वृत्तविचिकित्सा वा वृत्तमाचारः कुलपरम्परागतस्तस्मिन्विचिकित्सा संशयः । यथा केषांचिन्मातुलसुताविवाहमांसभक्षणादिकं किंचिदपरेषां नेत्यादिदर्शनेन । वाशब्दो विपर्ययार्थः । वैदिके लौकिके च कर्मणि संशयोत्पादे विपरीतप्रवृत्तिर्वा पण्डितंमन्यत्वेनेत्यर्थः । स्याद्भवेत् । तदा ये प्रसिद्धा नीरागद्वेषा यथाशास्त्रानुयायिनः । तत्र तस्मिन्देशे, यत्र भवतो निवासः । ब्राह्मणा ब्राह्मणत्वजात्याऽऽक्रान्ताः[3] । संमर्शिनः संमर्शो रागद्वेषौत्सुक्यराहित्येन शास्त्रार्थनिर्णयः । स येषां नित्यमस्ति ते संमर्शिनः । युक्ताः कर्मानुष्ठानयोगरता नित्यनैमित्तिकानुष्ठानशीला इत्यर्थः । आयुक्ता अपरप्रयुक्ताः । शास्त्रार्थस्य वचनेऽनुष्ठाने चान्यभीतिरहिता इत्यर्थः । अलूक्षा आरूक्षाः कर्णकठोरवचनपरानिष्टकारिबुद्धिरहिता इत्यर्थः । धर्मकामा धर्म एव कामोऽभिलाषो येषां ते धर्मकामाः । स्युर्भवेयुः । यथा येन प्रकारेण । ते यथोक्तविशेषणविशिष्टा ब्राह्मणाः । तत्र तस्मिन्कर्मणि वृत्ते वा । वर्तेरन्वृत्तिं कुर्वीरन्यथाऽनुतिष्ठन्तीत्यर्थः । तथा तेन प्रकारेण । त्वमपि तत्र कर्मणि वृत्ते वा । वर्तेथा वृत्तिं कुरु तद्वत्तदनुतिष्ठेत्यर्थः । अथ, अथवा तेष्वभ्याख्यातेष्वभ्युक्ता दोषेण संदिह्यमानेन संयोजिताः केनचित्तेषु । व्याख्यातमन्यत् ।

एष 'सत्यं वद' इत्यारभ्य 'तथा तेषु वर्तेथाः' इत्यन्त आदेशः कर्तव्यार्थः सत्यादिलक्षणः । तत्कथनेनैष उक्तार्थो वाक्यसंदर्भ उपदेशः पित्रादिवचनरूपः ।

---

१ ग. °स्सा क° । २ ग. °स्पादवि° । ३ ग. °णजा° ।

एषोक्ता वाक्यसंततिर्वेदोपनिषद्वेदरहस्यबुद्धिः । एतदुक्तं वाक्यजातम् । अनुशासनं राज्ञामिवाऽऽज्ञाभूतम् । एतदर्थाननुष्ठाने महतो दुःखस्य प्राप्तेर्विधीयमानत्वात्सस्नेहमुच्यमानत्वाद्वेदसारत्वादकरणे दुःखप्राप्तिश्चेत्यर्थः । यत एवं तत एवमुक्तप्रकारं सत्यादिकम् । उपासितव्यं नित्यं निरन्तरमा ब्रह्मज्ञानादा श्मशानाद्वाऽनुष्ठातव्यम् । एतदेव.न त्वन्यदनुष्ठेयमेव चैतदर्थं पुनराह—एवमु च, एवमेव । चकारोऽवगतिसमुच्चयार्थः । अवगत्य चैतत्सत्यवदनाद्यभ्याख्यातेषु वर्तनान्तम् । उपास्यमुपासनीयं नित्यमनुष्ठेयमित्यर्थः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां शीक्षाध्याये दशमोऽनुवाकः ॥ १० ॥

=====

अथ शीक्षाध्याय एकादशोऽनुवाकः ।

अध्ययनव्याख्यानोपक्रमोपसंहारयोः शान्तिः पठनीयेति शिष्याञ्शिक्षयितुं प्रपाठकान्ते वक्ष्यमाणविद्योपसर्गशान्त्यर्थमपि कृतायाः शान्तेः फलं दर्शयन्नुक्तामेव शान्तिमनुवाकेन पुनः पठति कानिचित्पदान्यन्यथयित्वा—शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः । वदिष्यामीतिपदस्थलेऽवादिषमवत्वितिपदस्थल आवीदिति विशेषः । शेषं शमित्यारभ्य शान्तिरित्यन्तं समानपाठं समानार्थम् । अवादिषमुक्तवानस्मि । आवीत्पालनमकरोत् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां शीक्षाध्याय एकादशोऽनुवाकः ॥ ११ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मपूज्यपादशिष्यस्य श्रीशंकरानन्दस्य कृतौ तैत्तिरीयोपनिषद्दीपिकायां पदार्थबोधिन्यां प्रथमः शीक्षाध्यायः समाप्तः ॥ १ ॥

=====

अथ द्वितीयो ब्रह्मवल्ल्यध्यायः ।

तत्र प्रथमोऽनुवाकः ।

यदर्थं पूर्वः प्रपाठकः प्रवृत्तस्तां ब्रह्मविद्यां विवक्षुस्तस्यामत्यन्तमादरार्थं प्रकारान्तरेण

१ ग. °षोक्तवा° । २ क. ग. °ज्ञामाज्ञा° । ३ ग. एवमु° ।

पुनः शान्तिं पठति—सह समम् । नावावाम् । अवतु साधनज्ञानेन ब्रह्म रक्षतु । सह नौ व्याख्यातम् । भुनक्तु फलज्ञानेन पालयतु । सह समं वीर्यं विद्यातेजोतिशयो जीवन्मुक्तिलक्षणस्तं करवावहै करवाव । तेजस्वि वीर्यवत्तमं नावावयोः । अधीतं गुरुमुखादवगतम् । अस्तु भवतु । अथवा तेजस्विनावावां भवावेति शेषः । तेजस्विनोरिति वा व्याख्येयम् । अधीतमस्तु तेजस्वीति शेषः । किं बहुना मा विद्विषावहै प्राणिभिः परस्परं वा विद्वेषं मा करवावहै । ॐ शान्तिः शान्तिः शान्तिः, व्याख्यातम् ।

पूर्वपाठकारम्भे सूचितब्रह्मविद्याया इदानीं सूत्रेण फलमाहाधिकारिप्रवृत्तिसिद्धये—ब्रह्मविद्ब्रह्मसाक्षात्कारवान् । आप्नोति । मोक्षं प्राप्तकण्ठस्थाभरणवत्प्राप्नोति । परं ब्रह्मेदमस्मीत्यविद्यातत्संस्कारशून्यत्वेनाखण्डैकरसमात्मानमवगत्य स एव भवतीत्यर्थः । तत्तत्र ब्रह्मणि ब्रह्मविदः परप्राप्तौ च । एषा वक्ष्यमाणमन्त्रभूता । अभ्युक्ता सर्वतः सर्वार्थप्रकाशकत्वेन कथिता । वेदपुरुषेणेति शेषः । सत्यमनृतनकारार्थविलक्षणम् । तर्हि भावरूपं जडमित्यत आह—ज्ञानं जडविलक्षणम् । यद्यभावभावविलक्षणो भावविशेषस्तर्हि घटादिकमपि तथेत्यत आह—अनन्तं देशकालवस्तुपरिच्छेदशून्यम् । एतावत्येवोच्यमानेऽभावः स्यात्ततोऽस्य व्यवच्छेदार्थमाह—सत्यमिति । सत्यमनन्तमित्युच्यमाने जडमपि स्यात्तद्व्यावृत्त्यर्थं ज्ञानमित्याह । यद्यपि ज्ञानमनन्तमित्युच्यमाने न सत्यपदस्य कृत्यं ज्ञानस्यासद्विलक्षणत्वात् । तथाऽपि ज्ञानमप्यसदिति सर्वासद्वादिनः संगिरन्ते । तत्पक्षाधिक्षेपार्थं सत्यमित्याह ।

अयं भावः—येनापि सर्वासत्त्वमङ्गी क्रियते तेनाप्यङ्गी क्रियत एव सत्त्वम् । अन्यथाऽसत्त्वस्याप्यनुपपत्तेः । तयोर्निरपेक्षत्वादिभ्यो हेतुभ्यः सत्त्वस्यैवाङ्गीकारः करणीयो नासत्त्वस्येति । जडवैलक्षण्यं च स्वयंप्रकाशमानानन्दात्मन एवाविद्यायाः सकार्यायाश्च जाड्ये सति दुःखानात्मत्वदर्शनात् । एवं चेज्ज्ञानमित्येवास्तु, कृतमनन्तपदेनापीति न मन्तव्यम् । अन्तःकरणाविद्यावृत्त्योरपि ज्ञानशब्दाभिधेयत्वात्तदेव ज्ञानमिदमपीति बुद्धिनिवारणार्थमनन्तपदस्योपयोगात्पदत्रयमिदं स्वरूपलक्षणमखण्डैकरसार्थं प्रकृष्टप्रकाशश्चन्द्र इत्यादिवत् ।

इदानीं लक्ष्यपदमाह लक्षणार्थसमर्थ(र्प)कम् । ब्रह्म बृहतेर्धातोरर्थभूतमभ्यधिकम् । आधिक्यं चासज्जडान्तवद्वैलक्षण्यमन्तरेण नोपपद्यते । तत इदं सत्यं ज्ञानमनन्तं योऽधिकारी । वेद जानाति । निहितं निक्षिप्तं गुहायां बुद्धावधिदैवाधिभूताध्यात्मभेदेन व्यवस्थितायाम् । सा च कुत्रेत्यत आह—परम उत्कृष्टे भूताकाशात्, व्योमन्व्योमन्यव्याकृते बुद्धिकारणेऽविद्याकार्यान्तःकरणवृत्तावभिव्यक्तमेवोक्तलक्षणं ब्रह्म । सर्वोऽप्यधिकार्यहमस्मीत्यवगच्छतीत्यर्थः । स ब्रह्मज्ञानी । अश्नुते तादात्म्येन प्राप्नोति । सर्वान्कामानखिलान्कामनाविषयान् । सह युगपत्क्रममन्तरेणेत्यर्थः । केन रूपेण

१ क. °र्वपाठकाधिकारभेदानां सूत्रे° । २ ख°. °महमस्मी° ।

युगपत्सर्वान्कामान्प्राप्नोतीत्यत आह— ब्रह्मणा ब्रह्मतादात्म्यरूपेण । ब्रह्मणोऽपि किं रूपमित्यत आह—विपश्चिता स्वयंप्रकाशमानज्ञानैकरूपेण । इतिर्मन्त्रपरिसमाप्तौ ।

ब्रह्मणः स्वरूपलक्षणमुक्त्वेदानीं जगज्जन्मादितटस्थलक्षणं हृदि कृत्वा मन्त्रेण संक्षेपेण व्याख्यातं सूत्रं विस्तरेण व्याकरिष्यंस्तत्त्वंपदार्थयोरैक्येनाऽऽत्मनो जगत्कारणत्वमाह—तस्मात्सत्यज्ञानानन्तलक्षणाद्ब्रह्मणः । वा आत्मत्वेन स्मर्यमाणात्प्रसिद्धात् । एतस्माद्बुद्धेर्द्रष्टुः स्वयंप्रकाशमानात् । आत्मनोऽस्मच्छब्दप्रत्ययव्यवहारालम्बनात् । आकाशः शब्दगुणत्वेन प्रसिद्धोऽवकाशः संभूत उत्पन्नः । इदं पदं यथालिङ्गं यथावचनं पुरुषान्तेष्वनुवर्तते । आकाशादुक्तात् । वायुः शब्दस्पर्शगुणो नभस्वान् । वायोरुक्तादग्निः शब्दस्पर्शरूपगुणस्तेजोधातुः । अग्नेरुक्तादापः शब्दस्पर्शरूपरसगुणा द्रवात्मिकाः । अद्भ्य उक्ताभ्यः पृथिवी शब्दस्पर्शरूपरसगन्धगुणा कठिना भूमिः । पृथिव्या उक्ताया ओषधयः फलपाकान्ताः । ओषधीभ्य उक्ताभ्योऽन्नमदनीयं प्रसिद्धम् । अन्नादुक्तात्[1]पुरुषः स्थूलदेहः पुरुषशब्दाभिधेयः ।

इदानीमेवं पुरुषमुररीकृत्याऽऽत्मनः कोशपञ्चकातीतं रूपं विवक्षन्प्रथमं कोशानाह—स उक्तः पुरुषः । वै प्रसिद्धो हस्तपादादिमानेष प्रत्यक्षः । पुरुषो व्याख्यातम् । अन्नरसमयः, अन्नस्याद्यमानस्य यो रसः सारभूतः शुक्रशोणितरूपस्तस्य विकारोऽन्नरसमयः । तस्य पुरुषस्य पक्षिणः । इदमेव प्रसिद्धं मस्तकमेव । शिरो मस्तकम् । अयं दक्षिणो भुजः । दक्षिणो दक्षिणभागस्थः । पक्षः पत्रम । अयं वामो भुजः । उत्तरो वामभागस्थः । पक्षः पत्रम् । अयं गलमारभ्याऽऽकटिस्थलं देशः । आत्माऽऽन्तराधीः । इदं कटिस्थलादधःस्थितं पादद्वयम् । पुच्छं लाङ्गूलम् । लाङ्गूलस्य पुच्छत्व उपपत्तिः प्रतिष्ठा प्रतितिष्ठत्यस्मिन्निति प्रतिष्ठाऽऽधार इत्यर्थः । पक्षिणोऽपि पुच्छाधारत्वमस्माभिरदृष्टमपि प्रतिष्ठेति वचनसामर्थ्यात्कल्पनीयम् । तदपि तस्मिन्नुक्तेऽप्यर्थे दाक्षिण्येष वक्ष्यमाणः । श्लोको मन्त्रः । भवति स्पष्टम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां द्वितीये ब्रह्मवल्ल्यध्याये

प्रथमोऽनुवाकः ॥ १ ॥

अथ ब्रह्मवल्ल्याध्याये द्वितीयोऽनुवाकः ।

अन्नाददनीयात् । वै प्रसिद्धात् । प्रजा जन्तवः । प्रजायन्ते स्पष्टम् । याः काश्च याः काश्चन निखिलाः । स्वेदजाण्डजजरायुजोद्भिज्जा इत्यर्थः । पृथिवीं ब्रह्माण्डान्तर्बहिर्वर्तिनीं भूमिं श्रिताः । अथो अपि । अन्नजाः सत्योऽन्नेनैवादनीयेनैव । अद्यमानेन जीवन्ति प्राणान्धारयन्ति । अथ जीव[3]कर्मक्षयानन्तरम् । एनदन्नमग्निभूमि[2]श्वकीटादि-

---

१ क. °न्नात्पु° । २ ख. °वनक° । ३ ख. °श्वविट्की° ।

रूपम् । अपियन्त्यपिगच्छन्त्यन्ते विलीयन्त इत्यर्थः । अन्ततोऽन्ते । तथा च न प्रत्यक्षविरोधोऽपि । सति शरीरेऽन्नेऽप्ययस्यानभिधानात् । अन्नं चतुर्विधप्राणिजातशरीरस्योत्पत्तिस्थितिलयकारणमदनीयम् । हि यस्मात् । भूतानां चतुर्विधानां प्राणिनाम् । ज्येष्ठमतिशयेन वृद्धं कारणमित्यर्थः । तस्मात्ततः । सर्वौषधं सर्वस्य प्राणिजातस्यौषधं क्षुत्तृड्रोगस्य वारणम् । उच्यते कथ्यते ।

इदानीमन्नमयस्य पक्षिवत्काल्व्याधकदर्थीकृतस्य कारणान्नप्रशंसाप्रसङ्गेनाऽऽत्मज्ञानाभिमुखत्वार्थं फलेन प्रलोभ्यान्नोपासनमाह—सर्वं निखिलं वै प्रसिद्धं ते वक्ष्यमाणाः । अन्नमदनीयम् । आप्नुवन्ति प्राप्नुवन्ति । य उपासकाः । अन्नमदनीयं ब्रह्म सर्वस्मादधिकं ब्रह्मज्ञानेनेत्यर्थः । उपासत एकरूपेण प्रत्ययप्रवाहेण साक्षात्कुर्वते । पूर्वमन्नस्य सर्वभूतकारणत्वार्थमुक्तमिदानीं तदेव ब्रह्मतादात्म्योपासनोपपत्तये ब्रह्मसमानधर्मत्वं दर्शयितुं पुनः पठति—अन्नं हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । यथा ब्रह्म भूतानां ज्येष्ठमवगतं सञ्भवरोगौषधमुच्यते तथा यस्मादन्नं भूतानां ज्येष्ठं तस्मात्सर्वौषधमुच्यते । व्याख्यातश्च पदार्थः । अपि च यथा ब्रह्मणो भूतानि जायन्ते ब्रह्मणि तिष्ठन्ति च तथाऽस्मादनीयात् । भूतानि चतुर्विधान्यण्डजादीनि । जायन्त उत्पद्यन्ते । जातान्युत्पन्नानि । अन्नेनादनीयेन । वर्धन्ते वृद्धिं गच्छन्ति । ततो ब्रह्मणा समत्वाद्युक्तमन्नस्य ब्रह्मणा तादात्म्येनोपासनमिति भावः ।

इदानीमन्नशब्दार्थमाह—अद्यते भक्ष्यते । भूतैरिति शेषः । अत्ति च भक्षयत्यपि । चकारः कर्मकर्तृव्युत्पत्त्योरन्नशब्दे समुच्चयार्थः । भूतान्यण्डजादीनि । तस्माद्यतोऽद्यतेऽत्ति च भूतानि ततः । अन्नमन्नशब्दं तदन्नमुच्यते कथ्यते । इतिः प्रथमकोशपरिसमाप्त्यर्थः ।

तस्मादुक्तात् । वै प्रसिद्धात् । एतस्मात्प्रत्यक्षात् । अन्नरसमयादन्नरसविकारात्स्थूलदेहात् । अन्यः पृथग्भूतः । अन्तरोऽभ्यन्तरः । आत्माऽऽत्मशब्दाभिधेयः । प्राणमयः प्राणविकारः । तेन प्राणमयेन । एष प्रत्यक्षः स्थूलो देहः । पूर्णः परिपूर्णः । स प्रसिद्धः । वै स्मर्यमाणः । एष साक्षिप्रत्यक्षः प्राणमयः । पुरुषविध एव पुरुषाकार एव । मूषानिषिक्तद्रुतताम्ररसो यथा तादृगेव न त्वन्यादृशः ।

तर्हि किं पुरुषः पुरुषान्तरसदृश इति चोभयमपि स्वतन्त्रमित्याशङ्क्य नेत्याह—तस्य पूर्वस्य पुरुषविधतां पुरुषसदृशताम् । अनु पश्चात् । अयं तस्मादुत्तरः । पुरुषविधः पुरुषसदृशो न तु स्वतन्त्र इत्यर्थः । ततः पूर्ववदस्मिन्नपि कल्पना कर्तुं सुकरेति भावः । तस्य प्राणमयस्य । प्राण एवोच्छ्वासकारिणी प्राणवृत्तिरेव न त्वन्यत् । शिरो मूर्धा । व्यानो दक्षिणः पक्षः । अपान उत्तरः पक्षः । आकाश आत्मा ।

पृथिवी पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति । व्यानापानौ पूर्वप्रपाठके व्याख्यातौ । आकाश आकाशस्थः समानः । पृथिवी पृथिवीस्थः सर्वप्राणकीलभूत ऊर्ध्वगाम्युदानः । अनेन हि सर्वे प्राणा म्रियन्ते स्ववृत्तिसंकोचेन । वाय्वधिकारादाकाशपृथिवीशब्दौ यथाकथंचित्समानोदानविषयौ नीतौ । अथवा मुख्यार्थतैवानयोः शब्दयोरस्तु । तथा च श्रुतेः कोशेष्वनास्थेति व्याख्येयम् । व्याख्यातमन्यत् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां द्वितीये ब्रह्मवल्ल्यध्याये द्वितीयोऽनुवाकः ॥ २ ॥

अथ ब्रह्मवल्ल्यध्याये तृतीयोऽनुवाकः ।

प्राणं मुख्यप्राणं **देवा**श्चक्षुरादयोऽग्न्यादयः । **अनु** प्राणमनु । **प्राणन्ति** चेष्टन्ते । **मनुष्या** मनुजाः । **पशवश्च** गवाद्याः । चकारः सर्वशरीरसंग्रहार्थः । **ये** प्रसिद्धार्थाः । **प्राणो** मुख्यप्राणः । **हि** यस्मात् । **भूतानाम**ण्डजादीनाम् । **आयु**र्जीवनकारणम् । अनेन देहेन्द्रियात्मवादो निराकृतः । **तस्मा**द्यस्मादायुस्ततः **सर्वायुषं** सर्वायुरेव सर्वायुषम् । **उच्यते** कथ्यते । इदानीं मन्त्रोपासनवत्प्राणोपासनाफलं प्राणोपासनं चाऽऽह— **सर्वमेव** निखिलमेव । **ते** वक्ष्यमाणाः । **आयु**र्जीवनकारणं शतसंवत्सररूपम् । **यन्ति** गच्छन्ति । **ये प्राणं ब्रह्मोपासते** । प्राणं मुख्यप्राणम् । व्याख्यातमन्यत् । अन्नवत्प्राणस्यापि ब्रह्मसमानतां वक्तुं पुनरुक्तस्याभिधानम्—**प्राणो हि भूतानामायुः । तस्मात्सर्वायुषमुच्यते** । व्याख्यातम् । ब्रह्मणो यथा सर्वायुष्ट्वं तद्वत्प्राणस्यापीत्यर्थः । **इतिः** प्राणकोशपरिसमाप्त्यर्थः । " **तस्यैष एव शारीर आत्मा । यः पूर्वस्य** " एतदनन्तरं यद्यपीति शब्दः पठनीयः प्राणकोशस्यात्र परिसमाप्तेस्तथाऽप्यस्य वाक्यस्यान्नमयादधिकत्वाच्छङ्कोत्तरत्वाच्चैतस्मात्पूर्वपाठ इतिशब्दस्य[1] । अथवा पाठक्रमादर्थक्रमस्य बलीयस्त्वादत्र पठितस्यापि तदनन्तरं संगतिरवगन्तव्या ।

ननु—पूर्वस्मात्पुरुषादनन्यः प्राणमयस्तस्य तदन्तःपातित्वाद्धस्तपादादिवदित्यत आह— **तस्यान्नमयस्य । एष एव** समनन्तरोक्तः प्राणमय एव । **शारीरः** शरीरे भवः । **आत्मा** सर्वव्यवहारकारणत्वेनाऽऽत्मा । **यः** प्राणमयः । **पूर्वस्य** प्राणमयात्पूर्वस्य । तस्य पूर्वस्य यः प्राणमय एष एव शारीर आत्मेत्यन्वयः । अयं भावः— प्राणो न च स्थूलशरीरान्तःपाती । तथा च सति नासापुटनिर्गतस्तद्वदेव चाक्षुषः स्यादिति । **तस्माद्वा एतस्मात्प्राणमयात् । अन्योऽन्तर आत्मा मनोमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य यजुरेव शिरः ।**

---

१ ख °स्य पठितत्वात् । अ° ।

ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति । प्राणमयादुक्तात् । मनोमयो मनोविकारः । तस्य यजुर्यजुर्विषया वृत्तिः । ऋगृग्विषया वृत्तिः । साम सामविषया वृत्तिः । आदेशो यजुरृक्सामसु ब्राह्मणमादेशस्तद्विषया वृत्तिः । अथर्वाङ्गिरसोऽथर्वणाऽङ्गिरसा च दृष्टा मन्त्रा ब्राह्मणानि च तद्विषया वृत्तिः । अन्यत्पूर्वेण समानपाठम् । अन्नमयार्थस्थले प्राणमयं प्राणमयार्थस्थले मनोमयं चोक्त्वा पूर्ववद्व्याख्येयम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां द्वितीये ब्रह्मवल्ल्यध्याये तृतीयोऽनुवाकः ॥ ३ ॥

अथ ब्रह्मवल्ल्यध्याये चतुर्थोऽनुवाकः ।

अत्र हि मनोमयस्य चतुर्वेदवृत्तिप्राधान्यमुक्तम् । वेदाश्च ब्रह्मप्रकाशकत्वान्न ब्रह्मणो भिन्नाः । ततो वेदेभ्योऽभिन्नं सर्वस्य जगतः कारणं विशेषतश्च मनसः "तन्मनोऽकुरुत" इति वचनान्मनसाऽप्यगम्यरूपं ब्रह्म वदन्मनोमयं स्तौति—यतः सर्वस्य जगतः कारणाद्विशेषतश्च मनसः सत्यज्ञानानन्दरूपाद्ब्रह्मणः । वाचो यजुरृक्सामादेशादथर्वाङ्गिरसरूपा अन्याश्च । निवर्तन्ते ब्रह्म वक्ष्याम इति संकल्प्य प्रवृत्तास्तस्मिन्ब्रह्मणि प्रवेशमलभमाना नेति वदन्त्यो वाराङ्गना इव राजगृहाभ्याशाद्यथागतं निवृत्य भ्रष्टसंकल्पा भवन्ति । निवृत्तिस्तु प्राप्त्यवप्राप्तौ च संकल्पितस्य दृष्टा । तथा च किं प्राप्य निवर्तन्त इत्याशङ्क्य नेत्याह—अप्राप्याल्लब्ध्वाऽऽनन्दमित्यन्वयः । ननु वागगम्यानामपि जातीचम्पककेतकीकुसुमादिगन्धभेदानां मनसाऽवगतिर्यथा तथाऽस्त्वित्यत आह—मनसा यजुरादिपञ्चवृत्तिमता । सह समम् । आनन्दं हिरण्यगर्भस्याऽऽनन्दादप्यतिशयमनन्तमानन्दम् । ब्रह्मणः सत्यज्ञानादिलक्षणस्य । षष्ठीयं 'शिलापुत्रकस्य शरीरम्' इतिवद्व्याख्येया । विद्वान्साक्षात्कारवान् । साक्षात्कारेणापगताविद्यो द्वितीयाभावान्न बिभेति भयं न गच्छति । कदाचन कदाऽपि । यस्मादेतादृशं ब्रह्मास्य कारणं तस्मादतिश्रेष्ठो मनोमय इति भावः । इतिर्मन्त्रसमाप्तौ । अथवा मनोमयकोशपरिसमाप्तौ पूर्ववदवगन्तव्यम् ।

प्राणस्यैवैकदेशो मन इति शङ्कां वारयति—तस्यैष एव शारीर आत्मा । यः पूर्वस्य । पूर्वस्य प्राणमयस्य । यः प्रसिद्धो मनोमय एष एव शारीर आत्मेत्यन्वयः । व्याख्यातः पदार्थः । अनेन प्राणस्याऽऽत्मत्वं निवारितम् । तस्माद्वा एतस्मान्मनोमयात् । अन्योऽन्तर आत्मा विज्ञानमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य श्रद्धैव शिरः । ऋतं दक्षिणः पक्षः । सत्यमुत्तरः पक्षः । योग आत्मा । महः पुच्छं प्रतिष्ठा । तद-

ष्येष श्लोको भवति। मनोमयादुक्तात्। विज्ञानमयो बुद्धिविकारः। श्रद्धाऽऽस्तिक्यसंपन्नबुद्धिवृत्तिः। ऋतं शास्त्रार्थविषये मानसव्यापारविषया वृत्तिः। सत्यं तस्मिन्नेव वाक्कायाभ्यामनुष्ठीयमाने तद्विषया वृत्तिः। योगः शास्त्रार्थविषये संदेहविपर्ययरहिता वृत्तिः। महः, अनया हि यागाद्यनुष्ठाने मनोभावरबुद्धितत्त्वं प्रथमजं महत्तत्त्वाख्यम्। प्राणमयार्थस्थले मनोमयार्थस्थले विज्ञानमयं पठित्वा शेषं समानपाठं पूर्ववद्व्याख्येयम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां द्वितीये ब्रह्मवल्ल्यध्याये चतुर्थोऽनुवाकः॥ ४॥

अथ ब्रह्मवल्ल्यध्याये पञ्चमोऽनुवाकः।

विज्ञानं बुद्धिः। यज्ञं दर्शादिकं तनुते विस्तारयति। कर्माणि वैदिकानि स्मार्तान्यग्निहोत्रसंध्यावन्दनादीनि लौकिकानि च कृषिवाणिज्यादीनि। तनुते विस्तारयति। अपि च यज्ञविस्तारेणाभ्युच्चयार्थावपिचौ। विज्ञाने कर्मविस्तारादेर्विज्ञानं बुद्धिं देवा वागादयोऽग्न्यादयश्च। सर्वे निखिलाः। ब्रह्म सत्यज्ञानादिलक्षणं ज्येष्ठमतिशयेन वृद्धं कारणमित्यर्थः। ज्येष्ठत्वं विज्ञानस्य ब्रह्मणश्च साम्यं तयोस्तादात्म्योपासनार्थमुक्तमित्यवगन्तव्यम्। उपासते ब्रह्मतादात्म्येनोपासनं कुर्वते। विज्ञानं ब्रह्म व्याख्यातम्। चेद्यदि। वेद वेदव्यतिरिक्तोऽपि जानात्युपासीतेत्यर्थः। तस्माद्विज्ञानब्रह्मोपासनात्। चेद्यदि। न प्रमाद्यति प्रमादं न गच्छति बहिर्मुखो न भवतीत्यर्थः। शरीरे स्थूलशरीरे। पाप्मनो हिरण्यगर्भप्राप्तिप्रतिबन्धकारणानि। हित्वा परित्यज्य। सर्वान्निखिलान्। कामान्कामनाविषयान्। हिरण्यगर्भतादात्म्येन समश्नुते। सम्यक्प्राप्नोति। इतिर्मन्त्रसमाप्तौ विज्ञानमयकोशसमाप्तौ वा पूर्ववत्।

तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्य पूर्वस्य मनोमयस्य यो विज्ञानमय एष एव शारीर आत्मेत्यन्वयः। व्याख्यातः पदार्थः। अनेन मनस आत्मत्वं निवारितम्। तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्माऽऽनन्दमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। [प्रमोद उत्तरः पक्षः]। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा। तदप्येष श्लोको[1] भवति। विज्ञानमयादुक्तात्। आनन्दमय आनन्दविकारः। सोपाधिकानन्द इत्यर्थः। प्रियं पुत्रादिदर्शनजन्यं सुखम्। मोदः पुत्रादिसंभाषणसहासनादिजन्यं सुखम्। प्रमोदः सहाऽऽसनादौ स्थितानामपि पुत्रादीनामन्यानुविधेयत्वजन्यं सुखम्। अभीष्टविषयस्य दर्शनं लाभो भोगश्च प्रियमोदप्रमोदा इत्यर्थः। आनन्दः सुखसामान्यं प्रियमोदप्रमोदेष्वनुगतं सुखम्। ब्रह्म निरतिशय आनन्दो यस्य

१ ख. °क्तो भा°।

मात्रामुपजीवन्ति ब्रह्मादयः । यथा देहावयवाः पादयोः प्राणभेदाः पृथिव्यामुदाने वा वेदाश्च त्रयोऽपि मन्त्रब्राह्मणरूपा अथर्वाङ्गिरःसु दृष्टकर्मसाधनत्वेन यथा बुद्धिभेदाः प्रथमजायां हिरण्यगर्भबुद्धौ च प्रतिष्ठितास्तद्वत्सुखसमान्यविशेषा निरतिशयसुखैकस्वभावे सत्यज्ञानादिरूपे ब्रह्मणि सर्वाधारे प्रतिष्ठिताः । स्थूलस्य देहस्याध्यात्माधिभूताधिदैवभेदाभिन्नस्य ब्रह्मणः प्रथमकोशत्वम् । सूक्ष्मस्य स्थूलात्मभूतस्याज्ञानकार्यस्य क्रियाज्ञानशक्तेश्चतुर्धा भिन्नस्य सकारणस्य कोशचतुष्टयत्वं च । सूक्ष्मोऽपि विभागः स्वयं प्राणनिमित्तं हि स्थूलशरीरस्य सर्वव्यवहारं मत्वा स्थूलशरीरात्मभूतः प्राणः क्रियाशक्तिर्द्वितीयः कोशः । प्राणस्यापि मनसेतस्ततो नीयमानत्वाद्बालेनेव मृत्सेमबलीवर्दस्य । ततोऽनिश्चयात्मिका ज्ञानशक्तिः प्राणात्मभूता मनआख्या तृतीयः कोशः । मनसोऽप्यनिश्चयात्मनो निश्चयपरतन्त्रत्वान्निश्चयात्मिका बुद्धिर्मनआत्मभूता चतुर्थः कोशः । बुद्धेरपि सुखपरतन्त्रत्वादवस्थात्रये कार्यकारणोपाध्यवच्छिन्नसुखं पञ्चमः कोशः । तत्रापि प्रियमोदप्रमोदा जागरणस्वप्नेज आनन्दः सौषुप्ते व्याकृतोपाधिः । इतः परं भूतभौतिककार्यस्य कारणस्य चाभावादकार्यकारणं ब्रह्म सर्वस्याऽऽधारभूतं कोशपञ्चकवाक्प्रवृत्तिकारणनिमित्तं प्रथमसूत्रेण सूचितम् । मन्त्रेण च व्याख्यातमुक्तवती श्रुतिरित्यर्थः । मनोमयार्थस्थले विज्ञानमयं विज्ञानमयार्थस्थल आनन्दमयं च पठित्वा शेषं समानपाठं पूर्ववद्व्याख्येयम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकाया द्वितीये ब्रह्मवल्ल्यध्याये पञ्चमोऽनुवाकः ॥ ५ ॥

अथ ब्रह्मवल्ल्यध्याये षष्ठोऽनुवाकः ।

आनन्दब्रह्मणोरभेदाद्ब्रह्माभिधानमेवाऽऽनन्दाभिधानमिति मन्वानः पठति—असन्नेवा. विद्यमान एव । जनैरज्ञातोऽभिभूतश्चेत्यर्थः । स वक्ष्यमाणः । भवति स्पष्टम् । असद. विद्यमानं खरविषाणसममित्यर्थः । ब्रह्माऽऽनन्दमयस्य पुच्छं कारणं चेत्युक्तेनासत्त्वप्रकारेण । वेद जानाति । चेद्यदि । असत्त्वज्ञानादनर्थमुक्त्वा सत्त्वज्ञानादर्थमाह—अस्ति विद्यते सर्वस्य कारणत्वेन सर्वात्मत्वेन च । ब्रह्मोक्तम् । इत्युक्तेन सत्त्वप्रकारेण । चेद्यदि । वेद जानाति । सन्तं विद्यमानं वाचा मनसा कायेन च पूज्यमित्यर्थः । एनं ब्रह्मास्तित्वज्ञानिनम् । ततो ब्रह्मास्तित्वज्ञानात्कारणात् । विदुर्जानन्ति । सर्वे जना इति शेषः । इतिर्मन्त्रसमाप्त्यर्थमानन्दमय[कोश] परिसमाप्त्यर्थं वा पूर्व-

---

१ क. ग. °प्रजा आं° । २ क. ग. °थर्म सू° ।

वत् । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्य पूर्वस्य विज्ञानमयस्य य आनन्दमय एष एव शारीर आत्मेत्यनयोर्व्याख्यातः पदार्थः ।

अथ कोशपञ्चकाधारब्रह्मास्तित्वनास्तित्वविज्ञानफलकथनानन्तरम् । अतो ब्रह्मणः सर्वात्मत्वं यतोऽस्तिनास्तिप्रत्ययौ च कर्तुं सुशवावस्मात्कारणात् । अनुप्रश्ना ब्रह्मणोऽस्तित्वे नास्तित्वे च तज्ज्ञानिनो ब्रह्मप्राप्त्यप्राप्ती च संदेहमनु प्रश्नाः प्रष्टव्या ईप्सितार्थविषयाः शब्दसंदर्भाः । पठ्यन्त इति शेषः । उतापि अविद्वान्ब्रह्मणि संदेहविपर्ययज्ञानवान् । अमुमानन्दमयकारणभूतं पुच्छरूपं चास्तिनास्तित्वाभ्यामनिश्चितं वस्तुवृत्तेन । लोकं लोक्यमानं स्वयंप्रकाशत्वेन तज्ज्ञानिभिः । प्रेत्य परलोकमागत्य शरीरं परित्यज्येत्यर्थः । कश्चन कोऽपि । गच्छति प्राप्नोति । प्लुतिर्विचारार्था । आहो पक्षान्तरे । विद्वान्ब्रह्मणि संदेहविपर्ययरहितज्ञानवान् । अमुं लोकं प्रेत्य व्याख्यातम् । कश्चित्कोऽपि । समश्नुता ३ । समश्नुते व्याप्नोति । प्लुतिर्विचारार्था । उ अपि । अयं भावः—यद्यस्ति सत्यज्ञानादिलक्षणं ब्रह्म तर्हि प्राप्तव्यमविदुषाऽपि । न ह्यज्ञानसंशयविपर्ययैर्वस्तुनोऽन्यथात्वम् । सर्वात्मकं चेदविद्वान्न प्राप्नोति विद्वानपि न प्राप्नुयान्नियामकाभावात् । अथ नास्ति तर्हि विदुषाऽपि न प्राप्तव्यम् । न हि नरविषाणादिकं तस्मिन्संदेहविपर्ययरहितज्ञानिनाऽपि प्राप्तुं शक्यम् । अथाशेषविशेषशून्यमप्यनेन प्राप्यते तर्ह्यविदुषा न प्राप्यत इति न नियामकं पश्याम इति । अनेनोक्तश्लोकार्थस्याऽऽक्षेपः कृतः ।

आस्तां विद्वदविदुषोः प्राप्त्यप्राप्ती । ब्रह्मणोऽविद्वदप्राप्त्या यत्तस्य नास्तित्वमापादयितुमिष्टं तज्जगत्कारणत्वकथनेन पूर्वोक्तेन पुनः केनचिद्विशेषणाभिधीयमानेन निराकुर्वन्सत्त्वपक्षमर्थादादत्ते—स सूत्रमन्त्राभ्यां ब्रह्मत्वेनोक्त आत्माऽऽनन्दमयस्य कारणभूतः पुच्छभूतश्च प्रसिद्धः । कथमसौ नास्तीत्यर्थः । ननु सतां चेतनानां किंचित्कारित्वं दृष्टमस्य तस्मिन्सत्यस्तित्वं श्रद्धामीत्यत आह—अकामयत कामनामकुरुत । कामनाविषयमाह—बहु स्यां नाना भवेयम् । नानाभवनेऽप्युपायमाह—प्रजायेयोत्पद्येय । इत्यनेन प्रकारेणेमां कामनां कृत्वा । स कामी तपः पर्यालोचनमिदमनेनेत्थत्यादिरूपम् । अतप्यत सृज्यविषयमकरोत् । स कामुकस्तापसः । तप उक्तम् । तप्त्वोक्तविषयं कृत्वा । कार्यकारणादिकं प्रथमं विचार्य निश्चित्य[1] चेत्यर्थः । अनन्तरमिदं विविधप्रत्ययगम्यं कार्यजातं भूतभौतिकं चेतनाचेतनात्मकम् । सर्वं निखिलम् । असृजतोत्पादितवान् । सर्वशब्दार्थमाह-यदिदं किंच । यत्किंचेदं प्रसिद्धमस्तिनास्तीत्यादिप्रत्ययगम्यं यत्किमपि । तत्कार्यजातम् । सृष्ट्वोत्पाद्य । तदेव स्वसृष्टमेव । अयमेवकारो देहलीप्रदीपन्यायेन तदमुना प्राविशदित्यनेन च संबध्यते । अनु कार्यसृष्टिमन्वेवाप्रविष्टोऽपि[2] तु सर्वत्रावस्थानादाकाशवत्प्राविशत्प्रवेशमकरोदेव । प्रविष्टशब्दप्रत्ययविषयोऽभूदित्यर्थः ।

---

१ ख. °त्य वेत्य° । २ ख. °पि स° ।

तदनु कार्यं सृष्टमनु प्रविश्य प्रवेशं कृत्वा । किं तटस्थ एवायं सूत्रधारिवद्गृहं निर्माय तत्र प्रविश्य स्थितः । तथा चाऽऽत्मनो बहुभवनोपायः प्रजायेयेति दृष्टो विपरीत इत्याशङ्क्य नेत्याह—सच्च तेजोबन्नरूपमपि । त्यच्च वाय्वाकाशरूपमपि । चकारौ तद्बुद्धिं समुच्चिनुतः । अभवत्स्पष्टम् । इदं क्रियापदं वक्ष्यमाणेष्वपि चतुर्षु पर्यायेषु संबध्यते । निरुक्तं चानिरुक्तं च । निःशेषमुक्तं, निरुक्तं, घटः पृथुबुध्नोदराकार इत्यादि तद्विपरीतमनिरुक्तं, जातीचम्पककेतकीकुसुमगन्धभेदादि । चकारौ पूर्ववत् । निलयनं चानिलयनं च, आश्रयोऽनाश्रयश्च । चकारौ पूर्ववत् । विज्ञानं चाविज्ञानं च । स्मृतिसंशयविपर्ययनिश्चयादि विज्ञानं तत्कारणं वा चिन्मात्रं वा । तद्विपरीतमविज्ञानम् । चकारौ पूर्ववत् । सत्यं चानृतं च, भावात्मकत्वे सति कश्चित्कुत्रचित्कथंचित्केनचिदपि बाधरहितं सत्यं व्यवहारतो वा बाधरहितम् । तद्विपरीतमनृतम् । चकारौ पूर्ववत् । अस्तिनास्तीतिप्रत्ययविषयः सर्वः कार्यकारणवर्गो ब्रह्म च ब्रह्मैवाभूदित्यर्थः । ननु—स सर्वकारणं सर्वमभूदित्येतावत्प्रतीयते न तु तदसत्यं नेति वचनादित्यत आह—सत्यं सर्वबाधशून्यं भावरूपं ब्रह्म । अभवदुक्तं मूर्तादिकमभवत् । असतः सर्वात्मत्वे सर्वमिदं सर्वैः प्रत्ययैरसदिति प्रतीयेत नरविषाणवन्ध्यापुत्रादिवत् । ततो नासत्सर्वात्मकं किंतु सदेव । प्रतीतेरविश्वासे जीवनादिव्यवहारस्यापि दुर्लभत्वामित्यर्थः ।

किं सदादिकं दशविधं तद्बुद्ध्यश्चेत्येतावदेव सत्यमभवदित्याशङ्क्य नेत्याह—यदिदं किंच । उक्तमनुक्तं चोत्प्रेक्ष्यमाणं यत्किंचेदं निखिलमपीत्यर्थः । तान्निखिलमपि सत्याद्ब्रह्मणोऽभिन्नं तस्मिन्नध्यस्तत्वेन प्रतीयमानं प्रसिद्धम् । सत्यं सत्यशब्दार्हं व्यवहारक्षमत्वेन मूर्तामूर्तत्वेन च । मूर्तामूर्तविभागो भूतपञ्चक एव । तेजोबन्नानि मूर्तानि । वाय्वाकाशावमूर्तौ । कार्यकारणयोरपि मूर्तामूर्तत्वे एवमवगन्तव्ये । कार्यं सर्वः प्रपञ्चो भूतभौतिकरूपो मूर्तं स्थूलत्वात्कारणतः । विद्या त्वमूर्तं तद्विपर्ययादप्रतीयमानत्वेन वा । इति, अनेन प्रकारेण । आचक्षते कथयन्ति ब्रह्मविदः । तत्र सर्वकार्यशून्ये ब्रह्मण्यपि युक्त्यभ्युच्चयार्थस्तच्छब्दः । ब्रह्मणः सत्यत्वेऽन्यस्य चासत्यत्वे युक्तिश्चेयम् । ब्रह्मव्यतिरिक्तं यत्सत्यं तन्नित्यमनित्यं वा । नित्यत्वे कार्यता कार्यत्वे चासत्यत्वमनिच्छतोऽपि प्रामादिकस्वजिह्वाचर्वणवदागतम् । नित्यत्वेऽप्यसर्वगतत्वे सर्वगतत्वेऽपि जाड्यत्वेऽपि भेदे स एव दोषः । तस्माद्ब्रह्मैव सत्यं न त्वन्यत् । ब्रह्मण्यध्यासात्तत्सत्य-

१ ख. बाधार° । २ ख. °तोमूर्तादि° । ३ क. ग. एवं ते° । ४ ख. °च्छतः प्रा° । ५ ख. °सात्तु सत्य° ।

शब्दार्हम् । यथेदंतायामध्यस्तं रजतमिदंशब्दार्हम् । एष श्लोको भवति व्याख्यातम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थ-
बोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां द्वितीये ब्रह्मवल्ल्यध्याये
षष्ठोऽनुवाकः ॥ ६ ॥

अथ ब्रह्मवल्ल्यध्याये सप्तमोऽनुवाकः ।

असद्वै, सत्येऽध्यस्तं सत्यशब्दार्हं सन्नामरूपकर्मात्मकत्वेन स्थवीयो बुद्धिविषयत्वात् । तद्रहितमसत्सत्यज्ञानादिलक्षणं ब्रह्म शास्त्रप्रसिद्धं विद्वत्प्रसिद्धं वा नामरूपक्रियाहीनं जगत्कारणं सद्वा इति वक्तव्ये सत्त्वभ्रमस्य नामरूपक्रियाहीनत्वेनोत्पादादिति कथनार्थमसद्वा इत्याह । इदं विविधप्रत्यगम्यं विश्वम् । अग्रे विश्वोत्पत्तेः प्राक् । आसीद्बभूव । अविद्याशबलं ब्रह्म जगत्कारणमेवाऽऽसीन्न तु कार्यजातमित्यर्थः । ततोऽसच्छब्दाभिधेयात्कारणात् । वै, एव प्रसिद्धं वा । सत्सच्छब्दाभिधेयं स्पष्टनामरूपकर्म । अजायतोदपद्यत । तदविद्याशबलं जगत्कारणम् । अविद्यात्मानमेकं चिदानन्दस्वभावम् । स्वयमात्माऽविद्याया आश्रयो विषयश्च । अकुरुत बहुधा कृतवान् । तस्मादात्मानमा(त्मन आ)त्मनैव बहुधा करणात्ततोऽविद्याश्रयविषयभूतमानन्दात्मस्वरूपं सुकृतम् । स्वार्थेऽयं सोः प्रयोगः । स्वेन स्वंकृतवत्स्व(कृतं स्व)कृतं स्वकृतमेव परोक्षेण सुकृतं पुण्यमुच्यते कथ्यते देवैः । इतिर्मन्त्रसमाप्तौ ।

ननु—"ब्रह्मविदाप्नोति परम्" इत्युपक्रान्तं तत्र किं ब्रह्मेत्याशङ्कायां सत्यादिलक्षणं तत्स्वरूपमभिधाय तत्प्रतिपत्त्यर्थं च तस्याऽऽकाशादिकारणत्वाभिधानप्रसङ्गेन कोशपञ्चकमवतार्य पञ्चमकोशाधारब्रह्मास्तित्वनास्तित्वज्ञानाभ्यामर्थानर्थयोरभिधानेन प्रश्नेषु समागतेषु सन्निर्णयार्थमिदं 'सोऽकामयत' इत्यारभ्य 'सुकृतम्' इत्यन्तमुक्तमस्तु तत्तथाऽपि सर्वकारणब्रह्मावाप्तौ न पुरुषार्थ आनन्दावाप्तेरेव । तथात्वादित्यत आह—यत्प्रसिद्धं जगत्कारणम् । वै स्मर्यमाणं तद्ब्रह्म । सुकृतमविद्यायाः स्वात्मरूपमेव कर्मकर्तृभावेन कृतवत् । रस आनन्दद्रवः । स्वयंप्रकाशमानानन्द इत्यर्थः । वै प्रसिद्धो वैषयिकसुखरूपेण सर्वप्रियतमत्वेन वा स्मर्यमाणो वा । स मोक्षे भावीदानीं परोक्ष एव प्राणिनां रसः । रसं सुकृताभिन्नमानन्दात्मस्वरूपम् । हि यस्मादेव । रसं लब्ध्वेति द्वाभ्यां शृङ्खलान्यायेन संबध्यते । रसमेव न त्वन्यत् । अयमधिकारी लब्ध्वा प्राप्यैव नत्वन्यथा । आनन्दी प्रत्यक्प्रकाशमानानन्दात्मस्वरूपः । भवति स्पष्टम् । तस्मात्पुरुषार्थो ब्रह्मप्राप्तिरित्यर्थः ।

ननु—सुकृतस्य ब्रह्मण आत्माभिन्नस्याऽऽनन्दत्वं भवतोच्यते । प्रतीतिश्च विपरीते-

१ ब. °द् । तत्सहि° । २ ख. °स्तु तथाऽपि ।

त्याशङ्क्य तदुत्तरत्वेनान्यथानुपपत्तिमाह—क आत्मनोऽनानन्दत्व आनन्दात्मन्यतिरिक्तः । ह्रि हीत्यर्थः । एव नाम । कस्तु नामान्यादपानचेष्टां कुर्यात् । को व्याख्यातम् । प्राण्यात्प्राणचेष्टां कुर्यात् । यद्येष स्वयंप्रकाशमानः । आकाशः आकाशवत्सर्वगत आकाशशब्दाभिधेयो वा । देशकालवस्तुपरिच्छेदशून्य इत्यर्थः । आकाश इति सप्तम्यन्तत्वपक्षे हार्दाकाशेऽविद्याशबलित इति व्याख्येयम् । आनन्दः परप्रेमालम्बनत्वेनोपलक्षित आनन्दात्मा । न स्यान्न भवेत् । अयमर्थः— आत्मकामाय सर्वा लौकिक्यो वैदिक्यश्चेष्टाः । प्राणधारणमपि । आत्मा चेद्दुःखं दुःखसाधनं वा स्यात्तदानीं वृश्चिकतज्जन्यदुःखवद्द्वेष्यः स्यात् । दुःखसाधनत्वे वाऽऽत्मार्थं भार्यादिकं प्रियं न स्यात् । ततः सुखत्वं परिशिष्यते । अभावस्यासत्त्वे नामाऽऽत्मनो दुःखाभावत्वं प्रतीतिविरुद्धम् । सुखस्यापि जायमानस्य वेद्यस्याऽऽत्मार्थत्वेन प्रियता दृष्टा । न तु स्वरूपेण । अन्यथा वैर्यादिगतस्यापि तस्य प्रियता स्यात् । तेन नित्यस्वयंप्रकाशमानानन्दात्मा परप्रेमालम्बनत्वेनाङ्गीकरणीयः । परप्रेमालम्बनत्वं च तदर्थलौकिकवैदिकजीवनचेष्टान्यथानुपपत्त्या कल्प्यते । आत्मनोऽनानन्दत्वे न काऽपि चेष्टा स्यादिति । ननु—यद्ययमानन्दरूपस्तर्हि किमर्थमयमानन्दार्थी लोकः साधनमादत्त इत्यत आह—एष आकाश आनन्दात्मा स्वयंप्रकाशमानोऽप्यनाद्यविद्यावृतः । साधनसाध्यादिभावेन व्यवस्थितो हि यस्मात्तस्मादिति शेषः । एवैषशब्देन संबध्यते । एष एव साधनं साध्यं च वस्तुतोऽज्ञातात्मयाथात्म्यसाधनतारतम्येनापसारिताविद्यातारतम्यादाविर्भूतात्मसुखतारतम्यरूपः । अविद्यादशायामानन्दयति- आकीटपतङ्गमाब्रह्म च निखिलं जगदा योनिप्रादुर्भावादा मोक्षसाक्षात्काराच्चाऽऽनन्दयति । आनन्दात्मनि साक्षात्कृते । न साध्यसाधनादि(दी)ति भावः । तत्साक्षात्करणात्प्राक्साध्यसाधनादेरपि वस्तुतस्तदात्मकत्वात्तस्यैव सुखदातृत्वमविरुद्धमित्यर्थः ।

ननु—आत्मनोऽस्तित्वे स्थिते विद्वानेव कदा कथं प्राप्नोतीत्यत आह—यदा यस्मिन्काले । हि यस्माद्विदुषो ब्रह्मप्राप्तौ नियामको हेतुर्हिनोच्यते । ब्रह्मसाक्षात्कारवत्त्वेनापगताविद्यत्वादित्यर्थः । एव, अयं पार्थसारथिवत्कालवाचिना विद्वद्वाचिना लाभवाचिना च संबध्यते । यदैव न त्वन्यदा । एष विद्वानेव न त्वन्यः । एतस्मिन्नात्मनो भेदरहिते सत्ये रसे । अदृश्ये बाह्यान्तरेन्द्रियज्ञानाविषये । अनात्म्य आत्मन इदमात्म्यं त्रिविधं[2] शरीरं न यस्यासावनात्म्यस्तस्मिन् ।

ननु—सर्वज्ञानाविषयोऽशरीरोऽपि वाग्गोचरः पदार्थो नरविषाणादिर्दृश्यत इत्यत आह—अनिरुक्ते निरुक्तिशून्ये वाचामगोचर इत्यर्थः । ननु—वाचामगोचरोऽपि साश्रयः पदार्थो दृष्टो यथाऽविद्या सदसद्युक्त्यविषयेत्यत आह—अनिलयने निल-

१ घ. °मान्यां चेष्टां । २ घ. विविधं ।

यनमाश्रयस्तद्धीने। ननु—प्राकृते प्रलये तत्रैव प्रतिष्ठां सर्वोऽपि विन्दत इत्यत आह—अभयं भयं प्रकृतिस्था: संस्कारा: प्रकृतिश्च भयानकसंसारहेतुत्वात्तच्छून्यमभयामित्यर्थः। अभयं यथा तथेति व्याख्येयम्। प्रतिष्ठामिदमहमस्मीति तादात्म्येन प्रतिकूलसंस्कार-राहित्यलक्षणेन प्रकर्षेण स्थितिम्। विन्दते लभत एव। अथ तदा सोऽस्मिन्प्रतिष्ठां प्राप्तो विद्वान्। अभयं भयमविद्यातत्संस्कारा द्वैतरूपास्तच्छून्यमभयं स्वयंप्रका-शमानानन्दात्मस्वरूपाविर्भावं गतः प्राप्तः। भवति स्पष्टम्। जीवन्मुक्तः सर्वदा भवतीत्यर्थः।

ननु—विद्वानविद्वानपि ब्रह्मणि प्रतिष्ठित एव तस्य सर्वाधारत्वात्ततोऽविदुषोऽपि प्रेतस्य ब्रह्मप्राप्तिः स्यादित्यत आह—यदा यस्मिन्काले। हिर्हेतौ। यस्माद्ब्रह्मणि प्रति-ष्ठितोऽप्यविद्वान्ब्रह्माहमस्मीति ब्रह्म न प्रतिपद्यते निधिस्थ इव जात्यन्धो निधिम्। एव पूर्ववत्। एष प्रसिद्धः संदिहानो विपर्यस्तोऽज्ञानी च। एतस्मिन्स्वात्माभिन्ने ब्रह्मणि, उदपि। अरमल्पम्। अन्तरं भेदम्। कुरुते स्पष्टम्। अथ तदा तस्य संदिग्धस्य विपर्ययस्यस्याज्ञानिनश्च। भयमविद्यातत्कार्यतत्संस्कारजन्यमध्यात्माधिभूताधिदैवभेदाभिन्नं वाचि मनसि कायेऽसह्यदुःखकारणं जन्मादि। भवति ब्रह्मैव संदेहविपर्ययाज्ञानैरुक्त-भयरूपं भवति। स्रगिव सर्पाद्याकारैः। ननु—अविदुषस्तथाऽस्तु यस्तु शास्त्रीये कर्म-ण्यधिकृतो विद्वांस्तस्य ब्रह्मविद इव ब्रह्मप्राप्तिरित्यत आह—तत्त्वेव ब्रह्म भयरूपम्। तुशब्दः शङ्कानिवारणार्थः। शास्त्रीये कर्मण्यधिकृतस्य विदुषो ब्रह्मविदश्च न साम्यं भिन्नाभिन्नबुद्धित्वेन विरुद्धत्वात्। एव तदेव न त्वन्यत्। भयं व्याख्यातम्। विदुषः कर्मविद्याविदः। अमन्वानस्याहं ब्रह्मास्मीत्यभेदेन मननरहितस्य। इदमेव वैषम्यं कर्मब्रह्मविदोः। तत्राऽऽत्मत्वेनाज्ञाते ब्रह्मणि भयंकरेऽपि। एष श्लोको भवति व्याख्यातम्। अपिशब्दसूचिता युक्तिः संक्षेपेणेयम्। अमृतं माता पिता बन्ध्वादि वाऽविपरीतरूपमपि स्वस्येष्टकारित्वेन स्वयं विपरीतगृहीतं तदनिष्टमकुर्वदपि स्वस्यानिष्ट-कारि दृष्टं यथा तद्वद्ब्रह्मापि॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां द्वितीये ब्रह्मवल्ल्यध्याये सप्तमोऽनुवाकः॥ ७॥

अथ ब्रह्मवल्ल्याध्यायेऽष्टमोऽनुवाकः।

भीषा भीत्या। अस्माद्ब्रह्मण आत्मत्वेनाज्ञानात्। वातो वायुः। पवते वाति। भीषा भीत्या। उदेत्युदयं गच्छति। सूर्य आदित्यः। अस्मादित्यनुवर्तते। भीषाऽ-स्माद्व्याख्यातम्। अग्निश्च वह्निरपि दहनादिकं करोतीति शेषः। इन्द्रश्च त्रिलोकीना-

१ ख. °र्यस्तस्या°।

योऽपि त्रिलोकीमवतीति शेषः। आद्यश्चकारोऽनुक्तानां सर्वेषां महतां व्यापारसमुच्चयार्थः। द्वितीयो भीषाऽस्मादिति संबन्धार्थः। मृत्युः स्थावरजङ्गमविनाशकारी। धावति सर्वेषामभावाय सर्वान्प्रति गच्छति। पञ्चमः पञ्चसंख्यापूरणो भीषाऽस्मादित्यनुषङ्गः। इतिः श्लोकसमाप्तौ।

ननु प्रकृता ब्रह्मप्रश्ना व्याख्यातास्तत्रैव ब्रह्मप्राप्तेरपुरुषार्थत्वे शङ्किते प्रसङ्गाद्ब्रह्मण आनन्दरूपत्वमुक्तम्। सोऽयमानन्दो दुःखाभावो भावो वा सातिशयस्ततोऽपुरुषार्थ इत्याशङ्क्याह— सा प्रसिद्धा। एषा वक्ष्यमाणा। आनन्दस्य भावरूपस्य सुखस्य। मीमांसा ब्रह्मविदां सुखकारित्वेन पूजितो विचार आनन्दस्योत्कर्षवत्त्वेनाभावत्वव्यावृत्तिफलो ब्रह्मानन्दस्य सर्वस्मादधिकत्वेनापुरुषार्थत्वव्यावृत्तिफलः। भवति स्पष्टम्।

युवा षोडशवर्षमारभ्याऽऽपलितदर्शनमुपघातमन्तरेण मध्यमं वयो यौवनं तद्वानक्षीणेन्द्रियशक्तिरित्यर्थः। स्याद्भवेत्। यौवनेऽपि स्वभावतः शरीरस्येद्रियाणां वा वैरूप्यं संभावितं रोगादिनिमित्तं वा तन्निवारणार्थमाह—साधुयुवा कन्दर्पसमानरूपः सन्यौवनसंपन्नः। तादृशोऽपि मूर्खो मा भूदित्याह—अध्यायकोऽधीतसाङ्गोपाङ्गवेदः। सर्वज्ञ इत्यर्थः। तादृशोऽपि केवलं स्वोदरंभरिरतिमन्दो वा तद्द्वयं तन्त्रेण वारयति—आशिष्ठोऽतिशयेनाऽऽशास्ताऽतिशयेनाऽऽशुकारी च। अथाप्यतिमन्दत्वाद्वृत्त्यर्थजीवित एवेत्यत आह—दृढिष्ठोऽतिशयेन दृढोऽविकृतवाक्कायमना इत्यर्थः। तादृशोऽपि बलहीनः स्यादित्यत आह—बलिष्ठोऽतिशयेन बलसंपन्नः। एवंभूतोऽपि वित्तहीनः स्यादित्यत आह—तस्योक्तविशेषणविशिष्टस्य। इयं सप्तद्वीपाब्धिवलयलोकमेखला। पृथिवी भूमिः। सर्वा निखिला। वित्तस्य वित्तेन दृष्टादृष्टसुखकरेण गोहिरण्यादिना। पूर्णा परिपूर्णा। स्याद्भवेत्सर्वलक्षणसंपन्नस्य चक्रवर्तिन इत्यर्थः। स सर्वलक्षणसंपन्नस्य चक्रवर्तिनो जायमान आनन्दः। एकः एकत्वसंख्याक्रान्तः। मानुषो मनुष्येषु भवः। आनन्दो भावरूपः सुखात्मा। नातः परं मनुष्याणां सुखमित्यर्थः। ते परोक्षाः। ये प्रसिद्धाः। शतं शतसंख्याका मानुषा आनन्दाः। व्याख्यातम्। वचनं तु विशेषः।

स परोक्षः प्रसिद्धः। एक एकत्वसंख्याक्रान्तः। मनुष्यगन्धर्वाणां मनुष्याः सन्तो जन्मान्तरे गन्धर्वत्वं प्राप्ता मनुष्यगन्धर्वा अन्तरिक्षलोकनिवासिनोऽन्तर्धानादिशक्तिमन्तस्तेषाम्। आनन्दः सुखात्मा। अस्माकं चक्रवर्तिनां यथोक्तगुणविशिष्टानां शतगुणसुखं मनुष्यगन्धर्वाणां परमं सुखमित्यर्थः। श्रोत्रियस्य चाधीतवेदस्याप्यवृजिनत्वं चात्रार्थसिद्धमिति न पठितम्। श्रोत्रियत्वं च चक्रवर्तिनोऽस्य च समानम्। चकारो मनुष्यगन्धर्वानन्दसमुच्चयार्थः। मनुष्यगन्धर्वानन्दप्राप्तौ कारणमाह—अकामहतस्य तथोक्तगुणविशिष्टचक्रवर्तिसुखकामेनानिपातितस्य। तदभिलाषरहितस्येत्यर्थः।

यो हि यत्राभिलाषरहितस्तस्य तद्विषयप्राप्ते शतगुणं सुखं भवतीत्यत एव प्रथमे पर्याये श्रोत्रियस्य चाकामहतस्येति न पठितम्।

ते ये शतं मनुष्यगन्धर्वाणामानन्दाः। स एको देवगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवगन्धर्वाणामानन्दाः। स एकः पितॄणां चिरलोकलोकानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं पितॄणां चिरलोकलोकानामानन्दाः। स एक आजानजानां देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतमाजानजानां देवानामानन्दाः। स एकः कर्मदेवानां देवानामानन्दः। ये कर्मणा देवानपियन्ति। श्रोत्रियस्य चाकामहतस्य। ते ये शतं कर्मदेवानां देवानामानन्दाः। स एको देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवानामानन्दाः। स एक इन्द्रस्याऽऽनन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतमिन्द्रस्याऽऽनन्दाः। स एको बृहस्पतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं बृहस्पतेरानन्दाः। स एकः प्रजापतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य। देवगन्धर्वाणां देवाश्च ते गन्धर्वाश्च देवगन्धर्वास्तेषां चाऽऽकल्पगन्धर्वशरीरप्राप्तिहेतुभूतकर्मणामित्यर्थः। पितॄणां, पितृविशेषणं चिरलोकलोकानां चिरादीर्घस्थायिनो लोकाः कर्मफलविशेषास्ते[1] येषां लोकास्तत्स्थानानि च चिरलोकलोकास्तेषामनेककालस्थायिनामित्यर्थः[2]। आजानजानां[3] कल्पादावुत्पन्नानामाजाने देवलोके जाता आजानजास्तेषाम्। विशेषणमिदम्। विशेष्यमाह—देवानां द्योतनात्मकानाम्। कर्मदेवानाम्। इदं श्रुतिरेव व्याकरिष्यति। पूर्ववद्विशेषणमुक्त्वा विशेष्यमाह—देवानामाजानेभ्य उत्कृष्टानां[4] द्योतनात्मकानाम्। कर्मदेवानामित्येतद्व्याकरोति। ये प्रसिद्धा याज्ञिकाः। कर्मणाऽग्निहोत्राद्यश्वमेधान्तेन। देवान्द्योतनात्मकानपियन्ति प्राप्नुवन्ति। देवत्वमुपगता इत्यर्थः[5]। देवानां त्रयस्त्रिंशत्संख्याकानां हविर्भुजामग्न्यादीनाम्। इन्द्रस्य त्रिलोकीपत्युः(तेः) शक्रस्य। बृहस्पतेर्देवगुरोः। प्रजापतेर्विराजः। ब्रह्मणो हिरण्यगर्भस्य। नवसु पर्यायेषु प्रायः समानपाठम्। शेषं पूर्वं पूर्वं तदाद्यर्थत्वेन व्याकृत्य यथोचितं गन्धर्वादिपदैर्योजनीयम्। अकामहतत्वं च पूर्वपूर्वविषयत्वेन हिरण्यगर्भस्य यावानानन्दस्तावानानन्दो निरतिशयवैराग्य इ (ग्यमि)ति तात्पर्यार्थः। हिरण्यगर्भादुत्कृष्टस्य ब्रह्मानन्दस्य वाङ्मनसयोरगोचरत्वाद्धिरण्यगर्भानन्दमेव

१ क. °विशिष्टास्ते। २ ख. °लोकाः स्मार्तकर्मानुष्ठानपरा देवलोकं प्राप्तास्ते°। ३ ख. °नां श्रौतकर्मानुष्ठातारोऽविद्वांसो देवत्वं प्राप्ताः क°। ४ ख. उत्कटानां। ५ ख. °र्थः। देवाः समुच्चयकारिणो देवयानमार्गगामिनो देवाः। दे°।

ब्रह्मानन्दस्य समुद्रस्योदबिन्दुसमं दिङ्मात्रमुक्त्वोपरराम श्रुतिः। अतः परं स्वयंप्रका-शानन्दात्मैव प्रमाणं नाहमिति श्रुतेरभिप्रायः।

अनेन भावरूपो निरतिशयश्च ब्रह्मानन्द उक्तः। तथाऽपि स तु हिरण्यगर्भादपि परतो देहाद्युपाधिस्थो वा नास्मदादिरूप इत्यत आह—**स** परोक्षो हिरण्यगर्भादुत्कृष्ट आनन्दः। **यश्च** प्रसिद्धोऽपि, अयं स्वयंप्रकाशमानः। **पुरुषे** पञ्चकोशात्मके पुरुष-शब्दाभिधेये ब्रह्मपुच्छत्वेनोक्तः। **यश्च** प्रसिद्धोऽपि। **असौ** परोक्षोऽस्मदादीनां प्रत्य-क्षश्च विदुषः। **आदित्य** आदित्यमण्डले। **चकारौ** पुरुषादित्ययोर्वाचारम्भणमाहत्वुर्वो-क्यद्वयगतौ। **स** आदित्ये पुरुषे च वर्तमानः। **एको** भेदरहितः। यदेत्यादिना यद्यपि विदुषो ब्रह्मप्राप्तिरुक्ता तथाऽपि[1] त्वमसीति नोक्तं तदर्थं प्रासङ्गिकमैक्यमभिधाय पुनस्तत्प्राप्तिमाह—**सोऽ**धिकारी। **यो** यः कश्चन। **एवंविदा**दित्ये पुरुषे च ब्रह्मान-न्दमभेदेन विद्वान्। **अस्मात्**प्रत्यक्षात्। **लोका**द्दृष्टादृष्टसाधनफलात्मकात्। **प्रेत्य** प्रक-र्षेणाऽऽगत्य। मृतवदत्राभिलाषशून्य इत्यर्थः। **एतद्**(मु)क्तम**न्नमयम**न्नविकारम्। **आत्मा-नमि**न्द्रियद्वारा विषयप्रापकम्। **उपसंक्रामति,** अन्नमयमध्यात्माधिभूताधिदैवभेदाभि-न्नमप्यध्यस्तं वस्तुतस्त्वहमेवेदमिति सामीप्येन सम्यगवगच्छति। **एतं प्राणमय-मात्मानमुपसंक्रामति। एतं मनोमयमात्मानमुपसंक्रामति। एतं विज्ञानमयमात्मा-नमुपसंक्रामति। एतमानन्दमयमात्मानमुपसंक्रामति।** स्पष्टम्। पर्यायचतुष्टयमन्न-मयवद्व्याख्येयम्। सर्वात्मत्वज्ञानेनाऽऽनन्दं ब्रह्म प्राप्नोतीत्यर्थः। तदपि तस्मिन्पञ्च-कोशाधिष्ठाने पुच्छरूपे ब्रह्मणि रसे। सर्वानन्दातिशायिन्यधिदैवादिभेदशून्येऽहमस्मी-त्यवगतेऽपिशब्दाद्यो हि यदात्मा भवति सोऽसौ तस्मान्न बिभेति। न च ब्रह्मणोऽन्य-दत्रास्ति किंचिद्ब्रह्माऽऽत्मा चायं ततो नास्य भीतिः कुतश्चिदिति युक्तिरुक्ता। **एष श्लोको भवति** व्याख्यातम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां द्वितीये ब्रह्मवल्ल्यध्यायेऽष्टमोऽनुवाकः॥ ८॥

अथ ब्रह्मवल्ल्यध्याये नवमोऽनुवाकः।

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति। कुतश्चन कस्मादपि। शेषं समानपाठं मनोमयपर्यायवद्व्याख्ये-यम्। पूर्वं यतो मनसः कारणादिति व्याख्यानं मनोमयपर्यायप्रसङ्गात्। इदानीं संकोचे कारणाभावात्सर्वकारणादानन्दात्मन इति व्याख्येयम्। ननु—भीतिरहिताः सन्ति सहस्रशः पुण्यात्मानः संसारिण इत्यत आह—**एतं ह** प्रसिद्धं **वाव न तपति** संतापं न कुरुते। न संतापयतीत्यर्थः। मानसमत्यय इति शेषः। कुत्रेत्यय-

१ ख. 'पि तत्त्वम'।

मभिनयेनाऽऽह—वृद्धादेः शोकजे विचारे किमहं क्षीणशक्तिः। साधु शोभनं पुण्यात्मकं कर्म। नाकरवं न कृतवान्। आः कष्टमिति शेषः। किमहं व्याख्यातम्। पापं श्रुत्यादिनिन्दितं कर्म। अकरवं कृतवान्। आः कष्टमिति शेषः। इत्यभिनयार्थः। अनेन प्रकारेण भयरहितानामपि संसारिणां पुण्यपापाभ्यां भीतिर्नास्य स्पृष्टेत्यभिप्रायः।

ननु—तर्हि किं लोकायतिक इत्याशङ्क्य नेत्याह—सोऽधिकारी। यः प्रसिद्धः। एवं विद्वानहमेव निरतिशयज्ञानानन्दो न मत्तोऽकिंचिद्वस्तुभूतमस्तीति ज्ञानवान्। एते पुण्यपापे। आत्मानमानन्दात्मरूपं नैजं[1] स्पृणुते प्रीणयति। सुकृतदुष्कृते अहमेवास्मीत्यवगच्छतीत्यर्थः। ततो न लोकायतिकसम इत्याह—उभे पुण्यपापे। हि यस्मादेवैष विद्वानेवैते आत्मानं स्पृणुते व्याख्यातम्। सर्वात्मत्वात्पुण्यपापानुष्ठानाननुष्ठानजन्यः संतापो न तु लोकायतिकवन्नारितवयेनेत्यर्थः। तदेतदाह—य एवं वेद प्रसिद्धोऽधिकार्युक्तमानन्दरूपं निर्भेदमात्मत्वेन जानाति। य एवं वेदैष एवैते उभे आत्मानं स्पृणुते हीत्यन्वयः। ततो लोकायतिकाद्विलक्षण इति शेषः। इतिरानन्दवल्लीसमाप्त्युक्तात्मज्ञानानुकरणार्थो वा। उपनिषत्सर्वकारणं सर्वाधारभूतं निरतिशयानन्दैकस्वभावं निर्भेदमपगतसमस्तप्रपञ्चं ब्रह्माहमस्मीति सामीप्येन नितरां गमयित्वाऽहंममादिबन्धनानि शिथिलीकृत्याविद्यां सकार्यां ससंस्कारां सादयति विनाशयतीत्युपनिषद्ब्रह्मविद्याप्रतिपादको ग्रन्थो वोपनिषत्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां द्वितीये ब्रह्मवल्ल्यध्याये नवमोऽनुवाकः॥ ९॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मपूज्यपादशिष्यस्य श्रीशंकरानन्दस्य कृतौ तैत्तिरीयोपनिषद्दीपिकायां द्वितीयो ब्रह्मवल्ल्यध्यायः समाप्तः॥ २॥

अथ तृतीयो भृगुवल्ल्यध्यायः।

तत्र प्रथमोऽनुवाकः।

उक्ता ब्रह्मविद्या। ब्रह्मावगतौ चोपाया अन्नमयादयः पञ्च कोशाः। तांश्चेत्तथाऽवगन्तुमशक्तः कुतश्चित्प्रतिबन्धात्, तस्य तत्प्रतिबन्धकारणापाकरणभूतानि तपआदीनि। तपसि कारणे च ब्रह्मदृष्टिं विधातुं प्रसङ्गादुपासनान्तरार्थमपीयं वल्ल्यारभ्यते। तत्राऽऽख्यायिका गुरूपदेशाद्ब्रह्मविद्याप्राप्तत्वं दर्शयितुं विद्यां स्तोतुं च। भृगुर्नामतः। वै

---

१ ख. नैनं स्पृ°।

प्रसिद्धः । वारुणिर्वरुणस्यापत्यं वारुणिः । वरुणं वरुणनामानं पितरं भृगोर्जनकमुप-ससार शास्त्रदृष्टेन मार्गेण विद्यार्थं समीपमागतवान् । आगत्य चेदमूचे—अधीह्यध्ययनं कुरु । अयमर्थः—स्मरसि त्वं ब्रह्म, ततो मह्यं वद । भगवो भगवन्हे पूजावन् । ब्रह्मातिशयेन वृद्धं जगज्जन्मादिकारणमित्यनेन मन्त्रेणोपससार । अनन्तरं पिता तस्मै भृगव एतद्वक्ष्यमाणं प्रोवाच प्रकर्षेणोक्तवान् । अन्नमद्यतेऽत्ति च शरीरमध्यात्मादि-भेदभिन्नम् । प्राणं शरीरान्तर्वर्तित्वेन वायुमचारमेव क्रियाशक्तिम । इदानीं ज्ञानक्रिया-शक्तीनि भोगसाधनान्याह—चक्षू रूपग्रहणकारणम् । श्रोत्रं शब्दोपलब्धिकारणम् । उपलक्षणमिदं त्वग्रसनघ्राणानाम् । मनः सर्वकरणसाधारणमन्तःकरणं ज्ञानशक्तिः (क्तिम्) । वाचं वक्तव्यकारणभूताम् । उपलक्षणमिदं पाणिपादपायूपस्थानाम् । इत्यनेन प्रकारेण । अयमर्थः- भोग्यं भोक्ता भोगसाधनं चेति समग्रोऽपि प्रपञ्चस्तं ब्रह्मलक्षणं च कथयिष्यामि । यावच्चास्याऽऽत्मज्ञानं न भविष्यति तावत्पण्डितंमन्यः कश्चित्कचिद्ब्र-ह्मोपासनं करोतु । तेनोपासनेन क्षीणपापो ब्रह्मावगन्तुं शक्यते न त्वन्यथेति । तद-भिप्रायेण श्रुतिराह—तमुपदिष्टप्रपञ्चम् । ह किल । उवाचोक्तवान्वरुणः । यतोऽभिन्न-निमित्तोपादानात् । वै प्रसिद्धानि । इमानि विविधप्रत्ययगम्यानि । भूतान्याकाशा-दीनि स्वेदजादीनि च । जायन्त उत्पद्यन्ते । येन जीवनकारणेन जातान्युत्प-न्नानि सन्ति । जीवन्ति प्राणधारणोपलक्षितां स्थितिं कुर्वन्ति । यल्लयस्थानं घटस्येव मृत् । प्रयन्ति गच्छन्ति स्वस्वकार्यस्वभावं परित्यजन्ति सन्तीत्यर्थः । अभिसंविशन्ति सर्वतः सम्यक्प्रवेशं कुर्वन्ति । तदुक्तलक्षणं जगज्जन्मस्थितिध्वंसकारणम् । विजिज्ञा-सस्व विशेषेण 'अहं तदस्मि' इति ज्ञातुमिच्छां कुरु जानीहीत्यर्थः । ननु मया ब्रह्म पृष्टं, भवताऽन्यदुच्यत इत्यत आह—तदुक्तलक्षणं ब्रह्म ब्रह्मशब्दाभिधेयं नान्यदित्यर्थः । इतिः पितुर्वचनसमाप्तौ ।

स श्रुतपितृवाक्यो भृगुः । तपः पर्यालोचनमन्नादिषूक्तेषु लक्षणाक्रान्तं कतमदि-त्येवंरूपम् । अतप्यत कृतवान् । अथवा स्वधर्मवृत्तित्वं तपः कृच्छ्रचान्द्रायणादि वा । अस्मिन्पक्षे तपसा शुद्धान्तःकरणस्य मनस इन्द्रियाणां चैकाग्र्यं जायत इति व्याख्येयम् । स तापसो भृगुः । तप उक्तरूपम् । तप्त्वा संपाद्य ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबो-
धिन्यां तैत्तिरीयोपनिषद्दीपिकायां तृतीये भृगुवल्ल्यध्याये
प्रथमोऽनुवाकः ॥ १ ॥

अथ भृगुवल्ल्यध्याये द्वितीयोऽनुवाकः ।

अतिस्थवीय(यो) बुद्धित्वेनान्नं ब्रह्मान्नमेव ब्रह्मलक्षणाक्रान्तं ब्रह्मशब्दाभिधेयम् । इत्यनेन प्रकारेण व्यजानाद्विशेषेणावगतवान् ।

तद्विज्ञानप्रकारं श्रुतिराह—**अन्नादुक्तात्** । हि यस्मात् । **एवान्नादेव न** त्वन्यस्मात् । **खलु** निश्चितम् । **इमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्ति,** व्याख्यातम् । यत्पदस्थलेऽन्नपदमिति विशेषः । **इत्य**नेन प्रकारेण । तदन्नं ब्रह्मरूपं **विज्ञाय**ावगत्य प्रत्यक्षेणोपपत्त्या चान्नस्य नाशमवलोक्यान्नताब्रह्मलक्षणभ्यां संशयाविष्टहृदयः । **पुनर्भूय एव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । त१ होवाच ।** व्याख्यातम् । वरुणं पितरमुपससारैवेत्यन्वयः । **तपसा** व्याख्यातेन त्वया स्वयं ज्ञानेनोपायेनेत्यर्थः । **ब्रह्म विजिज्ञासस्व** पर्यालोचनेन ब्रह्मणोऽवगतिं कुरु ।

इदानीमुपेयदृष्ट्या स्तौति— **तपो ब्रह्म** ब्रह्मप्रतिपत्त्युपायभूतं तपो ब्रह्मोपेयमित्यनेनार्थादिदमुक्तं ब्रह्मज्ञानार्थिना नित्यानित्यवस्तुविवेकादिकं साधनं संपादनीयम् । तत्संपादयितुमशक्तश्चेत्तस्मिन्ब्रह्मदृष्टिं कुर्यादिति । अन्यथाऽत्र वक्ष्यमाणपर्यायत्रये च तपो ब्रह्मेत्यभिधानं व्यर्थं स्यात् । **स तपोऽतप्यत । स तपस्तप्त्वा ।** [व्याख्यातम्] ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां तृतीये भृगुवल्ल्यध्याये द्वितीयोऽनुवाकः ॥ २ ॥

अथ भृगुवल्ल्यध्याये तृतीयोऽनुवाकः ।

प्राणो ब्रह्मेति व्याजानात् । प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । त१ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां तृतीये भृगुवल्ल्यध्याये तृतीयोऽनुवाकः ॥ ३ ॥

अथ भृगुवल्ल्यध्याये चतुर्थोऽनुवाक ।

मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते । मनसा जातानि जीवन्ति । मनः प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । त१ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविराचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां भृगुवल्ल्यध्याये चतुर्थोऽनुवाकः ॥ ४ ॥

---

१ ख. °दिनाऽनुसंधानं ।

अथ भृगुवल्ल्यध्याये पञ्चमोऽनुवाकः ।

विज्ञानं ब्रह्मेति व्यजानात् । विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते । विज्ञानेन जातानि जीवन्ति । विज्ञानं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां भृगुवल्ल्यध्याये पञ्चमोऽनुवाकः ॥ ५ ॥

अथ भृगुवल्ल्यध्याये षष्ठोऽनुवाकः ।

आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति ।

यथाऽन्नस्य विनाशित्वं दोषो ब्रह्मत्वे तथाऽचेतनत्वं प्राणस्य, अनिश्चयात्मकत्वं मनसः, सुखदुःखभोक्तृत्वं विज्ञानस्य च दोषः । यद्यपि चक्षुः श्रोत्रं मनो वाचमित्युपदिष्टं न विज्ञानमिति तथाऽपि क्रियाशक्तीनां वागादीनां ज्ञानशक्तीनां च चक्षुरादीनां प्राणमनःसमानयोगक्षेमत्वात्पृथक्तद्विज्ञानं च नोक्तम् । मनसोऽपि विज्ञानतन्त्रत्वान्मनसाऽभिधीयमानत्वेन विज्ञानमप्यर्थादुक्तमेव । ततस्तद्दर्शनं दोषदृष्ट्वा पितरं प्रत्यागमनं चेत्यविरुद्धम् । प्राणमनोविज्ञानानि प्राणमयमनोमयविज्ञानमयकारणान्यानन्दश्चाऽऽनन्दमयकारणम् । पुच्छं च तस्य ब्रह्मशब्दाभिधेयो मुख्यः । ततोऽस्य दर्शनानन्तरं पितरं प्रत्यागमनाभावः । **स तप** इत्यारभ्येतीत्यन्ताः प्राणमनोविज्ञानानन्दपर्यायाश्चत्वारोऽपि समानपाठा अन्नपर्यायवद्व्याख्येयाः ।

इदानीमाख्यायिकासिद्धमर्थं श्रुतिराह विद्यास्तुतये—**सा** प्रसिद्धा । **ए**षेदानीमुक्ता । **भार्गवी** भृगुणाऽवगता भार्गवी । **वारुणी** वरुणेन प्रोक्ता वारुणी । **विद्या** ब्रह्मविद्या । **परम** उत्कृष्टे । **व्योमन्**व्योम्न्यानन्दात्मनि । **प्रतिष्ठिता**ऽवस्थानं प्राप्ताऽनन्दात्मन्येव पर्यवसितेत्यर्थः ।

इदानीमानन्दात्मविज्ञानोक्तं फलमाह—[**स** प्रसिद्धः] । **यो**ऽधिकारी । **एव**मन्नप्राणमनोविज्ञानेभ्योऽन्तरतम आनन्दोऽहमस्मीति । **वेद** जानाति । साक्षात्करोतीत्यर्थः । **प्रतितिष्ठति,** एवं ज्ञानवान्सोऽयमविद्यासंस्कारशून्यो ब्रह्मण्येवावतिष्ठते । [1]अत्रैवं प्रतिपत्तुमशक्तोऽन्नादिकोशपञ्चककारणे ब्रह्मदृष्टिं कुर्यात् । सोऽप्यन्तःकरणशुद्धिद्वाराऽस्मिञ्शरीरे शरीरान्तरे वा प्रतितिष्ठति ।

---

१ ख. अथ चैवं । घ. अथवैवं ।

य एवं वेदेत्यनेनान्नादिषु ब्रह्मदृष्टेरप्यभिधातुं शक्यत्वात्तादृशस्य प्रलोभनार्थं दृष्टं फलान्तरमप्याह—अन्नवानित्यमन्नसंपन्नः । अन्नादोऽन्नभक्षको नीरोग इत्यर्थः । भवति स्पष्टम् । महानधिकः । भवति स्पष्टम् । कथं—प्रजया पुत्रादिसंतत्या । पशुभिर्गवादिभिः । ब्रह्मवर्चसेन ब्राह्मणजात्युचिततेजसा । न केवलमेवं किंतु महानधिकः । कथं—कीर्त्या यशसा । प्रथमो महच्छब्दस्तस्मिन्विद्याधिक्यमाह । द्वितीयस्तु प्रजादीनां कीर्त्यन्तानाम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां तृतीये भृगुवल्ल्यध्याये षष्ठोऽनुवाकः ॥ ६ ॥

अथ भृगुवल्ल्यध्याये सप्तमोऽनुवाकः ।

इदानीमस्यान्नब्रह्मोपासकस्य व्रतमाह—अन्नमदनीयं न निन्द्यान्निन्दां न कुर्यात् । तदन्नानिन्दनं व्रतं व्रतधारणम् । पूर्वमन्नमन्नादश्च यथास्थितमुपासनीयमिति सिद्धवत्कृत्येदानीं वैपरीत्यमाह-प्राणो वै पञ्चवृत्तिरेव । अन्नमदनीयम् । शरीरं स्थूलो देहः । अन्नादमन्नभक्षकम् । अन्नाश्रयत्वात् । प्राणे पञ्चवृत्तौ शरीरमुक्तं तदधीनस्थितित्वेन प्रतिष्ठितं प्रतिष्ठां प्राप्तम् ।

इदानीं वैपरीत्यमाह—शरीरे प्राणः प्रतिष्ठितः । स्पष्टम् । तदुक्तम् । एतच्छरीरं प्राणरूपं प्रत्यक्षम्[1] । अन्नमदनीयम् । शरीरं प्राणश्च । अन्ने शरीरे प्राणे च प्रतिष्ठितमवस्थितं वंशतृणादिष्विव गृहं, गृहे च वंशतृणादि । स प्रसिद्धः । यो यः कश्चनोपासकः । एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति । प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या । एतदन्नमन्ने प्रतिष्ठितं वेद जानाति । जानीयादित्यर्थः । व्याख्यातमेतत् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां तृतीये भृगुवल्ल्यध्याये सप्तमोऽनुवाकः ॥ ७ ॥

अथ भृगुवल्ल्यध्यायेऽष्टमोऽनुवाकः ।

अन्नमुक्तं न परिचक्षीत दीयमानमन्नं न निराकुर्यात्पात्रस्थं वा न परित्यजेत् । तदन्नापरित्यागलक्षणं व्रतं व्रतधारणम् । इतः परं मनो विज्ञानं चेति वक्तव्यं यद्यपि तथाऽपि तयोरपि भूतकार्यत्वात्प्राणशब्देन वायुभूतमङ्गीकृत्यान्नशब्देन भौतिकं भूतप्रसङ्गं प्रस्तावयति—आपो वा अन्नम् । ज्योतिरन्नादम् । अप्सु ज्योतिः प्रति-

---

१ ख. ˚रं प्रत्यक्षं प्रा˚ ।

ष्ठितम् । ज्योतिष्यापः प्रतिष्ठिताः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति । प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या । आपो द्रवात्मिकाश्चतुर्गुणाः । ज्योतिः प्रकाशात्मकं त्रिगुणम् । शेषं प्राणशरीरपर्यायवत्समानपाठं व्याख्येयम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां तृतीये भृगुवल्ल्यध्याये ऽष्टमोऽनुवाकः ॥ ८ ॥

अथ भृगुवल्ल्यध्याये नवमोऽनुवाकः ।

अन्नमुक्तं बहुविधं शास्त्रोक्तैरुपायैर्याजनादिभिः कुर्वीत स्पष्टम् । तदन्नबहुकरणं व्रतं व्रतधारणम् । पृथिवी वा अन्नम् । आकाशोऽन्नादः । पृथिव्यामाकाशः प्रतिष्ठितः । आकाशे पृथिवी प्रतिष्ठिता । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति । प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या । पृथिवी कठिना पञ्चगुणा । आकाशश्छिद्रात्मा शब्दगुणः । शेषं समानपाठमब्ज्योतिःपर्यायवद्व्याख्येयम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां तृतीये भृगुवल्ल्यध्याये नवमोऽनुवाकः ॥ ९ ॥

अथ भृगुवल्ल्यध्याये दशमोऽनुवाकः ।

न कंचन कमपि चण्डालान्तं ब्राह्मणादिकं वसतावद्य रात्रौ त्वद्गृहे वासं करिष्यामीति वसतिनिमित्तं समागतम् । प्रत्याचक्षीत न निराकुर्वीत । तद्वसतिनिमित्तं समागतानिवारणं व्रतं व्रतधारणम् । एवमेतान्युपासनानि सव्रतानि समानफलत्वादिच्छाविकल्पार्थानि । उक्तफलकाम उक्तेष्वन्यतममुपासनं कुर्यादित्यवगम्यते । अत्र च भूताश्चकस्य भौतिकस्य च परस्परमुपकार्योपकारकभावकथनेन सर्वाद्वैते पर्यवसानं तद्दर्शितमिति तात्पर्यार्थः ।

इदानीं ब्रह्मज्ञानोत्पादे सम्यक्तममन्नदानं कारणं तथाऽ(द)न्नमन्तरेण कर्तुमशक्यं वसतावप्यप्रत्याख्यानं नान्नमन्तरेण स्यात् । न हि पूर्णोदरा अप्रार्थितान्ना वसत्यर्थं गृहस्थस्य गृहेष्वागच्छन्तो दृश्यन्ते किंतु क्षुधार्ता एव । ततोऽन्नसंपादनार्थं गृहस्थाश्रमवासिना मुमुक्षुणाऽपि महान्यत्नः करणीय इत्याह—तस्माद्यस्मादन्नमन्तरेण न पुरुषार्थसिद्धिर्गृहस्थस्य ततो यया कया च येन केनापि विधया, उपायप्रकारेण याज-

---

१ ख. °र्शं प° ।

ाधन्यतमेनेत्यर्थः। बहुविकमन्नं नीव्रादिकं प्राप्नुयाद्भवेत्। यद्यप्यन्नं [बहु] कुर्वीतेत्यनेनैव ादुक्तं तथाऽपि तद्व्रतमित्यभिधानादुपासनाङ्गोऽयं नियमविधिरितिबुद्धिनिवारणार्थं वातन्त्र्येण पुरुषार्थत्वं दर्शयितुं पुनराह।

ननु—अन्नं स्वोपभोगायैव संपाद्यं न त्वन्यस्मै दानाय, प्रमाणाभावादित्यत आह— भराधि। संसिद्धम्। अस्मै गृहे समागतायातिथये। अन्नमदनीयम्। इत्यनेन प्रकारेण स्वभार्यादीन्प्रति। आचक्षते कथयन्ति। विद्वांसो गृहस्थाः। अनेन गृहस्थप्रसिद्धिः प्रमाणमन्नदाने कथिता।

इदानीं दीयमानेऽन्ने देशकालपात्रश्रद्धासत्कारादिसंपत्तिरङ्गमित्येतदर्थं यथा दत्तं ःथैव फलं भवतीत्याह—एतद्वै प्रसिद्धम्। मुखतो मुखे मुख्ये देशे काले पात्रे च मुख्यया श्रद्धाप्रणिपातसत्कारादिरूपया वृत्त्या मुख्यमन्नमदनीयम्। राद्धं संसिद्धम्। दत्त-मित्यर्थः। यदि तदा मुखतो मुख्ये देशे काले मुख्यया वृत्त्या मुख्यं मुख्याय। अस्मा अन्नस्य दात्रे। अन्नमदनीयम्। राध्यते संसिद्धं भवति। एतद्वै मध्यतोऽन्नं राद्धम्। मध्यतोऽस्मा अन्नं राध्यते। एतद्वा अन्ततोऽन्नं राद्धम्। अन्ततोऽस्मा अन्नं राध्यते। मध्यतो मध्यमदेशे काले पात्रे च मध्यमया वृत्त्या मध्यमम्। अन्ततोऽन्ते जघन्यदेशे काले पात्रे च जघन्यया वृत्त्या तिरस्कारादिरूपया जघन्यम्। व्याख्यातमन्यत्पर्यायद्वयेऽपि यत्र देशे यस्मिन्काले यद्वर्णाश्रमिणे यादृशाचाराय यस्मिन्वयसि यद्दत्तमन्नमन्यद्वा दातुरपि तस्मिन्देशे तस्मिन्काले तद्वर्णाश्रमिणस्तादृशाचारस्य तस्मिन्वयसि तादृशं तदन्नमन्यद्वा संपद्यत इत्यर्थः।

इदानीं यथोक्तविशेषणविशिष्टस्य दाने यत्फलमुत्कृष्टं तदेव तद्दानज्ञानेऽपीत्याह— योऽन्नदानस्य फलाभिज्ञः। एवमुक्तेन प्रकारेण। वेदान्नदानफलमुत्तममुपास्ते। सोऽपि मुख्य(ख)तोऽन्नं लभत इति शेषः। तस्मान्मुखतोऽन्नं देयमिति संदर्भार्थः। एवमन्नप्राण-मनोविज्ञानाना कार्यरूपेण केनचित्कारणरूपेण चोपासनान्युक्त्वेदानीमानन्दस्य ब्रह्मण उपासनान्याह—क्षेम प्राप्तस्य रक्षणम्। इत्यनेन प्रकारेण। वाचि वागिन्द्रिये मदीया वांग्ब्रह्मरूपेत्युपासीत। तदुपासनाच्च क्षेमरूपं फलमिति तात्पर्यार्थः। अत्र क्रियापदादर्शन उपासीतेत्यध्याहारः। फलादर्शने च गुणानुरूपं फलमिति सर्वत्रावगन्तव्यम्।

योगक्षेमः, अप्राप्तस्य प्राप्तिर्हि योगः। प्राप्तस्य परिरक्षणं क्षेमः। तदुभयरूप

---

१ ख. गृहस्थ°। २ ख. ब्राह्मणाः। ३ ख. °हस्थान्प्रति प्रमा°। ४ ख. कथितम्। ५ ख. प्रख्यायास्मा अन्नदात्रेऽन्न°। ६ ख. वाक्क्षेमब्रह्म°।

आनन्दो योगक्षेमः। इत्यनेन प्रकारेण। प्राणापानयोः स्पष्टम्। कर्म व्यापाररूपं ब्रह्म। इत्यनेन प्रकारेण। हस्तयोः स्पष्टम्। गतिर्गमनव्यापाररूपं ब्रह्म। इत्यनेन प्रकारेण। पादयोः स्पष्टम्। विमुक्तिर्मलविमोचनव्यापाररूपं ब्रह्म। इत्यनेन प्रकारेण। पायौ गुदेन्द्रिये। इत्यध्यात्मोपासनासमाप्त्यर्थः। मानुषीर्मनुष्यसंबन्धिनीः। समाज्ञाः सम्यगाज्ञा उपासनाः। जानीयादिति शेषः।

अथ मानुष्युपासनाकथनसमनन्तरम्। दैवीर्देवसंबन्धिनीः। समाज्ञा इत्यनुषङ्गः। कथयामीति शेषः। तृप्तिर्ब्रह्माशनपानजा तुष्टिः। इत्यनेन प्रकारेण। वृष्टौ वर्षकरकासु मेघोदरान्निर्गतासु नीरधारासु। बलं ब्रह्मभूयसामर्थ्यमिभवकारणं सत्त्वम्। इत्यनेन प्रकारेण। विद्युत्यचिरप्रभायाम्। यशः कीर्तिरूपं ब्रह्म। इत्यनेन प्रकारेण। पशुषु गवादिषु। ज्योतिः प्रकाशरूपं ब्रह्म। इत्यनेन प्रकारेण। नक्षत्रेषूडुषु। प्रजातिर्ब्रह्म प्रजननरूपम्। अमृतं ब्रह्म प्रियालिङ्गनदर्शनादिरूपं मैथुनं क्षुद्रसुखरूपम्। आनन्दो ब्रह्म मैथुनक्रियानिवृ(र्वृ)त्तिजं सुखं पुत्रफलम्। इत्यनेन प्रकारेण। उपस्थ उपस्थेन्द्रिये। सर्वं निखिलमाकाशादिवाक्कार्यजातं ब्रह्म। इत्यनेन प्रकारेण। आकाशे भूताकाशेऽव्याकृते वा। तद्ब्रह्म। प्रतिष्ठा प्रतितिष्ठत्यस्मिन्कार्यकारणजातमिति प्रतिष्ठा। सर्वाधार इत्यर्थः। इत्यनेन प्रकारेण। उपासीतोपासनं कुर्यात्।

तत्र फलमाह—प्रतिष्ठावानाधारवान्भवति स्पष्टम्। तन्मह इत्युपासीत। महान्भवति। महो व्याहृतिरूपं तेजो वा। महान्सर्वस्मादभ्यधिकः। व्याख्यातमन्यत्। तन्मन इत्युपासीत। मानवान्भवति। मनः संकल्पविकल्पात्मकम्। मानोऽभिमानो मननं वा तद्वान्। अभिमानपक्षेऽखण्डिताभिमान इत्यर्थः। व्याख्यातमन्यत्। तन्नम इत्युपासीत। नमो नमनगुणवत्। व्याख्यातमन्यम्।

तत्र फलमाह—नम्यन्ते नता भवन्ति। प्राप्नुवन्तीत्यर्थः। अस्मै ब्रह्म नम इत्युपासकाय। कामाः कामनाविषयाः पुत्रादयः। तद्ब्रह्मेत्युपासीत। ब्रह्मवान्भवति। ब्रह्म परिवृढं वेदरूपं वा। तद्वान्ब्रह्मवान्। परिवृढपक्षे स्वयं परिवृढो भवतीत्यर्थः। व्याख्यातमन्यत्। तद्ब्रह्म ब्रह्मणोऽसङ्गोदासीनस्य। परिमरः। परिम्रियन्ते विद्युद्वृष्टिश्चन्द्रमा आदित्योऽग्नी रश्मिरिति वायुः परिमरस्तज्जनक आकाशोऽपि परिमरः। अथवा सर्वविनाशकः कालः परिमरः। ब्रह्मणा संबद्धश्च स इत्याकाशः। परिमरगुणविशिष्टः काल एव वा। सर्वोपसंहारकार्ये। इत्यनेन प्रकारेण। उपासीतोपासनं कुर्यात्। पर्येणं सर्वत उपासकं म्रियन्ते विनश्यन्ति। द्विषन्तो द्वेषं

---

१ ख. °ग्नीरश्मिरिति।

कुर्वन्तः। सपत्नाः कामादयो बाह्या वा वैरिणः। सपत्नीमातृजा वा। स्वस्य प्रिया अप्यसाधुत्वादज्ञानाद्वा। परि सर्वतः। ये प्रसिद्धाः। अप्रियाः कर्णनेत्रमनोदाहकाः। स्वस्य भ्रातृव्या वैरिणो द्विषन्तोऽपि, अयमस्माकं वैरी, अस्यानिष्टमस्माभिः करणीयमित्युपासके संकल्पयन्त उपासको वैते मयि वैरिण इति संकल्पं करोति येषु वैरमकुर्वाणेष्वपि ते सर्वे विनश्यन्तीत्यर्थः।

एवमानन्दे ब्रह्मण्युपासनान्युक्त्वेदानीं स्थिरचेतसमधिकारिणमुपलभ्य पूर्ववल्ल्युक्तमेवाधिदैवादिभेदरहितमानन्दात्मानमाह—**स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः। स य एवं वित्। अस्माल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसंक्रम्य। एतं प्राणमयमात्मानमुपसंक्रम्य। एतं मनोमयमात्मानमुपसंक्रम्य। एतं विज्ञानमयमात्मानमुपसंक्रम्य। एतमानन्दमयमात्मानमुपसंक्रम्य।** व्याख्यातं पूर्ववल्ल्याम्। इयांस्तु विशेषः—पूर्वं विदेहकैवल्यस्याभिधानात्पञ्चकोशेषु ल्टः प्रयोगः। इदानीं तु जीवन्मुक्तेरभिधानात्तेष्वेव ल्यपः प्रयोगः।

इमान्लोकान्कामान्नी कामरूप्यनुसंचरन्। इमान्भूरादींल्लोकान्कर्मफलभूतान्। कामान्नी कामं यथाभिलाषमन्नमदनीयमस्यास्तीति कामान्नी। कामरूपी कामं यथाभिलाषं रूपमस्यास्तीति कामरूपी। अनुसंचरन्नात्मसाक्षात्कारमनु, इमांल्लोकान्सम्यक्चरन्पर्यटन्मानुषेण शरीरेणाऽऽधिकारिकेण वा। **एतत्साम गायन्नास्ते।** एतद्वक्ष्यमाणं लोकानुग्रहार्थम्। साम समत्वप्रतिपादकं वचनं संसारशूलार्पितान्प्राणिनो निरीक्ष्य भृशं करुणाक्रान्तमना गायन्नत्युन्नतान्शब्दान्कुर्वन्। दग्धपटन्यायेन *शरीरं गृहीत्वाऽऽस्ते तिष्ठति। अतः संगच्छत हे जना मा संसारशूले पततेति श्रुतेः करुणावस्या मातुरिवाभिप्रायः। **हा३वु। हा३वु। हा३वु।** लोकत्रयीस्थासंबोधयति वचनत्रयेण। अहो अहो अहो इति प्लुतिः पदत्रयेऽप्याश्चर्यार्था। **अहम्,** आनन्दात्माऽसक्तोदासीनोऽनाद्यनिर्वाच्याविद्यया। **अन्नम्** अदनीयमुपभोग्यमित्यर्थः। इदं भूर्लोकस्थान्प्रति। **अहमन्नमहमन्नम्** व्याख्यातम्। अन्तरिक्षस्वर्लोकस्थान्प्रति वचनद्वयम्। **अहं** व्याख्यातम्। **अन्नादः** अन्नमत्तीत्यन्नादो भोक्ता। इदं भूर्लोकस्थान्प्रति। **अहमन्नादोऽ३हमन्नादः,** व्याख्यातम्। इदमन्तरिक्षस्वर्लोकद्वयस्थान्प्रति।

इदानीं कीर्तिकारित्वमपि स्वस्यैवेति लोकत्रयीस्थान्प्रति पूर्ववत्कथयति—**अह॰**

---

* यथा दग्धोऽपि पटः किंचित्कालपर्यन्तं स्वाकारं न जहाति तथा ज्ञानाग्निदग्धकर्मा बाधितापेक्षयेण नष्टमपि शरीरं धृत्वा करुणाक्रान्तो गायन्नास्त इति भावः।

---

१ क. ख. अपि सा॰। २ क. ग. 'नप्रवणः। अ॰।

श्लोककृदहं श्लोककृदहं श्लोककृत् । श्लोकः कीर्तिस्तां करोतीति श्लोककृत् । व्याख्यातमन्यत् । पूर्वं वाक्यत्रयेण संबोधनेनाऽन्नाऽन्नादश्लोककृत्त्वमात्मन उक्त्वा लोकत्रयीं प्रति विभागेन कार्यकारणरूपत्वमात्मन आह—अहमानन्दात्मा । अस्मि भवामि । प्रथमजाः प्रथमजो हिरण्यगर्भ इत्यर्थः । ऋता३स्य, ऋतस्य मूर्तामूर्तात्मकस्य सत्यस्य प्रपञ्चस्य कर्ता प्रथमंत इत्यर्थः । ऋता इति प्लुतिराश्चर्यार्था ।

ननु—संसारात्पूर्वं देवाः प्रसिद्धा इत्यत आह—पूर्वं प्रथमः । देवेभ्यो विराडवयवभूतेभ्योऽग्न्यादिभ्यः । अमृतस्यामरणधर्मिणो वेदस्य । ना३भायि नाभिर्मध्यम् । वेदरहस्यमित्यर्थः । अत्रापि नकारे प्लुतिराश्चर्यार्था । कार्यकारणहीनोऽसङ्गोदासीनोऽहं वेदगर्भ इत्येवंरूप इति योऽन्नस्य दाताऽऽत्मनो वा सर्वाभिन्नस्य तत्त्वमसीत्यादिवाक्येभ्यो दाता क्षुधार्तेभ्यः संसारतापतप्तेभ्यो वा । मा माम् । अन्नमानन्दात्मरूपं वा ददाति प्रयच्छति । स उक्तो दाता । इदित्थं दानं कुर्वन् । एवमनेन दानेन । आ३वाः, अवोऽवतीत्यर्थः । अकारप्लुतिराश्चर्यार्था । मां सर्वाभिन्नमपि रक्षयतीति ।

ननु—अन्ने दीयमाने कथं भवान्दत्त इत्यत आह—अहमन्नं व्याख्यातम् । ननु—अन्नस्य दानेनाऽऽत्मनो वा त्वद्रक्षणजं सुकृतं भवतु दातर्यस्य तु तस्मिन्नाभिलाषः स तु त्वामन्नमात्मानं वा परस्मै मा प्रयच्छतु । भक्षयतु स्वयं काममन्नं कोऽस्यानर्थ इत्यत आह—अन्नमदनीयं मां तद्रूपमात्मानं वाऽदत्त्वा । अदन्तं भक्षयन्तम् । आ३द्मि, अद्मि भक्षयाम्यन्नभक्षकम् । अकारे प्लुतिराश्चर्यार्था । सर्वाभिन्नोऽप्येवं भक्षयामीति ।

ननु—यथा त्वमेनं भक्षयसि तथा त्वामप्यन्यः । यथा मण्डूकः क्षुद्रं जीवं तं सर्पः सर्पं मकरो विश्वस्य विचित्रशक्तिभूताक्रान्तत्वात्ततो न भवतः प्राप्तिः पुरुषार्थ इत्यत आह—अहमानन्दात्मा विश्वं निखिलं भुवनं भवन्त्यस्मिन्भूतानीति भवनं भवनमेव भुवनम् । अविद्या तत्कार्यतत्संस्कारजातं कार्यकारणरूपमित्यर्थः । अभ्यभवा३मभ्यभवं स्वकीयेनाऽऽनन्दात्मरूपेण देशकालवस्तुपरिच्छेदशून्येन चरमवृत्तिसाक्षात्कारविषयेण निखिलमिदमात्मरूपकारणेन परिभवामि । अतो न मम कश्चन भक्षकः किंत्वहमेव सर्वस्य । ततो न मत्प्राप्तिरपुरुषार्थ इत्यर्थः ।

ननु—सर्वाभेदेऽन्येभ्यः कस्त्वैश्यतिशय इत्यत आह—सुवर्न सुवर्णस्तत्समानवर्ण आदित्य इव सुवर्णः । ज्योतीर्ज्योतिः प्रकाशः स्वयंप्रकाशानन्दरूपोऽऽहं ततो मय्यैतिशय इत्यर्थः । इदानीं श्रुतिराह—योऽधिकारी । एवमुक्तप्रकारमानन्दात्मानम्

१ क. °भज इ° । २ ख. °त्मस्वरू° । ३ क. ग. °त्स्वति° । ४ ख. °ह—सुवर्णस्त° । ५ ख. °व्यस्यति° ।

वेद जानाति साक्षात्करोतीत्यर्थः । सोऽपीमाँल्लोकानित्यादिनोक्तं फलं प्राप्नोतीत्यभिप्रायः । इत्युपनिषत् । व्याख्यातं पूर्ववल्ल्याम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरानन्दविरचितायां पदार्थबोधिन्यां तैत्तिरीयोपनिषद्दीपिकायां तृतीये भृगुवल्ल्यध्याये दशमोऽनुवाकः ॥ १० ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दात्मपूज्यपादशिष्यस्य श्रीशंकरानन्दभगवतः कृतौ तैत्तिरीयोपनिषद्दीपिकायां तृतीयो भृगुवल्ल्यध्यायः समाप्तः ॥ ३ ॥

समाप्तेयं शंकरानन्दी तैत्तिरीयोपनिषद्दीपिका ॥